| ७३ | अपरुषत्वस्वरूपम् | ५३ |




For Private And Personal Use Only

| गाथा | विषयः | पेज |
|---|---|---|
| ७४-७६ | अनुविचिन्त्यभाषित्वस्वरूपम् | ५३-५४ |
| ७५ | अनादेयवचनस्वरूपम् | ५४ |
| ७७ | मानसिकविनयः | ५४ |
| ७८-८४ | **औपचारकविनयः सप्तप्रकारः** | ५४-५७ |
| ७९ | अभ्यासवर्तित्वम् १ | ५५ |
| ८० | छन्दोनुवर्तिता २ | ५५ |
| ८१ | कार्यहेतुकः ३ | ५६ |
| ८२ | कृतप्रतिकृतिरूपः ३ | ५६ |
| ८३ | आर्त्तगवेषणरूपविनयः ५ | ५७ |
| | कालज्ञताविनयः६ | ५७ |
| ८४ | सर्वानुलोमताविनयः ७ | ५७ |
| ८५ | विपक्षे जयणा | ५८ |
| ८६ | **चतुष्प्रकारः प्रतिरुपविनयः** | ५८ |
| ८७-९० | अनुलोमवचनसहितत्वविनयः १ | ५८-५९ |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| गाथा | विषयः | पेज |
|---|---|---|
| ९१-९३ | प्रतिरूपकायक्रिया विनयः २ | ६० |
| ९२ | संस्पर्शनविनयः३ | ६० |
| ९३ | विश्रामणागुणाः | ६० |
| ९४-९५ | सर्वत्राऽनुलोमताविनयः ४ | ६१ |
| ९६ | प्रशस्तादिस्वरूपम् | ६१-६२ |
| ७७-७८ | अविनये प्रायश्चित्तम् | ६२ |
| ९९-१०७ | उभयार्हप्रायश्चित्तस्वरूपम् | ६२-६६ |
| १००-१०४ | शङ्कितस्वरूपम् | ६४-६५ |
| १०५ | सहसाकारस्वरूपम् | ६५ |
| १०६-१०७ | महाव्रतातिचारस्वरूपम् | ६६ |
| १०८-१०९ | विवेकार्हप्रायश्चित्तस्वरूपम् | ६६-६७ |
| ११०-१२४ | **व्युत्सर्गार्हप्रायश्चित्तम्** | ६७-७५ |
| १११-११३ | २५ उच्छ्वासार्हम् | ६९-७० |
| ११४-११७ | ८ उच्छ्वासार्हम् | ७०-७२ |




For Private And Personal Use Only

| गाथा | विषयः | पेज |
|---|---|---|
| ११७-११८ | अपशकुनादिषु कायोत्सर्गः | ७१-७२ |
| ११९-१२० | १०० उच्छ्वासार्हम् | ७२-७३ |
| १२० | १०८ उच्छ्वासार्हम् | ७२-७३ |
| १२१ | उच्छ्वासप्रमाणादिः | ७३ |
| १२२-१२४ | कायोत्सर्गस्वरूपम् | ७३-७४ |
| १२५ | तपोर्हप्रायश्चित्तम् | ७४-७५ |
| १२५-१२६ | रात्रिन्दिवपञ्चकतपोर्हम् | ७४-७६ |
| १२७ | रात्रिन्दिवपञ्चकतपोर्हम् छेदार्हम् | ७६ |
| १२८ | मासिकानि प्रायश्चित्तानि | ७६-७७ |
| १२९ | उपधिप्रकरादिः | ७७-७९ |
| १३० | स्वाध्यायाऽकरणे प्रायश्चित्तानि | ७९ |
| १३१ | कायोत्सर्गाऽकरणे प्रायश्चित्तानि | ७९ |
| १३२ | अप्रतिलेखने प्रायश्चित्तानि | ८० |
| १३३ | पौषधिकतपोऽकरणे प्रायश्चित्तानि | ८० |

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




| गाथा | विषयः | पेज |
|---|---|---|
| १३४-१३५ | छेदादियोग्यप्रायश्चित्तानि | ८०-८२ |
| १३६-१३९ | संयोजना प्रायश्चित्तस्य प्ररूपणापृथक्त्वे-आशङ्का-परिहारादिः | ८२-८४ |
| १४०-१४८ | आरोपणाप्रायश्चित्तम् | ८४-८७ |
| १४१-१४२ | झोषणाप्रयोजनम् | ८४-८५ |
| १४३ | धान्यपिटकदृष्टान्तम् | ८५ |
| १४४-१४८ | तीर्थकृताम् उत्कृष्टतपःपरिमाणादिः | ८५-८७ |
| १४९-१५० | प्रतिकुञ्चनाप्रायश्चित्तम् | ८७-८८ |
| १५१-१५७ | कल्प-व्यवहाराध्ययनयोर्विशेषः | ८८-९१ |
| १५८-१६१ | प्रायश्चित्तार्हाः पुरुषप्रकाराः | ९१-९३ |
| १६२ | कृतकरणादिस्वरूपम् | ९३-९४ |
| १६३ | प्रायश्चित्तदानविधिः | ९४-९५ |
| १६४ | तपःप्रकाराः | ९४-९५ |
| १६५-१६८ | प्रायश्चित्तदानविधिः | ९४-१०२ |




For Private And Personal Use Only

| गाथा | विषयः | पेज |
|---|---|---|
| | पुरुषभेदे प्रायश्चित्तकोष्ठकं | ९७ |
| १६९ | सापेक्षे प्रकारत्रयम् | १०२ |
| १७०-१७६ | प्रायश्चित्तदानभेदे प्रयोजनानि | १०२-१०५ |
| १७७-१८२ | चिकित्साविधिनानात्वं | १०५-१०८ |
| १८० | भण्डी-पोत दृष्टान्तौ | १०७-१०८ |


॥ पीठिका समाप्ता ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

श्री व्यवहार-सूत्रम् पीठिका १ (A)

॥ ॐ नमो जिनाय ॥ ॐ नमो वीतरागाय ॥ ॥ अर्हं ॥

श्रीमन्मलयगिरिविरचितविवरणयुतनिर्युक्ति-भाष्यसमेतम्

# श्री व्यवहारसूत्रम्

## पीठिका

### आचार्य श्री मलयगिरिसूरि विरचितवृत्तौ

### मङ्गलाचरणम्

*प्रणमत नेमिजिनेश्वर-मखिलप्रत्यूहतिमिररविबिम्बम् ।*
*दर्शनपथमवतीर्णं, शशिवद् दृष्टेः प्रसत्तिकरम् ॥१॥*

*नत्वा गुरुपदकमलं, व्यवहारमहं विचित्रनिपुणार्थम् ।*
*विवृणोमि यथाशक्ति, प्रबोधहेतोर्जडमतीनाम् ॥२॥*

---

* इदं तु ध्येयम्- सम्पादनहेतुरस्माभिः ( पु. प्रे. ) पुण्यविजयजीसज्जीकृतमुद्रणार्हप्रति (Press Copy) उपयुक्ता अन्या अपि तालपत्रीयादिप्रतयः उपयुक्ताः सन्ति ।

पु.प्रे. मध्ये खं.वा.मो.पु इति चतस्त्र सङ्केतिताः सटीकग्रन्थस्य प्रतयः, खंभा. जेभा. वाभा. इति सङ्केतिताः तिस्त्रः भाष्यप्रतयः निर्दिष्टा सन्ति । सङ्केतानां विवरणं प्राप्तं नास्ति । अस्माभिः खंभातस्य C, भांडारकरपुनाभंडारस्य तिस्त्रः B, B1, B2, जेसलमेरस्य J, सर्वास्तालपत्रीयाः प्रतयः उपयुक्ताः सन्ति ।

सूत्रप्रतिषु- जेसू, खंसू, संसू, प्रतिनां पाठभेदाः पु. प्रे. मध्ये दृश्यन्ते ॥

श्री व्यवहार-सूत्रम् पीठिका १ (A)



For Private And Personal Use Only

*विषमपदविवरणेन, व्यवहर्त्तव्यो व्यधायि साधूनाम् ।*
*येनायं व्यवहारः श्रीचूर्णिकृते नमस्तस्मै ॥३॥*

*भाष्यं क्व चेदं विषमार्थगर्भं, क्व चाहमेषोऽल्पमतिप्रकर्षः ?।*
*तथापि सम्यग्गुरुपर्युपास्ति-प्रसादतो जातदृढप्रतिज्ञः ॥४॥*

उक्तं **कल्पाध्ययनम्,** इदानीं **व्य**वहाराध्ययनमुच्यते, तस्य चायमभिसम्बन्धः, **कल्पा**ध्ययने आभवत्प्रायश्चित्तमुक्तं, न तु दानप्रायश्चित्तदानम्[१] । **व्य**वहारे तु दान-प्रायश्चित्तमालोचनाविधिश्चाभिधास्यते, तदनेन सम्बन्धेनाऽऽयातस्याऽस्य व्यवहाराध्ययनस्य [२]विवरणं प्रस्तूयते।

अनुयोग द्वाराणि

अस्य च महापुरस्येव चत्वारि अनुयोगद्वाराणि भवन्ति । तथाहि— यथा नगरमकृत-द्वारम् अनगरं, कृतैकद्वारमपि च दुरधिगमं, कृतचतुर्मूलद्वारं तु प्रतिद्वारानुगतं सुखाधिगमम् एवं व्यवहाराध्ययनपुरमप्यर्थाधिगमोपायशून्यमशक्याधिगमम्, एकद्वारानुगतमपि च दुरधि-गमं, सप्रभेदचतुर्द्वारानुगतं तु सुखाधिगमम्, इति फलवान् द्वारोपन्यासः।

**१. ०प्रायश्चित्तं प्रोक्तं व्य० खं० ॥ २. व्याख्या प्र० वा० भो० ॥**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अनुयोगद्वाराणि नाम-अध्ययनार्थप्रवेशमुखानि[1], तानि च अमूनि-उपक्रमः१, निक्षेपः२ अनुगमः३, नयाः४ इति; तत्र उपक्रमणमुपक्रमः- शास्त्रस्य समीपीकरणं१, निक्षेपणं निक्षेपो नामादिन्यासः२, अनुगमनमनुगमः सूत्रस्यानुरूपमर्थाख्यानं ३, नयाः- नैगमादयो वस्तुनः पर्यायाणां यथासम्भवमधिगमकारिणः[2] ४।

तत्रोपक्रमो द्विविधः- शास्त्रीय इतरश्च, इतरः षट्प्रकारः नाम-स्थापना-द्रव्य-क्षेत्र-काल-भावभेदात्। तत्र नाम-स्थापने सुप्रतीते; द्रव्योपक्रमो द्विविधः आगमतो नोआगमतश्च, आगमत उपक्रमशब्दार्थस्य ज्ञाता तत्र चानुपयुक्तः, 'अनुपयोगो द्रव्यम्' [अनुयोगद्वार] इति वचनात् । नोआगमतस्त्रिविधो ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तभेदात् । तत्र यद् उपक्रमशब्दार्थज्ञस्य शरीरं जीवविप्रमुक्तं [3]सिद्धिशिलातलादिगतं तद् भूतभावत्वात् ज्ञशरीर-द्रव्योपक्रमः। यस्तु बालको नेदानीमुपक्रमशब्दार्थमवबुध्यते अथ चाऽवश्यमायत्यां भोत्स्यते, स भाविभावनिबन्धनत्वाद् भव्यशरीरद्रव्योपक्रमः। ज्ञशरीर-भव्यशरीरव्यतिरिक्त-स्त्रिविधः सचित्ता-ऽचित्त-मिश्रभेदात्। तत्र सचित्तद्रव्योपक्रमो द्विपद-चतुष्पदा-ऽपदो-

१. नार्थं वा० मो० पु० ॥ २. ०मभिग० वा० भो० । ३. सिद्ध० CB3 अनुयोगद्वारे च भा. १ पृ. ५ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पाधिभेदभिन्नः, पुनरेकैको द्विविधः, परिकर्म्मणि वस्तुविनाशे च । तत्र द्रव्यस्य गुणविशेष-परिणाम-करणं-परिकर्म्म, तस्मिन् । सचित्तद्विपदद्रव्योपक्रमो यथा पुरुषस्य वर्णादिकरणम्, सचित्तचतुष्पदद्रव्योपक्रमो यथा हस्त्यादेः शिक्षाद्यापादनम्, सचित्ताऽपदद्रव्योपक्रमो—यथा वृक्षादेर्[1]**वृक्षायुर्वेदो**पदेशाद् वृद्ध्यादिगुणकरणम् । वस्तुविनाशे पुरुषादीनां खड्गादिभि-र्विनाशकरणम्। अचित्तद्रव्योपक्रमः परिकर्म्मणि यथा- पद्मरागमणेः क्षारमृत्पुटपाकादिना नैर्मल्यापादनम्; वस्तुविनाशे विनाशकरणम् । मिश्रद्रव्योपक्रमः परिकर्मणि कटकादि-भूषितपुरुषादिद्रव्यस्य गुणविशेषकरणं, वस्तुविनाशे विवक्षितपर्यायोच्छेदः। क्षेत्रम्-आकाशं, तच्चामूर्त्तं नित्यं चेति न तस्य परिकर्मलक्षणो विनाशलक्षणो वा उपक्रमो घटते, तत उपचारात् तदाश्रितस्येक्षुक्षेत्रादेस्तौ द्रष्टव्यौ । कालस्योपक्रमः परिकर्म्मणि चन्द्रोपरागादेर्य-थावस्थितमर्वागेव [2]परिज्ञान-करणम् । वस्तुविनाशे विवक्षिते काले तदुचितप्रयोजनस्याऽ-सम्पादनं, तदसम्पादने हि स कालो विनाशितो भवति । भावोपक्रमो द्विधा आगमतो नोआगमतश्च, तत्राऽऽगमत उपक्रमशब्दार्थस्य ज्ञाता तत्र चोपयुक्तः, "उपयोगो भावनिक्षेपः" इति वचनात्, नोआगमतो द्विविधः- प्रशस्तोऽप्रशस्तश्च, तत्राऽप्रशस्तो

१. **वृक्षायुर्वेदस्योल्लेखः वसुदेवहिंडीमध्येऽपि दृश्यते पृ. ५०॥ २. प्रतिज्ञा० खं० ।**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गणिकादीनां, गणिका ह्यप्रशस्तेन संसाराभिवर्द्धिना[1] व्यवसायेन परभावमुपक्रामन्ति। प्रशस्तः श्रुतादिनिमित्तमाचार्यभावोपक्रमः, अनेनेहाधिकारः।

अथ व्याख्याङ्गप्रतिपादनाधिकारे गुरुभावोपक्रमाभिधानमनर्थकम्, अव्याख्याङ्गत्वात्, तदसम्यक्, तस्यापि व्याख्याङ्गत्वात्, उक्तं च—

*"गुर्वायत्ता यस्मात् शास्त्रारम्भा भवन्ति सर्वेऽपि ।*
*तस्माद् गुर्वाराधनपरेण हितकाङ्क्षिणा भाव्यम् ॥ [प्रशमरति. ६९]*

**आवश्यकभाष्य**कारेणाऽप्यभ्यधायि—

*गुरुचित्तायत्ताइं वक्खाणंगाइं जेण सव्वाइं ।*
*जेण पुण सुप्पसन्नं, होइ तयं तं तहा[2] कज्जं ॥ १ ॥*

*आगारिंगियकुसलं, जइ सेयं वायसं वए पुज्जा ।*
*तहवि य सिं न वि कूडे, विरहम्मि य कारणं पुच्छे ॥२॥ [वि.भा.गा. ९३१]*

१. ०ध्यवसायेन- पु.प्रे. ॥ २. तदा-वा० मो० पु० ॥



For Private And Personal Use Only

आह-यद्येवं गुरुभावोपक्रम एव भणनीयो न शेषाः, निष्प्रयोजनत्वात्, न, गुरुचित्त-प्रसादनार्थं तेषामप्युपयोगित्वात्; तथा च देश-कालावपेक्ष्य परिकर्म्म-विनाशौ द्रव्याणा-मुदकौदनादीनामाहारादिकार्येषु कुर्व्वन्नन्तेवासी हरति गुरूणां चेतः । अथवा उपक्रम-सामान्याद् ये केचन सम्भविन उपक्रमभेदास्ते सर्वेऽप्युक्ताः; येनाऽनुपयोगि-[1] व्युदासेनोपयोगिनि निष्प्रतिपक्षा प्रतिपत्तिरुपजायते। तथा चाऽप्रस्तुतार्थाऽपाकरणं प्रस्तुतार्थ-व्याकरणं च नामादिन्यासव्याख्यायाः फलमुपवर्णयन्ति महाधियः, उक्तं च— 'अप्रस्तुतार्थाऽपाकरणात् प्रस्तुतार्थव्याकरणाच्च निक्षेपः फलवान्' इति, उक्तः इतरः ।

इदानीं शास्त्रीय उच्यते- असौ षड्विधः, तद्यथा-आनुपूर्व्वी १, नाम २, प्रमाणं ३, वक्तव्यता ४, अर्थाधिकारः ५, समवतार ६ इति । तत्राऽऽनुपूर्व्वी नाम-स्थापना-द्रव्य-क्षेत्र-काल-गणनोत्कीर्तन-संस्थान-सामाचारी-भाव-भेदभिन्ना दशप्रकारा, तस्यां यथासम्भ-वमवतारणीयमिदमध्ययनं, विशेषतस्तूत्कीर्तनाऽऽनुपूर्व्यां गणनाऽऽनुपूर्व्यां च । उत्कीर्तना नाम-संशब्दना, यथा **कल्पाऽध्ययनम् व्यवहाराध्ययन**मिति । गणनं-परिसङ्ख्यानमेकं द्वे त्रीणि इत्यादि, सा च गणनाऽऽनुपूर्वी त्रिप्रकारा-पूर्वाऽऽनुपूर्वी१ पश्चादाऽऽनुपूर्वी२ अनानु-

---

१. ॰पयोगिनिष्प्रतिपक्षा - J ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पूर्वी३ च । तत्र पूर्वानुपूर्व्यामिदं द्वितीयं, पश्चादानुपूर्व्यां प्रथमं, द्वयोस्त्वनानुपूर्वी नास्ति । **अपरे** तु दशभि**र्दशाध्ययनैः** सहेदं गणयन्ति, तत्र पूर्वानुपूर्व्यामिदं द्वादशं, पश्चादानुपूर्व्यां प्रथमम् अनानुपूर्व्यामेकादयो द्वादशपर्यन्ता अङ्काः श्रेण्या व्यवस्थाप्यन्ते, तेषां च परस्पर-मभ्यासे यावान् राशिः सम्पद्यते ४७९००१६०० तावन्तो द्विरूपोना भङ्गकाः ४७९००१५९८। ते च कोटिसङ्ख्याकाः, तेषु च क्वचित् प्रथमं क्वचिद् द्वितीयमित्यादि । नाम एकनामादि दशनामपर्यन्तं यथाऽनुयोगद्वारेषु, षण्णाम्नि त्ववतारः, तत्र षड् भावा औदयिकादयो निरूप्यन्ते, तत्रास्य क्षायोपशमिके भावे अवतारः, सर्वश्रुतस्य क्षायोपशमिकत्वात्।

प्रमाणं चतुर्द्धा, द्रव्यप्रमाणं १ क्षेत्रप्रमाणं २ कालप्रमाणं ३ भावप्रमाणं च ४। तत्र [२]इदं **व्य**वहाराध्ययनं भावात्मकत्वाद् भावप्रमाणविषयं, तदपि भावप्रमाणं त्रिधा, तद्यथा-गुणप्रमाणं१ नयप्रमाणं २ सङ्ख्याप्रमाणं ३ च। गुणप्रमाणमपि द्विधा, जीवगुणप्रमाण-मजीवगुणप्रमाणं च । तत्र जीवादपृथग्भूतत्वात् **व्य**वहाराध्ययनस्य [३]जीवगुणप्रमाणे समवतारः, तदपि जीवगुणप्रमाणं त्रिधा-ज्ञान-दर्शन-चारित्रभेदात्, तत्र बोधात्मकत्वाद् **व्य**वहाराध्ययनस्य ज्ञानगुणप्रमाणे समवतारः। तदपि ज्ञानगुणप्रमाणं प्रत्यक्षा-ऽनुमाना-



---

**२. इदं - पु. प्रे. नास्ति ॥ ३. ज्ञानगुण० ॥**

For Private And Personal Use Only

ऽऽगमोपमानभेदात् चतुष्प्रकारं, तत्र **व्य**वहाराध्ययनस्य प्रायः परोपदेशसव्यपेक्षत्वादागमे समवतारः। आगमोऽपि लौकिक-लोकोत्तरभेदाद् द्विधा, तत्रेदं **व्य**वहाराध्ययनं परमर्षि-प्रणीतत्वात् लोकोत्तरे समवतरति । सोऽपि द्विधा **आवश्यक**मावश्यकव्यतिरिक्तश्च, तत्रेदमावश्यकव्यतिरिक्ते । आवश्यकव्यतिरिक्तोऽपि द्विधा-अङ्गप्रविष्टोऽनङ्गप्रविष्टश्च, तत्रेदमनङ्गप्रविष्टे । सोऽपि द्विधा कालिकोत्कालिकभेदात्, तत्रेदं कालिके। सोपि सूत्राऽर्थोभयात्माऽनन्तर-परम्परभेदभिन्नः, तत्रेदं सूत्राऽर्थरूपत्वात्तदुभये, तथेदं गणभृतां **गौतमादी**नां सूत्रत आत्मागमस्तच्छिष्याणां **जम्बू**स्वामिप्रभृतीनामनन्तरागमः प्रशिष्याणां तु **प्रभवा**दीनां परम्परागमः, अर्थतो भगवतामर्हतामात्मागमो गणधराणामनन्तरागमः, तच्छिष्याणां परम्परागमः ।

नयप्रमाणे तु नास्य सम्प्रत्यवतारो मूढनयत्वात्, उक्तं च-'**मूढनइयं सुयं कालियं तु**[१]' इत्यादि। सङ्ख्या नाम-स्थापना-द्रव्य-क्षेत्र-कालोपमा-परिमाण-भावभेदात् अष्टप्रकारा यथा **अनुयोगद्वारेषु** तथा वक्तव्या, तत्र कालिकश्रुतपरिमाणसङ्ख्यायां समवतारः नोत्कालिकश्रुतपरिमाणसङ्ख्यायां, नापि **दृष्टिवाद**श्रुतपरिमाणसङ्ख्यायां, कालिकश्रुत-



१. च - वा॰ मो॰ पु॰ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





परिमाणसङ्ख्याऽपि [1]द्विविधा- सूत्रतोऽर्थतश्च, तत्रार्थतोऽनन्तपर्यायत्वादपरिमितपरिमाणं, सूत्रतः परिमितपरिमाणम्, अक्षर-पद-पाद-श्लोक-गाथादीनां सङ्ख्याततत्वात् ।

सम्प्रति वक्तव्यता सा च त्रिधा स्वसमयवक्तव्यता, परसमयवक्तव्यता[2], स्वसमय-परसमयवक्तव्यता च ३। स्वसमयः स्वसिद्धान्तः, तस्य वक्तव्यता पदार्थविचारः, तत्र प्रायेण सर्वाण्यपि अध्ययनानि स्वसमयवक्तव्यतायां समवतरन्तीत्यस्यापि स्वसमय-वक्तव्यतायां समवतारः।

इदानीमर्थाधिकारः- स चेह दानप्रायश्चित्तम्, आभवत्प्रायश्चित्तम्, आलोचनाविधिश्च। सम्प्रति समवतारः, स च लाघवार्थं प्रतिद्वारं समवता[3]रणद्वारेण प्रदर्शित एव । उक्तः उपक्रमः।

इदानीं निक्षेपः, स च त्रिधा-ओघनिष्पन्नो १ नामनिष्पन्नः २ सूत्रालापकनिष्पन्नश्च ३। तत्र ओघो नाम यत्सामान्यं शास्त्राभिधानं, तच्च चतुर्द्धा- अध्ययनम्, अक्षीणम् आयः क्षपणा च । एकैकं नाम-स्थापना-द्रव्य-भावभेदेन चतुर्भेदमनुयोग[4]द्वारानुसारतः प्रपञ्चेना-भिधाय भावाध्ययन-भावाक्षीण-भावाय-भावक्षपणास्वेतदध्ययनमायोज्यम् । नामनिष्पन्ने

१. द्विधा - वा॰ मो॰ पु॰ ॥ २. ॰ता उभयसमय ॰मु. ॥ ३. तारणाद्वा॰ वा॰ मो॰ ॥ ४. द्वारतः प्र॰ वा॰ मो॰ पु॰॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निक्षेपे 'व्यवहारः' इति, व्यवह्रियते-यद् यस्य प्रायश्चित्तमाभवति स तद्दानविषयी-क्रियतेऽनेनेति व्यवहारः; '**तृस्त्रोऽवात् समश्च हृञः** [**मलय.**कृ. ६-८,९]' इति करणे घञ्प्रत्ययः। तत्र व्यवहारग्रहणेन व्यवहारी व्यवहर्तव्यं चेति द्वितयं सूचितमेव, तद्व्यतिरेकेण व्यवहारस्याऽसम्भवात्; न खलु करणं सकर्म्मकक्रियासाधकतमरूपं कर्म्म कर्त्तारं च विना क्वचित्सम्भवदुपलब्धमिति। ततो यथा व्यवहारस्य प्ररूपणा कर्त्तव्या तथा व्यवहारि-व्यवहर्त्तव्ययोरपीति त्रयाणामपि प्ररूपणां चिकीर्षु**र्भाष्यकृदे**तदाह—

**ववहारो ववहारी, ववहरियव्वा य जे जहा[1] पुरिसा ।**
**एएसिं तु पयाणं, पत्तेयं परूवणं वोच्छं ॥ १ ॥**

'**व्यवहार**' उक्तशब्दार्थः। व्यवहरतीत्येवंशीलो '**व्यवहारी**' व्यवहारक्रियाप्रवर्त्तकः, प्रायश्चित्तदायीति यावत्। 'तथा **ये पुरुषाः**' पुरुषग्रहणं "पुरुषोत्तमो धर्मः" इति ख्यापनार्थम्; अन्यथा स्त्रियोऽपि द्रष्टव्याः,तासामपि प्रायश्चित्तदानविषयतया प्रतिपाद-यिष्यमाणत्वात् । '**यथा**' येन वक्ष्यमाणेन प्रकारेण '**व्यवहर्त्तव्याः**' व्यवहारक्रियाविषयी-

---

१. जदा काले- चूर्णौ पाठान्तरम् । दृश्यतां तृतीयगाथायाश्चूर्णि । जहा काले-टीकाकृन्निर्दिष्टं पाठान्तरम्॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कर्त्तव्याः, पाठान्तरं '**जे जहा काले**' अस्यायमर्थः- ये यथा यस्मिन् काले व्यवहर्त्तव्याः। तद्यथा-यदा आगमव्यवहारिणः सन्ति, तदा तदुपदेशेनैव व्यवहर्त्तव्याः, तेषु व्यवच्छिन्नेषु श्रुतज्ञानव्यवहार्युपदेशेन, तदैव चाऽऽज्ञयापि, तदैव धारणया, तदैव तु जीतव्यवहारेणापि व्यवहर्त्तव्या इति । '**एतेषां**' व्यवहार-व्यवहारि-व्यवहर्त्तव्यरूपाणां त्रयाणां '**पदानां**', '**तुः**'विशेषणे, **स**[१] चैतद्विशिनष्टि- सङ्क्षेपतो विस्तरतश्च, **प्रत्येक**मिति एकमेकं प्रति प्रत्येकं, "**शब्दप्रथा**" [**मलय**॰नाम॰८-५०] इत्यादिना अव्ययीभावः, एकैकस्येत्यर्थः, '**प्ररूपणां**' व्याख्यां **वक्ष्ये** ॥१॥ तत्र सङ्क्षेपप्ररूपणार्थमिदमाह—

**ववहारी खलु कत्ता, ववहारो होइ करणभूतो उ ।**
**ववहरियव्वं कज्जं, कुंभादितियस्स जह सिद्धी ॥ २ ॥**

'**ववहारी खलु कत्त**'ति व्यवहारस्य कर्त्ता व्यवहारस्य छेत्ता अभिधीयते इति शेषः **व्यवहारः** पुनर्भवति **करणभूतः** व्यवहारच्छेदक्रियां प्रति करणत्वं प्राप्तः, **तुशब्दः** पुनरर्थे व्यवहितसम्बन्धश्च, स च यथास्थानं योजित एव, स च व्यवहारः करणभूतः पञ्चधा-

---

**१. स चैवं वि॰ खं॰ ॥**



For Private And Personal Use Only

आगमः १ श्रुतम् २ आज्ञा ३ धारणा ४ जीतश्च ५ । आह **चूर्णिकृत्**,- **'पञ्चविधो व्यवहारः करणम्'** इति। तेन च पञ्चविधेन व्यवहारेण करणभूतेन व्यवहरन् कर्ता यन्निष्पादयति कार्यं तद् व्यवहर्त्तव्यमित्युच्यते। तथा चाह— **'ववहरियव्वं कज्जं'** यत् कार्यं कर्त्तव्यं व्यवहारेण तद् व्यवहर्तव्यं, व्यवहर्त्तव्य- कार्ययोगात् पुरुषा अपि व्यवहर्त्तव्याः, ततः प्रागुक्तं 'ववहरियव्वा य जे जहा पुरिसा'[गा.१] इति। अथ कथं व्यवहारग्रहणेन व्यवहारी व्यवहर्त्तव्यश्च सूच्यते? न खलु देवदत्तग्रहणेन यज्ञदत्तस्य सूचा भवतीति, तत आह **कुंभादितियस्स जह सिद्धी** कुम्भ आदिरेषामिति कुम्भादयस्तेषां त्रिकं कुम्भादित्रिकं, तस्य यथा सिद्धिः कुम्भग्रहणेन । तथाहि कुम्भ इत्युक्ते- स कृतक इति तस्य कर्त्ता कुलालः, करणं मृच्चक्रादि सामर्थ्यात्[१] सूच्यते, कृतकस्य[२] सतः कर्तृ-करणव्यतिरेकेणाऽसम्भवात् । एवमत्रापि व्यवहार इत्युक्ते व्यवहारी व्यवहर्त्तव्यश्च सूच्यते, करणस्यापि सकर्म्मकक्रियासाधकतमरूपस्य कर्म्म-कर्त्तृव्यतिरेकेणासम्भवादिति[३] त्रितय-सिद्धिः ॥२॥ तदेवम् 'एकग्रहणे सामर्थ्यादितरस्य द्वयस्य ग्रहणं भवति' इत्येतत् सामान्येन सनिदर्शनमुक्तम् । सम्प्रति करणग्रहणेऽवश्यं[४] कर्तृ-कर्म्मग्रहणं[५] भवतीत्यर्थे निदर्शनमाह—

१. °त् तन्यते-वा°मो°पु° ॥ २. कृतकस्यासतः - मु. ॥ ३. व्यवहारातिरे° ता° ॥ ४. करणेऽव° वा° मो° पु° ॥ ५. कर्म भ° वा° ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**नाणं नाणी नेयं, अन्ना[1] वा मग्गणा भवे तितए,**
**विविहं वा विहिणा वा, ववणं हरणं च ववहारो ॥ ३ ॥**

एका तावन्मार्गणा त्रितयविषया कुम्भादित्रिक-सिद्धिदृष्टान्ते प्रागभिहिता, **वाशब्दः** प्रकारान्तरे अथवा इय**मन्या तितियेत्ति** त्रितयविषया । मार्गणा भवति, तामेवाह— **नाणी नाणं नेयमिति,** तत्र ज्ञायते वस्तु परिच्छिद्यते अनेनेति ज्ञानम्, तत्र यथा ज्ञानमित्युक्ते ज्ञानिनो ज्ञानक्रियाकर्तुः ज्ञेयस्य च ज्ञानक्रियाविषयस्य परिच्छेद्यस्य सिद्धिर्भवति, तद्द्वितयसिद्धिमन्तरेण ज्ञानस्य ज्ञानत्वस्यैवासम्भवात्, एवमत्रापि व्यवहारग्रहणेन व्यवहारी व्यवहर्त्तव्यश्च सूच्यते इति भवति त्रितयस्याप्युपक्षेपः। तदेवं सङ्क्षेपतो व्यवहारादि-पदत्रयस्य प्ररूपणा कृता । सम्प्रति यथाक्रमं विस्तरेण तां चिकीर्षुः प्रथमतो व्यवहारपदस्य निरुक्तं वक्तुकाम इदमाह– '**विविहं वा**' इत्यादि, विविधं तद्योग्यतानुसारेण विचित्रं **विधिना वा** सर्वज्ञोक्तेन प्रकारेण **वपनं** तपःप्रभृत्यनुष्ठानविशेषस्य दानं, 'टुवप् बीजतन्तु-सन्ताने' इति वचनात्, **हरणम्**-अतीचारदोषजातस्य अथवा सम्भूय द्वित्रादिसाधूनां

१. अन्ना वि य म॰ खं॰ वा॰ मो॰ पु॰ जेभा॰ खंभा॰ ॥



For Private And Personal Use Only

क्वचित्प्रयोजने प्रवृत्तौ यद् यस्मिन्नाभवति तस्य तस्मिन् वपनमितरस्माच्च हरणमिति **व्यवहारः**। किमुक्तं भवति? विविधो विधिना वा वापो हारो व्यवहारः[1], "**पृषोदरादयः**" [**मलय**] इति वि-वापशब्दयोर्व्यव आदेशः ॥३॥

सम्प्रति वपन-हरणशब्दयोरर्थं वक्तुकामस्तदेकार्थिकान्याह—

**ववणं ति रोवणं ति य, पकिरण परिसा[2]डणा य एगट्ठं।**
**हारोत्ति य हरणं ति य, एगट्ठं हीरए व त्ति ॥ ४ ॥**

'टुवप् बीजतन्तुसन्ताने' उप्यते इति **वपनम्** । **इति**शब्दः शब्दस्वरूपपरिसमाप्तिद्योतकः। एवमुत्तरेऽपि । **रोपणमिति** 'रुह जन्मनि' रोहति कश्चित्तमन्यः प्रयुंक्ते **प्रयोक्तृव्यापारे णिञ्** (**मलय** आ. ६/५) '**रुहेः पो वा**' [**मलय.** पः आ. ९/१६] इति हकारस्य पकारः, रोप्यते इति रोपणं, भावे अनट्, वा समुच्चये **पकिरणे**ति 'कृ विक्षेपे'



---

१. अभिधानचिन्तामणिनाममालाया द्वितीयकाण्डस्य १७६ तम श्लोकान्तर्गत 'व्यवहार' शब्द-व्याख्यायामाचार्यश्रीहेमचन्द्रसूरिपादाः- "व्यवहरणं व्यवहारः, यत् स्मृतिः- 'वि' नानार्थे, 'अव' सन्देहे, हरणं 'हार' उच्यते। नानासन्देहहरणाद् व्यवहारः प्रकीर्तितः ॥" २. सायणा- खंभा० जेभा०॥

प्रपूर्वः, प्रशब्दोऽत्र दाने, प्रदातुं कीर्यते विक्षिप्यते इति प्रकिरणम् । '**परिसाडणा य**' इति, 'शट् रुजायां' परिपूर्वः, परिशटति-परिभ्रश्यति तमन्यः प्रयुंक्ते पूर्ववत् णिञ्, परिशाट्यते इति परिशाटना **णि वेत्त्यास** इत्यादिना अनः प्रत्ययः, आप् च । चः समुच्चये, '**एगट्ठ**मिति' एतत् शब्दचतुष्टयमेकार्थम्, 'एकार्थप्रवृत्ताः परस्परमेते पर्याया इति भावः, तेन यदुक्तं भवति रोपणमिति प्रकिरणमिति परिशाटनेति वा तदुक्तं भवति वपनमिति। एतावता वपनशब्दस्य प्रदानलक्षणोऽर्थः समर्थितः। '**हारोत्ति य**' इत्यादि हरणं हारः, हृतिर्हरणं, ह्रियते इति वा एकार्थं, त्रयोप्येते शब्दा एकार्थिका इत्यर्थः ॥४॥ तदेवं वापशब्दस्य हारशब्दस्य च प्रत्येकमर्थोऽभिहितः सम्प्रति तयोरेव समुदितयोरर्थं जिज्ञापयिषुरिदमाह—

**अंत्थी[1]-पच्चत्थीणं, हाउं एक्कस्स वंवइ[2] बिइयस्स ।**
**एएण उ ववहारो, अहिगारो एत्थ उ विहीए ॥ ५ ॥**

'**अर्थी**' याचकः यः परस्मात् 'ममेदं लभ्यमिति' याचते, '**प्रत्यर्थी**' अर्थिनः प्रतिकूलः, किमुक्तं भवति ?- यः परस्य गृहीत्वा न किमपि तस्मै प्रयच्छति, तयोरर्थि-



१. अत्थि-प्पच्च० खं० ॥ २. ववति बीयस्स - वभा०॥

प्रत्यर्थिनोर्विवदमानयोर्व्यवहारार्थं स्थेयपुरुषमुपस्थितयोः स व्यवहारपरिच्छेदकुशलो व्यवहारविधापनसमर्थश्च स्थेयो यस्मात् '**हाउं एकस्स**' त्ति सूत्रे षष्ठी पञ्चम्यर्थे प्राकृतत्वात्, प्राकृते हि विभक्तिव्यत्ययोऽपि भवति, यदाह-**पाणिनिः** स्व**प्राकृतलक्षणे** '**व्यत्ययोप्यासाम्**' इति, यस्य यन्नाभवति, तस्मात् तद् **हत्वा** आदाय यस्याऽऽभवति तस्मै **द्वितीयाय वपति** प्रयच्छति, **एएण उ ववहारो** इति एतेन-अनन्तरोदितेन कारणेन स स्थेयव्यापारो व्यवहारः। किमुक्तं भवति?-यस्मादेष स्थेयपुरुषो विवादनिर्णयाय एकस्माद् हरति अन्यस्मै प्रयच्छति, तस्मात् तद्व्यापारो वपन-हरणात्मकत्वाद् व्यवहार इति । एतावता समुदायार्थकथनं कृतम् । स च व्यवहारः द्विधा-विधिव्यवहारः अविधिव्यवहारश्च, तत्रा[१]विधिव्यवहारपरित्यागेन विधिव्यवहार एव कर्तव्य इति प्रतिपादनार्थमाह- **अहिगारो एत्थ उ विहीए अत्र** एतस्मिन् शास्त्रे **अधिकारः**-प्रयोजनं व्यवहारेण **विधिनैव** विधिपूर्वकेणैव। '**तुशब्दः**' एवकारार्थो भिन्नक्रमश्च, नाऽविधिना, अविधेर्मोक्षप्रतिपन्थित्वात् ॥ ५ ॥

तदेवमुक्तं व्यवहारशब्दस्य निर्वचनं, तच्च क्रियामात्रमपेक्ष्योक्तम् । अधिकृतग्रन्थयोजनायां तु करणव्युत्पत्तिराश्रयणीया-विधिना उप्यते ह्रियते च येन स व्यवहार इति ।

१. तत्राप्यविधि॰ वा॰ मो॰ पु॰ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सम्प्रति व्यवहारस्य नामादिभेदप्रदर्शनार्थमाह—

**ववहारम्मि चउक्कं, दव्वे पत्तादि लोइयादी वा ।**
**नोआगमतो पणगं, भावे एगट्ठिया तस्स ॥ ६ ॥**

**व्यवहारे** व्यवहारविषये **चतुष्कं,** किमुक्तं भवति?- चतुर्द्धा व्यवहारः, तद्यथा- नामव्यवहारः स्थापनाव्यवहारो द्रव्यव्यवहारो भावव्यवहारश्च। तत्र नाम-स्थापने सुप्रतीते, द्रव्यव्यवहारो द्विधा- आगमतो नोआगमतश्च। आगमतो व्यवहारपदज्ञाता तत्र चाऽनुपयुक्तः। नोआगमतस्त्रिधा-ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तभेदात्। तत्र ज्ञशरीर-भव्यशरीरव्यवहारौ गतौ, ज्ञशरीर-भव्यशरीरयोरन्यत्राऽनेकशोऽभिहितत्वात् । तद्व्यतिरिक्तमाह— **दव्वे पत्ताइ लोइयादी वा 'द्रव्ये'**- द्रव्यविषये व्यवहारो नोआगमतो ज्ञशरीर-भव्यशरीरव्यतिरिक्तः पत्रादिः, आधाराऽऽधेययोरभेदविवक्षणादयं निर्देशस्ततोऽयमर्थः:- ज्ञशरीर-भव्यशरीरव्यतिरिक्तो द्रव्यव्यवहारः खल्वेष एव ग्रन्थः पुस्तकपत्रलिखितः, आदिशब्दात् काष्ठसम्पुट-फलक-पट्टिकादिपरिग्रहः, तत्राऽप्येतद्ग्रन्थस्य[१] लेखनसम्भवात्।

१. ॰स्य लिखितस॰ खं॰ ॥



For Private And Personal Use Only

'लौकिकादिर्वा' इति, यदि वा ज्ञशरीर-भव्यशरीरव्यतिरिक्तो द्रव्यव्यवहारस्त्रिविधः, तद्यथा—लौकिकः, कुप्रावचनिको लोकोत्तरिकश्च, तत्र लौकिको यथा **आनन्दपुरे**[१] खड्गादावुद्गीर्णे (उत्कीर्णे) रूपकाणामशीतिसहस्रं दण्डः, मारितेऽपि तावानेव, प्रहारे तु पतिते यदि कथमपि न मृतस्तर्हि रूपकपञ्चकं दण्डः, उत्कृष्टे तु कलहे प्रवृत्ते अर्द्धत्रयोदशरूपका दण्डः। कुप्रावचनिको यथा यत्कर्म्म यो न करोति, न ततः कर्म्मणस्तस्य किञ्चिदिति। लोकोत्तरिको यथा- य एते पाण्डुरपटप्रावरणा जिनानामनाज्ञया स्वच्छन्दं विहरन्तः परस्परमशन-पानादिप्रदानरूपव्यवहारं कुर्वन्ति। भावव्यवहारो द्विधा-आगमतो नोआगमतश्च। आगमतो व्यवहारपदार्थज्ञाता तत्र चोपयुक्तः, "उपयोगो भावनिक्षेप" इतिवचनात्। नोआगमतः पञ्चविधो[२] व्यवहारः, तथा चाह— **'नोआगमतो पणगं भावे'** इति। भावे विचार्यमाणे नोआगमतो व्यवहारो व्यवहारपञ्चकं-आगमः श्रुतम् आज्ञा धारणा जीतमिति । नोशब्दो देशवचनः। **तस्य** पञ्चविधस्यापि नोआगमतो भावव्यवहारस्य सामान्येन **एकार्थिकानि** अमूनि ॥ ६ ॥ तान्येवाह—

---

१. तुला - बृहत्कल्पभाष्ये ५१०८, जीतकल्पभाष्ये २३७३ ॥ २. पञ्चधा - वा० ॥

**सुत्ते१ अत्थे२ जीए,३ कप्पे४ मग्गे५ तहेव नाए६ य ।**
**तत्तो य इच्छियव्वे,[1]७ आयरिए[2]८ चेव ववहारो ॥ ७ ॥**

तत्तदर्थसूचनात् **सूत्रम्,** औणादिकी शब्दव्युत्पत्तिः, तच्च पूर्वाणि छेदसूत्राणि वा१। तथा अर्यते-प्राथ्र्यते मोक्षमभिलषद्भिरिति '**अर्थः** सूत्रस्याभिधेयम् २। तथा **जीतं** नाम प्रभूताऽनेकगीतार्थकृता मर्यादा; तत्प्रतिपादको ग्रन्थोऽप्युपचारात् जीतम्३। तथा कल्पन्ते समर्था भवन्ति संयमाध्वनि प्रवर्त्तमाना अनेनेति **कल्पः**४। 'मृजौ[3] शुद्धौ' मृजन्ति शुद्धीभवन्त्यनेनातिचारकल्मषप्रक्षालनादिति **मार्गः**५। उभयत्र **व्यञ्जनात् घञ् [मलय. कृ.६-७]**इति घञ् प्रत्ययः। तथा 'इण् गतौ', निपूर्वः, नितरामीयते गम्यते मोक्षोऽनेनेति **न्यायः**६। तथा सर्वैरपि मुमुक्षुभिरीप्स्यते आप्तुमिष्यते इती**प्सितव्यः**७। आचर्यते स्म बृहत्पुरुषैर**प्याचरितम्८। व्यवहार** इति पूर्ववत् ॥ ७॥ उक्तान्येकार्थिकानि । सम्प्रत्य-त्रैवाऽऽक्षेपपरिहारावभिधित्सुराह—

१. इच्छिते या आ॰ इति चूर्णिसम्मतः पाठः ॥ २. आयरियव्वे य वव॰ खंभा॰ जेभा॰ ॥ ३. मृजूष् शु॰ वा॰ । मृजौष् शु॰ मो॰॥

**एगट्ठिया अभिहिया, न य ववहारपणगं इहं दिट्ठं ।**
**भण्णइ एत्थेव तयं, दट्ठव्वं अंतगयमेव ॥ ८ ॥**

नन्व**भिहितान्येकार्थि**कानि परमेतेष्वेकार्थिकेषु **व्यवहारपञ्चकमा**गम-श्रुताऽऽज्ञा-धारणा-जीतलक्षणं **न दृष्टं** नोपात्तं; जीतस्यैव केवलस्योपात्तत्वात्। अत्र सूरिराह— '**भण्यते**' अत्रोत्तरं दीयते, **अत्रैव** एतेष्वेव एकार्थिकेषु **तत्** व्यवहारपञ्चक**मन्तर्गतमेव द्रष्टव्यम्** ॥ ८ ॥ कथम्? इत्याह—

**आगम-सुया उ[१] सुत्तेण, सूइया अत्थतो उ ति-चउत्था ।**
**बहुजणमा[२]इण्णं पुण जीयं उचियं ति एगट्ठं ॥ ९ ॥**

'**सूत्रेण**' सूत्रशब्देन **सूचिते आगम-श्रुते** आगम-श्रुतव्यवहारौ । तथाहि-आगम-व्यवहारिणः षट्, तद्यथा— केवलज्ञानी, मनःपर्यायज्ञानी, अवधिज्ञानी, चतुर्दशपूर्वी, दशपूर्वी, नवपूर्वी च, श्रुतव्यवहारिणोऽवशेषपूर्वधरा एकादशाङ्गधारिणः **कल्प-व्य**वहारा-

---

**१. य - वाभा० ॥ २. ० मायण्णं -पु० प्रे० ॥**

दिसूत्रार्थतदुभयविदश्च, ततो भवति सूत्रग्रहणेनाऽऽगम-श्रुतव्यवहारयोर्ग्रहणं, चतुर्दशपूर्वादीनां **कल्प-व्यवहारादिच्छेदग्रन्थानामपि** च सूत्रात्मकत्वात् । तथा **अर्थतः** अर्थशब्देन सूचितौ **त्रि-चतुर्थौ** तृतीय-चतुर्थौ आज्ञा-धारणालक्षणौ व्यवहारौ, तथाहि-आज्ञाव्यवहारो नाम-यदा द्वावप्याचार्यावासेवितसूत्रार्थतयाऽतिगीतार्थौ क्षीणजङ्घाबलौ विहारक्रमानुरोधतः विप्रकृष्टदेशान्तरनिवासिनौ अत एवाऽन्योन्यस्य समीपं गन्तुमसमर्थाविभूतां, तदाऽन्यतरस्मिन् प्रायश्चित्ते समापतिते सति तथाविधयोग्यगीतार्थशिष्याभावे मतिधारणाकुशलमगीतार्थमपि शिष्यं गूढार्थान्यतिचाराऽऽसेवनपदानि कथयित्वा प्रेषयति। यथा—

*'पढमस्स य कज्जस्स य पढमेण पएण सेवियं जं तु ।*
*पढमे छक्के अब्भिंतरं, तु पढमं भवे ठाणं ॥ १ ॥'*

अत्र प्रथमं कार्यं दर्प्पः, तत्र प्रथमं पदं दर्प्पः, तन्निमित्तं, प्रथमं षट्कं-व्रतषट्कम्। तत्राभ्यन्तरम् अन्तर्गतं प्रथमं स्थानं प्राणातिपातः ।

*पढमस्स य कज्जस्स य, पढमेण पएण सेवियं जं तु ।*
*पढमे छक्के अब्भिंतरं, तु बीयं भवे ठाणं ॥ २ ॥*

अत्र द्वितीयं स्थानं मृषावादः, एवमदत्तादानादिष्वपि भावनीयम् ।

*पढमस्स य कज्जस्स य पढमेण पएण सेवियं जं तु ।*
*बिइए छक्के अब्भितरं, तु पढमं भवे ठाणं ॥ ३ ॥*

अत्र द्वितीयं षट्कं-कायषट्कमित्यादि। एवं तेन कथिते स आचार्यो द्रव्य-क्षेत्र-काल-भाव-संहनन-धृति-बलादिकं परिभाव्य स्वयं वा गमनं करोति, शिष्यं वा तथाविधं योग्यं गीतार्थं प्रज्ञाप्य प्रेषयति। तदभावे तस्यैव प्रेषितस्य गूढार्थामतिचारविशुद्धिं कथयति । धारणाव्यवहारो नाम-गीतार्थेन संविग्नेनाऽऽचार्येण द्रव्य-क्षेत्र-काल-भाव-पुरुषान् प्रति-सेवनाश्चावलोक्य यस्मिन्नपराधे यत् प्रायश्चित्तम् अदायि, तत्सर्वमन्यो दृष्ट्वा तेष्वेव द्रव्यादिषु तादृश एवापराधे तदेव प्रायश्चित्तं ददाति, एष धारणाव्यवहारः। अथवा वैयावृत्त्यकरस्य गच्छोपग्राहिणः स्पर्द्धकस्वामिनो वा देशदर्शनसहायस्य वा संविग्नस्योचि-तप्रायश्चित्तदानधारणमेष धारणाव्यवहारः । एतौ च द्वावप्यर्थात्मकत्वादर्थग्रहणेन सूचितौ, जीतव्यवहारस्तु जीतशब्देनैव साक्षादुपात्तः । अथ जीतमिति कोऽर्थः? इत्यत आह— **बहुजणे**त्यादि, बहुभिर्जनैर्गीतार्थैराचीर्णं **बहुजनाचीर्ण**मिति वा '**उचित**मिति' वा **जीत**मिति

वा **एकार्थं,** किमुक्तं भवति?- बहुजनाचीर्णं नाम जीतमिति ॥ ९ ॥ तमेव जीतव्यवहारं दर्शयति—

**दद्दुरमादिसु कल्लाणगं तु विगलिंदिएसऽभत्तट्ठो ।**
**परियावणाए तेसिं चउत्थ-मायंबिला हुंति ॥ १० ॥**

**दर्दुरो** मंडूकस्तदादिषु तत्प्रभृतिषु, मकारोऽलाक्षणिकः प्राकृतत्वात्, तिर्यक्पञ्चेन्द्रियेषु जीविताद् व्यपरोपितेष्विति शेषः, **कल्याणकं** तु इति तुशब्दो विशेषणार्थः, स चैतद् विशिनष्टि-पञ्चकल्याणकं प्रायश्चित्तम्। **विगलिंदिएसऽभत्तट्ठो** इति विकलान्यसम्पूर्णानि इन्द्रियाणि येषां ते **विकलेन्द्रिया**- एक-द्वि-त्रि-चतुरिन्द्रियाः, तत्र 'व्याख्यानतो विशेषप्रतिपत्तिः' इत्येकेन्द्रिया अनन्तवनस्पतिकायिका द्रष्टव्याः,तेषु **अभक्तार्थ** एव[१] उपवासः प्रायश्चित्तं, '**परियावणाए तेसिमि**'त्यादि, तेषां दर्दुरादीनां परितापनायां यथासङ्ख्यं **चतुर्थाऽऽचाम्ले** प्रायश्चित्ते भवतः। इयमत्र भावना— यदि दर्दुरादीन् तिर्यक्पञ्चेन्द्रियान् गाढं परितापयति, ततोऽभक्तार्थः प्रायश्चित्तम्, अथ विकलेन्द्रियान् अनन्तवनस्पतिकायिकप्रभृतीन्

१. एक उ० खं० ॥.

गाढं परितापयति तत आचाम्लम्। उपलक्षणमेतत्, तेनैतदपि जीतव्यवहारानुगतमवसेयं- यदि दर्दुरप्रभृतीन् तिर्यक्पञ्चेन्द्रियान् मनाक् सङ्घट्टयति तत एकाशनकम्, अथा[१]नागाढं परितापयति तत आचाम्लं, तथा अनन्तवनस्पतिकायिक-द्वि-त्रि-चतुरिन्द्रियाणां सङ्घट्टने पूर्वार्द्धम्, इत्येषामेवानागाढपरितापने एकाशनम्, तथा पृथिव्यप्तेजोवायुप्रत्येकवनस्पतीनां सङ्घट्टने निर्विकृतिकम्, अनागाढपरितापने पुरिमार्द्धम्, आगाढपरितापने एकाशनं, जीविताद् व्यपरोपणे आचाम्लमिति ॥ १० ॥ इदमपि जीतमेवेति दर्शयति—

**अपरिण्णा कालाइसु, अपडिक्कंतस्स निव्विगइयं तु ।**
**[२]निव्वीतिय पुरिमड्ढो, अंबिल खवणा य आवासे ॥ ११ ॥**

'**अपरिज्ञा**'-प्रत्याख्यानपरिज्ञाया अग्रहणं गृहीताया वा भङ्गः, तत्र सूत्रे विभक्तिलोप आर्षत्वात्, तथा '**कालादिषु अप्रतिक्रामतो**' अव्यावर्तमानस्य प्रायश्चित्तं **निर्विकृतिकम्**। किमुक्तं भवति?- यदि नमस्कार-पौरुष्यादिदिवसप्रत्याख्यानं वैकालिकं च पानाहार-प्रत्याख्यानं न गृह्णाति, गृहीत्वा वा विराधयति, तथा स्वाध्यायं प्रस्थाप्य यदि कालस्य न

१. ०था गाढं - J. B3 ॥ २. णिव्वियतिय पु० खंभा० जेभा० । निव्वी इय पुरिमड्ढा-खं० ॥

प्रतिक्रामति-न कालप्रतिक्रमणनिमित्तं कायोत्सर्गं करोति, आदिशब्दाद् येषु स्थानेष्वीर्यापथिकया प्रतिक्रमितव्यं, तेषु चेत् तथा न प्रतिक्रामति तर्हि प्रायश्चित्तं निर्विकृतमिति। तथा **निव्वीतिय** इत्यादि **आवासे** आवश्यके एकादिकायोत्सर्गाऽकरणे सर्वाऽऽवश्यकाऽकरणे च यथासङ्ख्यं **निर्विकृतिक-पूर्वार्द्धाऽऽचाम्ल-क्षपणानि** । इयमत्र भावना— आवश्यके यद्येकं कायोत्सर्गं न करोति ततः प्रायश्चित्तं निर्विकृतिकं, कायोत्सर्गद्वयाऽकरणे पूर्वार्द्धं, त्रयाणामपि कायोत्सर्गाणामकरणे आचाम्लं, सर्वस्यापि चाऽऽवश्यकस्याऽकरणे अभक्तार्थम् इति ॥ ११ ॥

**जं जस्स व पच्छित्तं आयरियपरंपराए अविरुद्धं ।**
**जोगा य बहुविगप्पा[1] एसो खलु जीयकप्पो उ ॥ १२ ॥ दारं १ ॥**

**यत् प्रायश्चित्तं यस्या**चार्यस्य गच्छे **आचार्यपरम्परया** आचार्यपरम्परागतत्वेन **अविरुद्धं** न पूर्वपुरुषमर्यादाऽतिक्रमेण विरोधभाक् । यथाऽन्येषामाचार्याणां नमस्कारपौरुष्यादिप्रत्याख्यानस्याकरणे कृतस्य वा भङ्गे प्रायश्चित्तमाचाम्लम्। तथा आवश्यक-

१. बहुविहीया - चूर्णिसम्मतः पाठः ॥

श्री व्यवहार-सूत्रम् पीठिका १४ (A)

गतैककायोत्सर्गाऽकरणे पूर्वार्द्धम्, कायोत्सर्गद्वयाऽकरणे एकाशनकमित्यादि, तथा ये **योगा:** उपधानानि **बहुविकल्पा:** गच्छभेदेन बहुभेदा आचार्यपरम्परागतत्वेन चाऽविरूद्धा:। यथा- **नागिलकुलवंश**वर्त्तिनां साधूना**माचारा**दारभ्य याव**दनुत्तरोपपातिकदशा:**, तावन्नास्ति आचाम्लं, केवलं निर्विकृतिकेन ते पठन्ति, आचार्यानुज्ञाताश्च विधिना कायोत्सर्गं कृत्वा विकृती: परिभुञ्जते, तथा **कल्प-व्यवहारयो: चन्द्रप्रज्ञप्ति-सूर्यप्रज्ञप्त्योश्च** केचिदागाढं योगं प्रतिपन्ना: अपरे त्वनागाढमिति, **एस खलु जीयकप्पो उ** इति एष सर्व्वोपि खलु गच्छभेदेन प्रायश्चित्तभेदो योगभेदश्चाऽऽचार्यपरम्परागतो जीतकल्पो-जीतव्यवहारो वेदितव्य: ॥१२॥ उक्तो व्यवहार: सम्प्रति व्यवहारिण: इति द्वितीयं द्वारमभिधित्सुराह-

**दव्वंमि लोइया खलु, लंचिल्ला भावतो उ मज्झत्था।**
**उत्तर दव्व अगीया गीया वा लंचपक्खेहिं ॥ १३ ॥** दारं २ ।

गाथा १३-१४ व्यवहारि-स्वरूपम्

व्यवहारिणश्चतुर्द्धा, तद्यथा- नामव्यवहारिण:, स्थापनाव्यवहारिण:, द्रव्यव्यवहारिणो, भावव्यवहारिणश्च, तत्र नाम-स्थापने सुज्ञाते[१], द्रव्यव्यवहारिणो द्विधा-आगमतो नोआगमतश्च। तत्राऽऽगमतो व्यवहारिशब्दार्थज्ञास्तत्र चाऽनुपयुक्ता:। नोआगमतस्त्रिविधा-ज्ञशरीर-

१. सुज्ञाने - खं० ॥



For Private And Personal Use Only

भव्यशरीर-तद्व्यतिरिक्तभेदात् । तत्र ज्ञशरीर-भव्यशरीरद्रव्यव्यवहारिणः प्रतीताः, तद्-व्यतिरिक्ता द्विविधाः- **लौकिका लोकोत्तरिकाश्च,** भावव्यवहारिणोऽपि द्विधा- आगमतो नोआगमतश्च। आगमतो व्यवहारिशब्दार्थज्ञास्तत्र चोपयुक्ताः। नोआगमतो द्विधा-लौकिका लोकोत्तरिकाश्च। तत्र पूर्वार्द्धेन नोआगमतो द्रव्य-भावलौकिकव्यवहारिणः प्रतिपादयति **द्रव्ये** विचार्यमाणे नोआगमतो ज्ञशरीर-भव्यशरीरव्यतिरिक्ता **लौकिका व्यवहारिणः** खलु '**लंचिल्ला**' इति, लञ्चा उत्कोच इत्यनर्थान्तरं, तद्वन्तः। किमुक्तं भवति? परलञ्चामुपजीव्य ये सापेक्षाः सन्तो व्यवहारपरिच्छेदकारिणस्ते द्रव्यतो [1]लौकिका व्यवहारिणः, '**भावतो उ मज्झत्था**'इति भावतः पुनर्नोआगमतो [2]लौकिका व्यवहारिणः मध्यस्थाः मध्ये राग-द्वेषयोरपान्तराले तिष्ठन्तीति मध्यस्थाः, ये परलञ्चोपचारमन्तरेणाऽरक्ताऽद्विष्टाः सन्तो न्यायैकनिष्ठतया व्यवहारपरिच्छेत्तारस्ते नोआगमतो लौकिका भावव्यवहारिण इति भावः।

अधुना लोकोत्तरिकान् नोआगमतो द्रव्यव्यवहारिणः प्रतिपादयति- '**उत्तर दव्व अगीया**' इत्यादि, उत्तरे लोकोत्तरे द्रव्ये विचार्यमाणे नोआगमतो द्रव्यव्यवहारिणः, **अगीता**-अगीतार्थाः, ते हि यथावस्थितं व्यवहारं न कर्तुमवबुध्यन्ते, ततस्तद्व्यवहारो

१-२. लौकिकव्य० खं० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



द्रव्यव्यवहार एव, भावस्य-यथावस्थितपरिज्ञानलक्षणस्याऽभावात्, द्रव्यशब्दोऽत्राऽप्रधान-वाची, अप्रधानव्यवहारिणस्ते इत्यर्थः, **'गीया वा लंचपक्खेहिं'** इति, यदि वा गीतार्था अपि सन्तो ये परलञ्चामुपजीव्य व्यवहारं परिछिन्दन्ति तेऽपि द्रव्यव्यवहारिणः, अथवा विनाऽपि लञ्चया[1] गीतार्था अपि ये 'ममायं भ्राता, ममायं निजकः' इति पक्षेण-पक्षपातेन [2]व्यवहारकारिणस्तेऽपि द्रव्यव्यवहारिणः, मा[3]ध्यस्थ्यरूपस्य भावस्याऽसम्भवात् ॥१३॥

सम्प्रति नोआगमतो लोकोत्तरिकान् भावव्यवहारिणः प्राह—

**पियधम्मा दढधम्मा, संविग्गा चेवऽवज्जभीरू अ ।**
**सुत्त-ऽत्थ-तदुभयविऊ अणिस्सियववहारकारी य ॥ १४ ॥**

प्रियो धर्म्मो येषां ते **प्रियधर्माणः**। धर्मे दृढा **दृढधर्माः**, राजदन्तादित्वाद् दृढशब्दस्य पूर्वनिपातः। अत्र चतुर्भङ्गिका-प्रियधर्म्माणो नामैके नो दृढधर्म्मा इति प्रथमो भङ्गः, नो प्रियधर्म्माणो दृढधर्म्माश्चेति द्वितीयः, अपरे प्रियधर्माणो दृढधर्म्माश्चेति तृतीयः, अन्ये नो प्रियधर्माणो नो दृढधर्मा इति चतुर्थः। अत्र तृतीयो भङ्गोऽधिकृतः, न शेषा इति प्रतिपत्त्यर्थं

१. लञ्चां गी॰ वा॰ मो॰ पु॰ ॥ २. व्यवहारिण॰ वा॰ पु॰ ॥ ३. मध्यस्थरू॰ वा॰ मो॰ पु॰ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विशेषणान्तरमाह- **संविग्गा** संविग्ना नाम-उत्त्रस्ताः, ते च द्विधा- द्रव्यतो भावतश्च। द्रव्यतः संविग्ना मृगाः, तेषां यतस्ततो वा बिभ्यतां प्रायः सदैवोत्त्रस्तमानसत्वात्। भावसंविग्ना ये संसारादुत्त्रस्तमानसतया सदैव पूर्वरात्रादिष्वेतच्चिन्तयन्ति।

**किं मे कडं? किं च मे किच्च सेसं? किं सक्कणिज्जं न समायरामि?**' [तुला- **दसवै.** चूलिका २ गा. १२] इत्यादि। अत्र भावसंविग्नैरधिकारः। भावसंविग्नप्रतिपत्त्यर्थमेव विशेषणान्तरमाह- '**ऽवज्जभीरू**[1]' अवद्यं-पापं, तस्य भीरवः, अवद्यभीरवः, ये चाऽवद्यभीरवस्ते भावसंविग्ना **एवेति,** भवति[2] अवद्यभीरुग्रहणाद् भावसंविग्नप्रतिपत्तिः। एते च यथोक्तविशेषणविशिष्टा अपि गीतार्थत्वमृते भावव्यवहारकारिणो[3] न भवन्तीति गीतार्थत्वप्रतिपत्त्यर्थमाह- '**सुत्तऽत्थ-तदुभयविऊ**' सूत्रं च अर्थश्च तदुभयं चेति-तच्च तत् सूत्रार्थलक्षणम्, उभयं च तदुभयं, तच्च सूत्रार्थतदुभयानि, तानि विदन्तीति। सूत्राऽर्थतदुभयविदः। किमुक्तं भवति?- सूत्रचिन्तायां[4] सूत्रम्, अर्थचिन्तायामर्थं, तदुभयचिन्तायां च तदुभयं ये विदन्ति, ते सूत्राऽर्थतदुभयविदः। इह सूत्रार्थवेदने चतुर्भङ्गिका-

१. ०रू वज्जं-पापं तस्य भीरवः वज्जभीरवः, ये च वज्जभी० वा० मो० पु० ॥ २. न्ति । वज्जभीरुग्रहणेन भा० वा० मो० पु० ॥ ३. ०हारिणो-वा० ॥ ४. सूत्रचिन्तायामर्थचिन्तायां तदुभयचिन्तायां च सूत्रान्ताऽर्थतदुभयं ये - खं० ॥



For Private And Personal Use Only

सूत्रविदो नामैके नो अर्थविदः १, नो सूत्रविदोऽर्थविदः २, अपरे सूत्रविदोऽपि अर्थविदोऽपि ३, अन्ये नो सूत्रविदो नाप्यर्थविदः ४ । अत्र तृतीयभङ्गेनाधिकारः, तत्रापि सूत्रवेलायां सूत्रविद्भिः, अर्थवेलायामर्थविद्भिः, तदुभयवेलायां तदुभयविद्भिरिति सूत्राऽर्थ-तदुभयग्रहणम् । **अणिस्सियववहारकारी य** इति निश्रा-रागः, निश्रा सञ्जाता अस्येति निश्रितः, न निश्रितोऽनिश्रितः, स चासौ व्यवहारश्च अनिश्रितव्यवहारः, तत्करणशीला अनिश्रितव्यवहारकारिणः, न रागेण व्यवहारकारिण इति भावः। 'एकग्रहणे[1] तज्जातीयस्यापि ग्रहणम्' इति न्यायादनुपश्रितव्यवहारकारिण इत्यपि द्रष्टव्यम्। तत्र उपश्रा नाम-द्वेषः, उपश्रा सञ्जाता अस्येति उपश्रितः[2], स चासौ व्यवहारश्च, उपश्रितव्यवहारः, न उपश्रितव्यवहारः अनुपश्रितव्यवहारः, तत्करणशीला अनुपश्रितव्यवहारकारिण; न द्वेषेण व्यवहारकारिण इत्यर्थः । अथवा एषोऽनुवर्त्तितः सन् मह्यमाहारादिकमानीय दास्यतीत्यपेक्षा निश्रा, एष मदीयः शिष्यो, यदि वा प्रतीच्छकोऽथवा मदीयं मात्रादिकुलमेतत्, मदीया वा एते श्रावका इत्यपेक्षा उपश्रा, शेषं तथैव । अत्र 'अनिश्रितव्यवहारकारिण इति किमुक्तं भवति ?

१. ०ग्रहणेन त० वा० पु० ॥ २. ताः, न उपश्रितोऽनुपश्रितः, स चाऽसौ व्यवहारश्च [ अनुपश्रितव्यवहारः ] तत्क० वा० भो० पु० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



लञ्चोपचारनिरपेक्षव्यवहारकारिणः, न रागेण व्यवहारकारिणः[1] अनुपश्रितव्यवहारकारिणः इति, किमुक्तं भवति?— पक्षपातनिरपेक्षव्यवहारपरिच्छेत्तार इति ॥ १४ ॥ अथ प्रियधर्म्म-दृढधर्म्म-संविग्नसूत्रार्थतदुभयविद्ग्रहणे किं फलम्? इत्यत आह—

**पियधम्मे दढधम्मे य, पच्चओ होइ गीय संविग्गे ।**
**रागो उ होइ निस्सा, उवस्सितो देससंजुत्तो ॥ १५ ॥**

**प्रियधर्म्मणि दृढधर्म्मे, चः** समुच्चये भिन्नक्रमश्च, **गीते** गीतार्थे सूत्रार्थतदुभयविदि संविग्ने च प्रायश्चित्तं ददति **प्रत्ययः** विश्वासो भवति । यथा- अयं प्रियधर्म्मा दृढधर्मो **गीतार्थः संविग्नश्चेति** नान्यथा प्रायश्चित्तव्यवहारकारीति प्रियधर्म्मादिपदानामुपन्यासः, तथा अनिश्रितव्यवहारकारिणः इत्यत्र यो निश्राशब्दस्तदर्थमाचष्टे- **रागस्तु भवति निश्रा।** अनुपश्रितव्यवहारकारिण इत्यत्रोपश्रितशब्दस्य व्याख्यानमाह- **उपश्रितो द्वेषसंयुक्तः,** उपश्रा द्वेष इत्यनर्थान्तरमिति भावः ॥ १५ ॥ द्वितीयं व्याख्यानं निश्रोपश्राशब्दयोर्दर्शयति—

**अहवा आहारादी, दाहीइ मज्झं तु एस निस्सा उ ।**
**सीसो पडिच्छओ वा, होइ उवस्सा कुलादी वा ॥ १६ ॥**

---

१. ॰णा । इति किमुक्तं वा॰ मो॰ पु॰ ॥



For Private And Personal Use Only

**अथ**वेति व्याख्यानान्तरोपदर्शने, एषोऽनुवर्त्तितः सन् मह्य**माहारादिकं दास्यतीत्ये**षा-ऽपेक्षा-लञ्चोपजीवनस्वभावा निश्रा । तथा एष मे **शिष्यः**, **एष** मे **प्रतीच्छकः**, इदं मे मातृ**कुल**मिदं मे पितृकुलम्' आदिशब्दाद् इमे[१] मम सहदेशनिवासिनः,भक्ता वा इमे सदैव मम' इत्यपेक्षा पक्षाभ्युपगमस्वरूपा **भवत्युपश्रा,** आभ्यां[२] हि व्यवहारिणो द्रव्यव्यवहारिणो भवन्ति, 'गीया वा लंचपक्खेहिं' [गा. १३] इति वचनात्, तत एतयोः प्रतिषेधः॥ १६ ॥

उक्ता व्यवहारिणः सम्प्रति व्यवहर्त्तव्याः वक्तव्याः ते च नामादिभेदाच्चतुर्द्धा, तद्यथा-नामव्यवहर्त्तव्याः, स्थापनाव्यवहर्त्तव्या द्रव्यव्यवहर्त्तव्या भावव्यवहर्त्तव्याश्च। तत्र नाम-स्थापने प्रतीते । द्रव्यव्यवहर्त्तव्या अपि द्विधा-आगमतो नोआगमतश्च। तत्राऽऽगमतो व्यवहर्तव्यशब्दार्थज्ञास्ते चानुपयुक्ताः । नोआगमतोऽपि त्रिविधाः, ज्ञशरीर-भव्यशरीर-तद्व्यतिरिक्तभेदात् । तत्र ज्ञशरीर-भव्यशरीररूपाः प्रतीताः, तद्व्यतिरिक्तास्तु द्विधा-लौकिका, लोकोत्तरिकाश्च । भावव्यवहर्त्तव्या[३] द्विधा—आगम-नोआगमभेदात्, तत्र आगमतो व्यवहर्त्तव्यपदार्थज्ञाः तत्र चोपयुक्ताः, नोआगमतो द्विधा- लौकिका लोकोत्तरिकाश्च, तत्र नोआगमतो लौकिकद्रव्य-भावव्यवहर्तव्यप्रतिपादनार्थमाह—

---

१. इमे मे स॰ वा॰ पु॰ ॥ २. अस्यां हि - वा॰ मो॰ पु॰ मु॰ ॥ ३. ॰व्याश्च द्विधा-मो॰ पु॰ ॥

**लोए चोराईया-दव्वे भावे विसोहिकामा उ ।**
**जाय-मयसूतकादिसु, निज्जूढा पातकहया उ ॥ १७ ॥**

**लोके** लोकविषया व्यवहर्त्तव्या द्विधा, तद्यथा-द्रव्यव्यवहर्त्तव्या भावव्यवहर्त्तव्याश्च। तत्र **द्रव्ये** द्रव्यव्यवहर्त्तव्या**श्चौरादयः,** चौरः तस्करः, आदिशब्दात्पारदारिक-घातक-हेरिकादिपरिग्रहः, ते हि चौर्यादिकं कृत्वाऽपि न सम्यक् प्रतिपद्यन्ते, बलात्प्रतिपद्यमाना अपि च न भावतो विशोधिमिच्छन्ति, ततस्ते द्रव्यव्यवहर्त्तव्याः। **भावे** भावविषया व्यवहर्त्तव्याः **विशोधिकामा** एव, **तु**शब्दस्य एवकारार्थत्वात्, विशोधौ कामः-अभिलाषो येषां ते विशोधिकामाः । कथमस्माकमेतत्कुकर्म्मविषया विशुद्धिर्भविष्यति? इति विशुद्धि-प्रतिप[१]त्त्यभ्युद्गता भावव्यवहर्तव्या इति भावः। न केवलं द्रव्यव्यवहर्तव्याश्चौरादयः, किंतु **जाय-मयसूयगाइसु निज्जूढा** इत्यादि, सूतकशब्दः प्रत्येकमभिसम्बध्यते, जातसूतकं मृतसूतकं च । जातसूतकं नाम जन्मानन्तरं दशाहानि यावत्, मृतसूतकं नाम मृतानन्तरं दशदिवसान् यावत्, तत्र जातकसूतके मृतसूतके वा; आदिशब्दात् [२]तदन्येषु तथाविधेषु

१. ०पत्त्युद्गता - वा० मो० ॥ २. तदाद्येषु - वा० मो० पु० मु० ॥

शूद्रगृहादिषु ये कृतभोजनाः सन्तो धिग्जातीयैर्निर्यूढाः असम्भाष्याः कृताः, तथा ये **पातकहताश्च** पातकेन ब्रह्महत्यादि[१]लक्षणेन माता-पित्रादिघातलक्षणेन वा हताः पातकहताः, एते हि द्वयेऽपि यदा न स्वदोषं प्रतिपद्यन्ते, प्रतिपद्यमाना वा न सम्यगालोचयन्ति किन्तु व्याजान्तरेण कथयन्ति तदा द्रव्यव्यवहर्त्तव्या द्रष्टव्याः।

तथाहि- 'एगो धिज्जाइतो उरालाए ण्हुसाए चंडालीए वा अज्झोववण्णो। ततो तं काएण फासित्ता पायच्छित्तनिमित्तं चउव्वेयमुवट्ठिओ भणति-सुमिणे ण्हुसं चंडालिं वा गतोमि[२] त्ति । एवमादयोऽपि द्रव्यव्यवहर्तव्याः ॥ १७ ॥ तथा चाह—

**फासेऊण अगम्मं, भणेइ[३] सुमिणे गओ अगम्मं ति ।**
**एमादि लोयदव्वे[४], उज्जू पुण होइ भावम्मि ॥ १८ ॥**

**स्पृष्ट्वा** कायेनेति गम्यते, **अगम्यां** स्नुषां चाण्डाल्यादिकां वा, स्त्रियमिति शेषः, **भणति** प्रायश्चित्तनिमित्तं चतुर्वेदमुपस्थितः सन्, यथा- **'स्वप्ने गतोऽगम्यामिति'**

१. हत्याल० वा० मो० पु० मु० ॥ २. म्हि - वा० पु० ॥ ३. भणादि - जेभा० खंभा० ॥ ४. लोतदव्वे - जेभा० खंभा० ॥

**एवमादयः**[1], आदिशब्दाद् अपेयं सुरादिकं पीत्वा प्रायश्चित्तनिमित्तं चतुर्वेदमुपस्थितो ब्रूते- 'स्वप्ने अपेयपानं कृतवानहम्' इत्यादिपरिग्रहः। **लोयदव्वत्ति**, लौकिका द्रव्यव्यवहर्तव्याः **उज्जू पुण होइ भावम्मि**, अत्र सामान्यविवक्षायामेकवचनं, ततोऽयमर्थः— त एव जात-मृत-सूतकादिनिर्यूढादय ऋजवः सन्तो यदा सम्यगालोचयन्ति, तदा **भावे**-भावविषया[2] लौकिका व्यवहर्त्तव्या भवन्ति॥१८॥ उक्ता लौकिक[3]द्रव्य-भावव्यवहर्तव्याः। सम्प्रति लोकोत्तरिकद्रव्य-भावव्यवहर्तव्यप्रतिपादनार्थमाह—

**परपच्चएण सोही, दव्वुत्तरिओ[4] उ होइ एमादी ।**
**गीतो व अगीतो वा, सब्भाव उवट्ठिओ भावे ॥ १९ ॥**

यस्य **शोधिः परप्रत्ययेन**, परः- आचार्यादिकः स एव प्रत्ययः- कारणं तदा परप्रत्ययस्तेन, किमुक्तं भवति?— नूनमहं प्रतिसेवमान आचार्येण उपाध्यायेनाऽन्येन वा साधुना ज्ञातोऽस्मि, ततः सम्यगालोचयामि' इत्येवं परप्रत्ययेन यस्य शोधिप्रतिपत्तिः, **एवमादिः**, आदिशब्दाद् यो गुरुं दोषं सेवित्वा अल्पं कथयति स्वकृतं वाऽन्यकृतं ब्रवीति

---

१. ०मादि, आ० वा० ॥ २. विषये लौ० वा० पु० ॥ ३. ०का द्र० वा० पु० ॥ ४. ०त्तारिए उ - वाभा० ॥

तदादिपरिग्रहः, लोकोत्तरिको द्रव्यव्यवहर्तव्यो भवति। **भावे** भावविषयः पुनः लोकोत्तरिको व्यवहर्तव्यो **गीतो वा** गीतार्थो वा, **अगीतो वे**ति अगीतार्थो वा प्रायश्चित्तप्रतिपत्त्यर्थं **सद्भावेनोपस्थितः** ॥१९॥ स च वक्ष्यमाणगुणैरुपेतः सन् भवतीति तानेव गुणानुपदर्शयति—

**अवंके१ अकुडिले२ यावि, कारणपडिसेवि३[1] तह य आहच्च४ ।**
**पियधम्मे य बहुसुए,५ बिइयं६ उवदेसपच्छित्तं७ ॥ २० ॥**

वंक्रोऽसंयतो, न वक्रः **अवक्रः**, संयतः, विरत इत्यर्थः१। **अकुटिलः** अमायी; **च**शब्दादक्रोधी अमानी अलोभी चेतिपरिग्रहः२। **अपिः** पदार्थसम्भावने स चामून् पदार्थान् सम्भावयति- कारणे समापतिते सति नामैको यतनया प्रतिसेवते इत्येको भङ्गः, कारणे अयतनयेति द्वितीयः, अकारणे यतनयेति तृतीयः, अकारणेऽयतनयेति चतुर्थः, अत्र प्रथमभङ्गः शुद्ध इति तत्प्रतिपादनार्थमाह— **'कारणप्रतिसेवी'** कारणे अशिवादिलक्षणे विशुद्धेनाऽऽलम्बनेन बहुशो विचार्य शुल्कादिपरिशुद्धलाभाऽऽकाङ्क्षिवणिग्दृष्टान्तेनाऽकृत्यं[2]

१. पडिसेविए य - वाभा० ॥ २. शुङ्कादि ( ? शुक्लादि )- पु० प्रे० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यतनया प्रतिसेवते इत्येवंशील: कारणप्रतिसेवी, **तहय आहच्चेति** तथा चेति समुच्चये, कारणेऽप्यकृत्यप्रतिसेवी न यदा तदा वा, किन्तु, आहच्च' कदाचित्, अन्यथा वा दीर्घसंयमस्फातिमनुपलक्षमाणः[1]। अथवा '**आहच्चेति**' कदाचिदकारणेऽपि प्रतिसेवी ४। **पियधम्मे य बहुसुए** इति 'आद्यन्तयोर्ग्रहणे मध्यस्यापि ग्रहणम्' इति न्यायात् प्रियधर्म्मा दृढधर्मा संविग्नोऽवद्यभीरुः[2] सूत्रार्थतदुभयविद् इत्यपि दृष्टव्यम्, एते सर्वेऽपि व्यवहर्त्तव्याः ५। **बिइयंति** अत द्वितीयं मतान्तरं केचिदाहुः- अवक्रादीनामपि प्रतिपक्षा व्यवहर्त्तव्या इति ६। '**उवदेसपच्छित्तं**' इह द्विविधः साधुः- गीतार्थोऽगीतार्थश्च, तत्र यो गीतार्थः स गीतार्थत्वादेवाऽनाभाव्यं न गृह्णातीति न तस्योपदेशः, यः पुनरगीतार्थस्तस्याऽनाभाव्यं गृह्णत उपदेशो दीयते, यथा- 'न युक्तं तवाऽनाभवद् गृहीतुं, यदि पुनरनाभवद् ग्रहीष्यसि ततस्तन्निमित्तं प्रायश्चित्तं भविष्यति'इत्युपदेशदानं, तत एवमुपदेशे दत्ते सति दानप्रायश्चित्तं[3] भविष्यति इत्युपदेशदानं दीयते ७, इति गाथासमासार्थः ॥ २० ॥

अत्र शिष्यः प्राह-कारणप्रतिसेवी भावव्यवहर्त्तव्य उक्तः स कथमुपपद्यते? प्रतिषिद्धं

१. यमास्फाति॰ वा॰ मो॰ पु॰ ॥ २. ॰ग्नो वज्जभीरुः - वा॰ विना ॥ ३. ॰त्तं दीयते - वा॰ मो॰ पु॰ मु॰ ॥



For Private And Personal Use Only

हि यतनयापि सेवमानो जिनाज्ञाप्रद्वेषकारी, ततः स दुष्टभाव इति कथं भावव्यवहर्त्तव्यः ? नैष दोषः, जिनाज्ञाप्रद्वेषकारित्वाऽभावात्, स हि कारणे प्रतिसेवायामपि वर्त्तते जिनाज्ञामवलम्ब्यैव, यथाऽस्यामवस्थायां दीर्घसंयमस्फातिनिमित्तमकृत्यप्रतिसेवायामपि प्रवर्त्तितव्यमिति, ततो न कश्चिद्दोषः, अपि च भगवन्तो वीतरागा न मिथ्या कदाचनापि ब्रुवते, वीतरागतया तेषां मिथ्यावचनकारणाभावात्; 'उक्तं च—

*"रागाद्वा द्वेषाद्वा मोहाद्वा वाक्यमुच्यते ह्यनृतम् ।*
*यस्य तु नैते दोषास्तस्याऽनृतकारणं किं स्यात्?" ॥१॥* [लोकतत्त्व]

भगवता च अयतनयापि कारणे प्रतिसेविनो भावव्यवहर्त्तव्या उक्ताः, तद्यदि भगवद्वचनाद् द्वितीयभङ्गवर्त्तिनोपि भावव्यवहर्त्तव्यास्ततः प्रथमभङ्गवर्त्तिनः सुतरां भावव्यवहर्त्तव्या भवेयुः, तथा चाह—

**आहच्च कारणम्मि, सेवंतो अजयणं सिया कुज्जा ।**
**एसो वि[1] होइ भावे, किं पुण जयणाए सेवंतो? ॥ २१ ॥**

१. व- वाभा० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



‘**आहच्च**’ कदाचित् अनन्यगत्या ‘**कारणे**’ अशिवादिलक्षणे अकृत्यं **सेवमानः स्या**त्कदाचिद् ‘**अयतनां कुर्यात्**’ अयतनया प्रतिसेवेतेति भावः, ‘**एषोऽपि**’ भगवद्वचना**द्भवति भावे** व्यवहर्त्तव्यः, **किं पुनर्यतनया** प्रति**सेवमानः** प्रथमभङ्गवर्त्ती? स सुतरां भवे[१]द्भावे व्यवर्हतव्य इत्यर्थः ॥ २१ ॥ न केवलं प्रथमभङ्गवर्ती द्वितीयभङ्गवर्ती वा भगवद्वचनाद् भावे व्यवहर्तव्यः, किन्तु तृतीयभङ्गवर्त्यपि तथा चाह—

**[२]पडिसेवियम्मि सोहिं, काहं आलंबणं कुणइ जो उ ।**
**सेवंतो वि अकिच्चं, ववहरियव्वो स खलु भावे ॥ २२ ॥**

कारणमन्तरेणाऽपि यतनया ‘**प्रतिसेविते**’ अकृत्ये पश्चात् ‘**शोधिं**’ प्रायश्चित्तमहं **करिष्यामी**त्येवंरूप**मालम्बनं यः करोति,** किमुक्तं भवति? –एवंरूपेणाऽऽलम्बनेनाऽकृत्ये यः प्रवृत्तिं चिकीर्षति स तथारूपमालम्बनं कृत्वा प्रति**सेवमानोऽप्यकृत्यं खलु** निश्चितं **भावे व्यवहर्त्तव्यः,** अन्तःकरणविशुद्धिपुरस्सरं यतनया प्रवर्तमानत्वेन भावतो

१. °द्भावव्य° वा° पु° ॥ २. आलोइतम्मि सोधिं - इति चूर्णिसम्मतः पाठः । पडिसेविए विसोहिं - वाभा° ॥



For Private And Personal Use Only

व्यवहारयोग्यत्वात्; किमुक्तं भवति? - अकारणे यतनयेति तृतीयभङ्गवर्त्यपि भगवद्वचनाद् भावव्यवहर्तव्यो वेदितव्य इति ॥२२॥ तदेवं चतुर्भङ्गिकायामाद्यभङ्गत्रयवर्तिनो भावव्यवहर्तव्या उक्ताः, सम्प्रति चतुर्भङ्गिकामनपेक्ष्याऽन्यथैव भावव्यवहर्तव्यलक्षणमाह—

**अहवा कज्जाऽकज्जे, जताऽजतो वा वि सेविउं साहू ।**
**सब्भावसमाउट्टो, ववहरियव्वो हवइ भावे ॥ २३ ॥**

**अथवेति** प्रकारान्तरे, तच्च प्रकारान्तरमिदं- प्राक् चतुर्भङ्गिकां प्ररूप्य भावव्यवहर्त्तव्या उक्ताः, सम्प्रति तु तामनपेक्ष्यैव भावव्यवहर्त्तव्योऽभिधीयते, कथम्? इति चेद्, अत आह,— **कज्जाऽकज्जे** कार्ये-अशिवादिनिस्तरणलक्षणे प्रयोजने, अकार्येतथाविधपुष्ट-प्रयोजनाऽभावे **जयाऽजयो व** त्ति यतमानो वा अयतमानो वा **साधुरकृत्यं सेवित्वा सद्भावेन** पुनरकरणलक्षणया तात्त्विक्या वृत्त्या **समावृत्तः**-अकृत्यकरणात् प्रत्त्यावृत्तः सन्, गुरोः समीपे यः आलोचयतीति शेषः, स **भावे भवति व्यवहर्त्तव्यः** भावतोऽकृत्यकरणतः प्रत्यावृत्तत्वात् ॥२३॥ सम्प्रति प्राक्प्ररूपितायां चतुर्भङ्गिकायां यश्चतुर्थो भङ्गस्तत्प्ररूप-णार्थमाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**निक्कारणं पडिसेवी, कज्जे निद्धंधसो यं[1] अणवेक्खो ।**
**देसं वा सव्वं वा गूहिस्सं दव्वओ एसो ॥ २४ ॥**

यो '**निष्कारणे**' कारणमन्तरेण '**प्रतिसेवी**' अकृत्यप्रतिसेवनशीलः। '**कज्जे निद्धंधसो**'त्ति अत्र अपिशब्दोऽनुक्तोऽपि गम्यते सामर्थ्यात्, ततोऽयमर्थः-कार्येऽपि तथाविधे समुत्पन्ने 'निद्धंधसो' देशीवचनमेतत्, अकृत्यं प्रतिसेवमानो नाधिकृतारम्भविराध्यमानप्राण्यनुकम्पापर इत्यर्थः, '**चः**' समुच्चये स च भिन्नक्रमे, **अनपेक्ष**श्चेत्येवं योजनीयः। न विद्यतेऽपेक्षा- 'वैरानुबन्धो मे विराध्यमानजन्तुभिः सह भविष्यति, संसारो वा दीर्घतरः' इत्येवंरूपा यस्याऽसावनपेक्षः, 'हा दुष्ठु कृतं मया'इति पश्चादनुतापरहित इति भावः। तथा यः प्रतिसेवित्वा (सेव्य) **देशं गूहयिष्यामि,** किंचिन्मात्रमालोचयिष्यामि, न सर्वमिति भावः। '**सव्वं व**'त्ति सर्वं वा गूहयिष्यामि न किंचिदालोचयिष्यामीत्यर्थः, इति चिन्तयति, चिन्तयित्वा च तथैव करोति, **एष द्रव्यतो** व्यवहर्त्तव्यो वेदितव्यः॥ २४ ॥

---

१. व्व -वा०मो०पु० जेभा० खंभा० चूर्णौ च ॥



For Private And Personal Use Only

ननु एष व्यवहर्त्तव्यः? किं वा न? इति अत आह—

**सो वि हु ववहरियव्वो, अणवत्थावारणं तदन्ने य ।**
**घडगारतुल्लसीलो, अणुवर[1]रओसन्नमज्झम्मि ॥ २५ ॥**

'**सोऽपि**'अन्तरोक्तस्वरूपो द्रव्यव्यवहर्त्तव्यो **व्यवहर्त्तव्य एव,** किं कारणम्[2]? अत आह- '**अणवत्थावारणं तदन्ने य**' इति, तस्मिन् व्यवह्रियमाणे अनवस्थावारणं भवति, तदन्ये च निषिद्धा जायन्ते। किमुक्तं भवति? सोप्यनवस्थया मा पुनः पुनरकृत्यं कार्षीत्, तदन्ये च तं तथाप्रवर्त्तमानं दृष्ट्वा मा तथाप्रवृत्तिं कार्षुरिति। स च व्यवहर्तुमिष्यमाणः पूर्वमेव वक्तव्यः, यथा 'आलोचय महाभाग! स्वकृतमपराधम्,अनालोचिता-ऽप्रतिक्रान्तो हि दीर्घसंसारभाग्भवतीति।' एवं च स भण्यते यो ज्ञायते प्रतिपत्स्यते शिक्षावचनं, प्रतिपद्य चाकृत्यकरणाद् विरन्ता, विरम्य च न भूयः प्रतिसेवीति। यस्तु तथा भण्यमानोपि न सम्यगकृत्यकरणादुपरमते, सोऽनुपरतः **घटकारतुल्यशीलः** कुम्भकारसदृशस्वभावोऽ-

१. वरतुस्सणण॰ जेभा॰ खंभा॰ ॥ २. ॰म् ? इति अ॰ वा॰ पु॰ ॥

**वसन्नमध्ये** द्रष्टव्यः, न तु व्यवहर्त्तव्यः। अथ कोऽसौ कुम्भकारो यत्सदृश-स्वभावः सन् न व्यवहर्तव्यः? उच्यते—

कुंभकारसालाए साहू ठिया। तत्थ आयरिएण साहू वुत्ता-'अज्जो ! एएसुं कुंभगारभायणेसु अप्पमादी भवेज्जाह, मा भंजिहह। तत्थ पमादी चेल्लगो कुंभगारभायणं भंजिऊण 'मिच्छा मि दुक्कडं' भणइ, एवमभिक्खं दिणे दिणे । ततो सो कुंभगारो रुट्ठो, तं चेल्लगं कियाडियाए घेत्तुं सीसे खडुक्कं दाउं खडुक्को नाम-टोल्लतो मिच्छा दुक्कडं भणइ । चेल्लओ भणइ- 'किं ममं निरवराहं पिट्टेसि ? कुंभगारो भणइ- 'भाणगाणि तए भग्गाणि,' चेल्लओ भणइ,- 'मए मिच्छा दुक्कडं कयं' कुम्भकारो भणइ-'मए वि मिच्छा दुक्कडं कयं, नत्थि कम्मबंधो मम तव पहारं देंतस्स,' एसो कुंभगारमिच्छा-दुक्कडसरिसमिच्छादुक्कडो अव्ववहरियव्वो ॥ २५॥ तदेवं 'तहय आहच्च'[गा.२०]ति व्याख्यातम् ॥ २५ ॥

सम्प्रति 'पियधम्मे य बहुस्सुए' [गा.२०] इत्यस्य व्याख्यानमाह—

**पियधम्मा जाव सुयं, ववहारन्ना[१] उ जे समक्खाया ।**
**सव्वे वि जहोद्दिट्ठा, ववहरियव्वा य[२] ते होंति ॥ २६ ॥**

इह 'आद्यन्तग्रहणे मध्यस्यापि ग्रहणम्' इति न्यायात् **प्रियधर्म्म**बहुश्रुतग्रहणे तदन्तरालवर्त्तिनामपि दृढधर्म्मादीनां ग्रहणं, ततः प्रियधर्मण आरभ्य **यावत् श्रुतं** सूत्रार्थतदुभयविद इति पदं तावत् ये **व्यवहारज्ञा** व्यवहारपरिच्छेदकर्त्तारः प्राक् **समाख्यातास्ते सर्वेऽपि यथोद्दिष्टा** यथोक्तस्वरूपा **व्यवहर्त्तव्या** भावव्यहर्त्तव्या **भवन्ति,** प्रत्येतव्या इति शेषः, प्रियधर्म्मादितया सूत्रार्थतदुभयवित्तया च तेषां प्रज्ञापनीयत्वात्[३] ॥२६॥ इह द्विविधो व्यवहारः- प्रायश्चित्त[४]व्यवहार आभवत्सचित्तादिव्यवहारश्च तत्र द्विविधेऽपि व्यवहारे व्यवहर्त्तव्यं प्रायो गीतार्थेन सह, नाऽगीतार्थेन । तथा चाह—

**अ[५]गीएणं सद्धिं ववहरियव्वं न चेव पुरिसेण ।**
**जम्हा सो ववहारे, कयम्मि सम्मं न सद्दहति ॥ २७ ॥**

१. ०न्ना य जे - वा० पु० ॥ २. वि - वाभा० ॥ ३. ०त्वादिति ॥२६॥ व्यव० वा० मो० पु० ॥ ४. ०त्तलक्षण आ० खं० ॥ ५. नास्तीयं गाथा चूर्णौ ॥

इह यः स्वयं व्यवहारमवबुध्यते प्रतिपाद्यमानो वा प्रतिपद्यते व्यवहारं, स गीतार्थः, इतरस्त्वगीतार्थः। तत्र '**अगीतेन** अगीतार्थेन **सार्द्धं नैव पुरुषेण व्यवहर्त्तव्यम्**। कस्मात्? इत्याह- '**यस्मात् सः**' अगीतार्थो **व्यवहारे** यथोचिते **कृतेऽपि न सम्यक् श्रद्धत्ते** न परिपूर्णमपि व्यवहारं कृतं तथेति प्रतिपद्यते इति, तस्माद् गीतार्थेन सह व्यवहर्त्तव्यम् ॥ २७ ॥ यत आह—

**दुविहम्मि[1] वि ववहारे, गीयत्थो पच्चविज्जई[2] जं तु ।**
**तं सम्मं पडिवज्जइ, गीयत्थम्मी गुणा चेव ॥ २८ ॥**

'**द्विविधे**'ऽपि प्रायश्चित्तलक्षणे आभवत्सचित्तादिव्यवहारलक्षणे च '**व्यवहारे गीतार्थो यत्प्रत्याप्यते[3],**' पाठान्तरं '**पण्णविज्जइ**' प्रज्ञाप्यते '**तत्सम्यक् प्रतिपद्यते**' गीतार्थत्वात्।

---

१. नास्तीयं गाथा चूर्णौ ॥ २. पट्ठविज्जती-तिसृष्वपि भाष्यप्रतिषु ॥ पन्न( ण्ण.मु. ) विज्जइ मु. टीकानिर्दिष्टं पाठान्तरम् ॥ ३. प्रत्याख्याप्यते - मो० पु० मु० ॥

तथा चाह- '**गीयत्थम्मी गुणा चेव,**' गीतार्थे गुणा एव, नाऽगुणाः, अगुणवतो गीतार्थत्वाऽयोगात् ॥२८॥ यथा च [१]गीतार्थः सन् प्रत्याय्यमानः सम्यक् प्रतिपद्यते, तथा प्रतिपादयन्नाह—

**सच्चित्तादुप्पन्ने, गीयत्थाऽसइ दुवेण्ह गीयाणं ।**
**एगयरे [२]उ [३]नियत्ते, सम्मं ववहारसद्दहणा ॥ २९ ॥**

**गीतो अणाइयंतो, [४]छिंद तुमं चेव छंदितो संतो ।**
**कहमंतरम्मि[५] ठावे, तित्थयराणंतरं संघं ॥ ३० ॥**

दोण्णि जणा गीयत्था विणओवसंपयाए विहरंति, तेसिं सचित्ताइ किंचि उप्पन्नं, तन्निमित्तं ववहारो जातो। एगो भणइ- ममाऽऽभवति, बिइओ भणइ ममाऽऽभवइ। तत्थ य समीवे अन्नो गीयत्थो नत्थि, जस्स सगासे ग[६]च्छंति; ततो एगेण बिइओ भणितो- 'अज्जो! तुमं चेव ममं पमाणं, भणाहि कस्साऽऽभवति'? ततो सो एवं निउत्तो चिंतेइ- तित्थयराणंतरे

१. गीतार्थत्वात् प्र० वा० मो० पु० ॥ २. य-वा० ॥ ३. निउत्ते - वा० मो० पु० जेभा० खंभा० वाभा० मु० चूर्णौ च ॥ ४. छिंदि -खं० ॥ ५. ०म्मि छोछि ( ?च्छि ) ति तित्थ - जेभा. खंभा. ॥ ६. अच्छंति - खं० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संघे अहं ठवितो ता कहमहं तित्थयराणंतरं संघमइक्कमामि ?' त्ति भणइ- 'तुमं चेवाऽऽभवति, न ममं ति' एष भावार्थः ।

अक्षरयोजनात्वेवं- **सचित्तादावुत्पन्ने,**[1] आदिशब्दादचित्त-मिश्रपरिग्रहः, समासश्च कर्मधारयः। ततोऽयमर्थः- सचित्ते-शिष्ये, अचित्ते-वस्त्रादौ, मिश्रे-सोपकरणे शिष्ये उत्पन्ने सति **द्वयोः गीतार्थयोः** परस्परं विवदमानयोः अन्यस्मिन् समीपे व्यवहारपरिच्छेदकर्तरि[2] **गीतार्थेऽसति** कथमप्ये**कतरस्मिन्** गीतार्थतया निवृत्ते विवादात् प्रत्यावृत्ते **सम्यक्** प्रागुक्तनीत्या **व्यवहारश्रद्धानं** भवति, सम्यग् व्यवहारप्रतिपत्तिरुपजायते इत्यर्थः। कथम्? इत्यत आह- '**गीयो अणाइयंतो**' इत्यादि। गीतः-गीतार्थो 'अनतियन्' विवादादनतिक्रामन् द्वितीयेन गीतार्थेन सचित्ताद्युत्पादनसहवर्त्तिना व्यवहारममुं त्वमेव '**छिन्द्धि**', न हि त्वमगीतार्थो, नापि युक्तमयुक्तं वा त्वं न जानासि' इत्येवं '**छन्दितः**' निमन्त्रितः '**सन्**' चिन्तयति- अहमनेनाऽस्मिन् व्यवहारे प्रमाणीकुर्वता 'तीर्थकरानन्तरसङ्घमध्यवर्त्ती' स्थापितः, सङ्घश्च भगवदाज्ञावर्त्तितया यथावस्थितार्थवक्ता, अन्यथा तीर्थकरानन्तरत्वा-

१. °त्ताद्युत्पन्ने- वा° मो° पु° मु° ॥ २ °रपरिच्छेत्तरि - वा. पु° ॥



For Private And Personal Use Only

ऽयोगात्, तद् यदि लोभादितया कथमपि व्यवहारं [१]**विलोपामि** ततो मयैव तीर्थकरानन्तरः सन् सङ्घोऽन्तरितः कृतो भवेत्, तत एवं जानन् व्यवहारविलोपनेन **कथमहं तीर्थकरानन्तरं सङ्घम् अन्तरे स्थापयामि** अन्तरयामि? इति चिन्तयित्वा सोऽवादीत् 'तवैवेदमाभवति न ममेति', तस्मात् द्विविधो व्यवहारो गीतार्थेन सह कर्त्तव्यो नाऽगीतार्थेन, गीतार्थश्च प्रियधर्म्मत्वादिगुणोपेत इति प्रियधर्मादयो भावव्यवहर्त्तव्याः ।

ननु ये प्रियधर्म्मादयस्ते प्रियधर्म्मत्वादिगुणैरेवाकल्प्यं न किमपि प्रतिसेविष्यन्ते इति कथं व्यवहर्त्तव्या निर्दिश्यन्ते, व्यवहारहेत्वकल्प्यप्रतिसेवनाऽसम्भवात्। नैष दोषः, प्रमादवशतस्तेषामपि कदाचिदकल्प्यप्रतिसेवनोपपत्तेः। अन्यच्च प्रमादाऽभावेऽपि कदाचिदशिवाद्युत्पत्तौ गुरु-लाघवं पर्यालोच्य दीर्घसंयमस्फातिनिमित्तम-कल्प्यमपि प्रतिसेवन्ते, ततो भवति तेषामपि व्यवहारयोग्यतेति व्यवहर्तव्या निर्दिष्टाः ॥ २९-३० ॥ अथ ये प्रियधर्मादिगुणोपेता अपि प्रमादिनस्ते कथं व्यवह्रियन्ते? प्रमादितया तेषां व्यवहारयोग्यताया अभावात् तत आह—

१. विलोप्स्यामि - मो॰ मु॰ । लोप्स्यामि - वा॰ पु॰ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पियधम्मे दढधम्मे, संविग्गे चेव जे उ पडिवक्खा ।**
**ते वि हु ववहरियव्वा किं पुण जे तेसिं पडिवक्खा? ॥ ३१ ॥**

**प्रियधर्म्मणि दृढधर्म्मे संविग्ने च ये प्रतिपक्षा** अप्रियधर्म्मा अदृढधर्म्मा असंविग्नाश्च **तेऽप्यन**वस्थावारणाय तदन्यनिषेधाय च हुः निश्चितं **व्यवहर्त्तव्या** भगवद्भिरुक्ताः, **किं पुनर्ये तेषाम**प्रियधर्म्मादीनां **प्रतिपक्षाः** प्रियधर्म्म-दृढधर्म्म-संविग्नाः? ते सुतरां व्यवहर्त्तव्याः, प्रियधर्मादितया तेषां भावतो व्यवहारप्रवृत्तेः॥ ३१॥ तदेवं 'पियधम्मे य बहुसुए' [गा.२०] इत्येतद् व्याख्यातं,

सम्प्रति 'द्वितीयम्'[गा.२०] इत्यवयवं व्याचिख्यासुराह—

**बिइयमुवएस अवंकाइयाण जे होंति ऊ पडिवक्खा ।**
**ते वि हु ववहरियव्वा, पायच्छित्ताऽऽभवंते य॥ ३२ ॥**

**द्वितीयः उपदेश** आदेशः, मकारोऽलाक्षणिकः, द्वितीयं मतान्तरमित्यर्थः। **अवक्रादीनां ये भवन्ति प्रतिपक्षाः**- वक्रः कुटिलो निष्कारणप्रतिसेवी तथा सततप्रतिसेवनाशीलो-

P I LLLLLL



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ऽप्रियधर्मा यावदबहुश्रुत**स्तेऽपि** केचिद् व्यवहारयोग्यतया अपरेऽनवस्थावारणाय तदन्यनिषेधाय वा **आभवति प्रायश्चित्ते व्यवहर्त्तव्याः** ॥ ३२ ॥ सम्प्रति **'उवदेसपच्छित्तं'** [गा.२०] इत्येतत् व्याचिख्यासुराह—

**उवदेसो उ अगीए, दिज्जइ बिइओ उं[१] सोहिववहारो ।**
**गहिए विं[२] अं[३]णाभव्वे, दिज्जइ बिइयं तु पच्छित्तं ॥ ३३ ॥**

साधुर्द्विविधः- गीतार्थोऽगीतार्थश्च। तत्र यो गीतार्थः स स्वयमेव जानीते, जानानस्य च नोपदेशः। यस्त्वऽगीतार्थः स युक्ताऽयुक्तपरिज्ञान-विकलतयाऽनाभाव्यमपि गृह्णाति, ततस्तस्मै **'अगीताय'** अगीतार्थाय **उपदेशो दीयते,** यथा-'न युक्तं तवानाभाव्यं ग्रहीतुं, यो ह्यनाभाव्यं गृह्णाति तस्य तन्निमित्तं प्रायश्चित्तमाभवति'। एवमुपदिश्य तस्यानाभाव्यग्रहण-प्रवृत्तिनिमित्तं दानप्रायश्चित्तं दीयते, तथा चाह— **'बिइओ य सोहिववहारो'** शोधिः-प्रायश्चित्तम्। अनाभाव्यं गृह्णाति प्रथमत उपदेशो दीयते, द्वितीयः शोधिदानव्यवहारः।

---

**१. य - टीकानिर्दिष्टगाथावयवे ॥ २. व - जेभा॰ खंभा॰ । य वाभा॰ ॥ ३. अणाभावे - वा॰ मो॰ पु॰ ॥**



For Private And Personal Use Only

तदेतदनाभाव्यं गृह्णन्तं प्रति उक्तं, सम्प्रति गृहीताऽनाभाव्यं प्रत्याह- **'गहिए वी'**त्यादि अपिशब्दः समुच्चये, न केवलमनाभाव्ये गृह्यमाणे किन्तु गृहीतेऽ**प्यनाभाव्ये** दीयते प्रथमत उपदेश इति गम्यं, तदनन्तरं सूत्रमुच्चार्य प्रायश्चित्तं यथावस्थितं कथयित्वा 'एतत् तवाभवति प्रायश्चित्तम्' इति प्रथमं, ततो **दानप्रायश्चित्तं दीयते** इति **द्वितीयम्** ॥३३ ॥

अथ प्रायश्चित्तमिति कः शब्दार्थः ? कतिविधं प्रायश्चित्तम्? इति प्रश्नमुपजीव्य प्रायश्चित्तनिरुक्तादिद्वारकलापप्रतिपादनाय द्वारगाथामाह—

**पायच्छित्तनिरुत्तं१, भेया२ जत्तो[१] परूवणपुहुत्तं ३।**
**अज्झयणाण विसेसो४, तदरिहपरिसा य५ सुत्तत्थो६ ॥३४॥** दार गाहा।



प्रथमतः **प्रायश्चित्तनिरुक्तं** प्रायश्चित्तशब्दार्थो वक्तव्यः१। ततः प्रायश्चित्तस्य **भेदाः** प्रतिसेवनादयो वक्तव्याः२, तदनन्तरं **यतो** निमित्तात् **प्ररूपणापृथक्त्वं** प्ररूपणाबाहुल्यं, किमुक्तं भवति ? यतो निमित्तात् प्रतिसेवनातः संयोजनाप्रायश्चित्तम्, आरोपणाप्रायश्चित्तं,

---

१. चूर्ण्यनुसारेण 'जत्तो' इति तृतीयं द्वारम्, 'परूवणपुहुत्तं' इति चतुर्थम् ॥

परिकुञ्चनाप्रायश्चित्तं च पृथगुपपद्यते तद् वक्तव्यम्३। ततोऽध्ययनयोः **कल्पाध्ययन-व्यवहाराध्ययनयोर्विशेषः** नानात्वं वक्तव्यम् ४। तदनन्तरं **तदर्हा** प्रायश्चित्तार्हा **परिषद्** वाच्या ५। ततः **सूत्रार्थः६**। एष द्वारगाथासंक्षेपार्थः, व्यासार्थं तु प्रतिद्वारं वक्ष्यति ॥ ३४ ॥

तत्र निरुक्तद्वारप्रतिपादनार्थमाह—

**पावं छिंदइ जम्हा, पायच्छित्तं तु भन्नए तेण ।**
**पाएण वा वि चित्तं, विसोहए तेण पच्छित्तं ॥ ३५ ॥** दारं १।

**यस्मात्** शोधिरूपो व्यवहारोऽपराधसञ्चितं **पापं छिनत्ति**-विनाशयति, **तेन** कारणेन **प्रायश्चित्तं भण्यते,** पृषोदरादित्वादिष्टरूपनिष्पत्तिः[1], अथवा **प्रायेण** प्रायोऽपराधमलिनं **चित्तं** जीवम्, अत्र चित्तशब्देन चित्त-चित्तवतोरभेदोपचाराद् जीवोऽभिधीयते, तथा चाह **चूर्णिकृत्**- 'चित्त इति जीवस्याऽऽख्या' इति **विशोधय**ति अपराधमलरहितं करोति **तेन** कारणेन **प्रायश्चित्तं,** 'प्रायः' प्रायेण चित्तं यथावस्थितं भवत्यस्मादिति प्रायश्चित्तमिति व्युत्पत्तेः॥ ३५ ॥ गतं निरुक्तद्वारमिदानीं भेदद्वारप्रतिपादनार्थमाह-

१. °रूपसिद्धिः- वा° मो° पु° ॥

**पडिसेवणा१ य संजोयणा२ य, आरोवणा३ य बोधव्वा।**
**पलिउंचणा४ चउत्थी, पायच्छित्तं चउद्धा उ ॥ ३६ ॥**

प्रतिषिद्धस्य[1] सेवना '**प्रतिषेवणा,**' अकल्प्यसमाचरणमिति भावः१। **चः** समुच्चये, संयोजनं '**संयोजना**' शय्यातर-राजपिण्डादिभेदभिन्नाऽपराधजनित-प्रायश्चित्तानां संकलनीकरणम् २। आरोप्यते इति '**आरोपणा**' प्रायश्चित्तानामुपर्युपर्यारोपणं यावत् षण्मासाः, परतो **वर्द्धमान**स्वामितीर्थे आरोपणायाः प्रतिषेधात् ३। परिकुञ्चनं '**परिकुञ्चना**' गुरुदोषस्य मायया लघुदोषस्य कथनं, यथा सचित्तं प्रतिषेव्य मया अचित्तं प्रतिषेवितमित्याह इति। एषा प्रतिसेवनात आरभ्य गण्यमाना **चतुर्थी** ४। एवमेतत् **प्रायश्चित्तं चतुर्द्धा** भवति ॥ ३६ ॥

तत्र 'यथोद्देशं निर्देश' इति न्यायात् प्रथमतः प्रतिषेवणोच्यते । सा च प्रतिषेवणा प्रतिषेवक-प्रतिषेव्यव्यतिरेकेण नोपपद्यते, सकर्मकक्रियायाः कर्तृकर्म्मव्यतिरेकेणाऽसम्भवात्। ततस्त्रयाणामपि प्ररूपणां चिकीर्षुरिदमाह—

---

१. ॰स्यासेवना- खं॰ ॥

**पडिसेवओ१ य पडिसेवणा२ य पडिसेवियव्वयं३ चेव ।**
**एएसिं तु पयाणं, पत्तेय परूवणं वोच्छं ॥ ३७ ॥**

प्रतिषिद्धं सेवते इति **प्रतिसेवकः**, प्रतिसेवनक्रियाकारी। **चः** समुच्चये, **प्रतिसेवणा** अकल्प्यसमाचरणम् २। **प्रतिसेवितव्यम्** अकल्पनीयम्३। **एतेषां** त्रयाणामपि **पदानां प्रत्येकं प्ररूपणां वक्ष्ये** ॥ ३७ ॥ प्रतिज्ञातमेव निर्वाहयति—

**[१]पडिसेवओ सेवंतो, पडिसेवण मूलउत्तरगुणे य ।**
**पडिसेवियव्वं दव्वं, रूवि व्व सिया अरूवि व्व ॥ ३८ ॥**



**प्रतिसेवको** नामाऽकल्प्यं **प्रतिसेवमानः**। **प्रतिसेवना** अकल्प्यसमाचरणम्। सा च द्विधा- '**मूल-उत्तरगुणे य**' इति, गुणशब्दः प्रत्येकमभिसम्बध्यते-मूलगुणविषया उत्तरगुणविषया च । यच्च कार्यं समाचर्यमाणं मूलगुणप्रतिघाति उत्तरगुणप्रतिघाति वा तत् **प्रतिसेवितव्यं,** तच्च द्रव्यं पर्याया वा । तत्र पर्याया द्रव्ये एवान्तर्भूता विवक्षिताः, भेदाभावादिति द्रव्यं द्रष्टव्यम् । तथा चाह-**द्रव्यम्।** तच्च स्यात् कदाचित् **रूपि**

---

१. **पडिसेवग - वाभा॰ ॥**

आधाकर्म्माद्योदनादि, **वा** विकल्पे, **अरूपि वा**-आकाशादि । तदपि हि मृषावादादिविषयतया भवति कदाचित् प्रतिसेवनीयम् ॥ ३८ ॥ इह प्रतिसेवनामन्तरेण न प्रतिसेवकस्य सिद्धिः नापि प्रतिसेवनीयस्य, ततः प्रतिसेवनीया विशेषतः प्ररूपणामाह—

**पडिसेवणा उ भावो, सो पुण कुसलो व्व होज्जऽकुसलो वा ।**
**कुसलेण होइ कप्पो, अकुसलपरिणामतो दप्पो ॥ ३९ ॥**

प्रतिषेवणा द्विविधा- द्रव्यरूपा भावरूपा च, प्रतिषेवणक्रियायाः कर्त्तृकर्म्मगतत्वात् । तत्र या तस्य तस्य वस्तुनः प्रतिषेव्यमानता सा द्रव्यरूपा प्रतिषेवणा, यस्तु जीवस्य तथा तथा प्रतिषेवकत्वपरिणामः सा भावरूपा प्रतिषेवणा, सैवं[1] चेह ग्राह्या, जीवपरिणामानुरूप्यतः प्रायश्चित्तविधिप्रवृत्तेः। तथा चाह— **पडिसेवणा उ भावो** प्रतिषेवणा नाम, तुः एवकारार्थो भिन्नक्रमश्च, भाव एव जीवस्याऽध्यवसाय एव, नान्या। **स च** भावो द्विधा- **कुशलोऽकुशलश्च**। तत्र कुशलो ज्ञानादिरूपः,अकुशलोऽविरत्यादिरूपः। तत्र या **कुशलेन** परिणामेन बाह्यवस्तुप्रतिषेवणा सा **कल्पः**, 'पदैकदेशे पदसमुदायोपचारात्'

१. °वेह° वा° पु° ॥

कल्पप्रतिषेवणा, कल्पिका इति भावः। या पुनर**कुशलपरिणामतः** प्रतिषेवणा सा **दर्प्पः**, दर्प्पप्रतिषेवणा दर्प्पिका इत्यर्थः ॥ ३९॥

आह-किमेषां त्रयाणामपि परस्परमेकत्वं नानात्वं वा? उच्यते-उभयमपि। कथमित्यत आह—

**नाणी ण विणा नाणं, नेयं पुण तेसऽणण्णमण्णं च ।**
**इय दोण्हमणाणत्तं, भइयं पुण सेवियव्वेण ॥ ४० ॥**

यथा **ज्ञानं विना** अन्तरेण **ज्ञानी न** भवति, ज्ञानपरिणामपरिणततयैव ज्ञानित्वव्यपदेशभावादिति तयोःज्ञानज्ञानिनोरेकत्वम्। **इय दोण्हमणाणत्तं**ति, इति एवं ज्ञान-ज्ञानिगतेन प्रकारेण द्वयोः प्रतिषेवक-प्रतिषेवणयोः अनानात्वम् एकत्वं, प्रतिषेवनामन्तरेण प्रतिषेवकस्याप्यभावात्, प्रतिषेवणापरिणामपरिणतावेव प्रतिषेवकत्वव्यपदेशप्रवृत्तेः। **णेयं पुणं तेसऽणण्णमन्नं च** इति, पुनः शब्दो विशेषद्योतने, स चामुं विशेषं द्योतयति- न ज्ञान-ज्ञानिनोः परस्परमिव ज्ञेयेनापि सह एकत्वं किन्तु ज्ञेयं तयोर्ज्ञानज्ञानिनोर**नन्यद् अन्यच्च**। किमुक्तं भवति?— ज्ञानिनो ज्ञानाच्च ज्ञेयं किञ्चिदन्यत्

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किञ्चिदनन्यत्। तथाहि–यदा ज्ञानी आत्मालम्बनज्ञान–परिणामपरिणतस्तदा ज्ञान(ज्ञेय) ज्ञानिनोरेकत्वं, यदा त्वात्मव्यतिरिक्तघटाद्यालम्बनज्ञान–परिणामपरिणतस्तदाऽन्यत्वम्, आत्मनो घटादीनामन्यत्वात्। ज्ञानमपि यदाऽऽभिनिबोधिकादिस्वरूपालम्बनं तदा ज्ञान-ज्ञेययोरेकत्वं, यदा तु स्वव्यतिरिक्तघटाद्यालम्बनं तदाऽन्यत्वं, घटादीनां ज्ञानात् मूर्त्ताऽमूर्त्ततया पृथग्देशादितया च भिन्नत्वात् । '**भइयं पुण सेवियव्वेण**' अत्रापि 'इति' इत्यनुवर्तते, इति उक्तेन प्रकारेण प्रतिषेवक–प्रतिषेवणयोरनानात्वं, भक्तं विकल्पितं, पुन-र्नानात्वं **सेवितव्येन** प्रतिषेवितव्येन, कदाचिदनानात्वं कदाचिन्नानात्वमित्यर्थः। तथाहि–यदा प्रतिषेवको हस्तकर्मादि प्रतिसेवते, तदा प्रतिषेवक–प्रतिसेवितव्ययोरेकत्वं, यदा पुनः प्रमत्ततया [1]कीटिकादिसत्त्वव्यापादनादि प्रतिसेवते तदा नानात्वं, कीटिकादिसत्त्वानां साधोः पृथग्भूतत्वात् । प्रतिसेवना तु यदा प्रतिसेव्यमानता तदा सा प्रतिसेवितव्याद–नन्यैवेति प्रतिसेवना–प्रतिसेवितव्ययोरेकत्वनानात्वचिन्ता नोपपद्यते। अथ प्रतिसेवना प्रतिसेवक-स्याध्यवसायः स तर्हि यदाऽऽत्मव्यापादनविषयस्तदा प्रतिसेवनाप्रतिसेवक(व्य)योरेकत्वं, यदा तु बाह्यस्त्र्यादिप्रतिसेवनाविषयः तदा नानात्वं, स्त्र्यादेः प्रतिसेवकाद(नाया)न्यत्वात् ॥४०॥ सम्प्रति यत्प्रागमूलोत्तरगुणविषयतया प्रतिसेवनाया द्वैविध्यमुक्तं, [2]तद्विभाषयितुमाह—



---

१. कीटका॰ वा॰ मो॰ पु॰ मु॰ ॥ २. विभावयिषुराह – वा॰ मो॰ पु॰ मु॰ ॥

For Private And Personal Use Only

**मूलगुण उत्तरगुणे, दुविहा पडिसेवणा समासेण ।**
**मूलगुणे पंचविहा, पिंडविसोहाइया इयरा ॥ ४१ ॥**

प्रतिसेवना **समासेन** सङ्क्षेपेण द्विधा। तद्यथा-'**मूलगुणे**' मूलगुणविषया '**उत्तरगुणे**' उत्तरगुणविषया। तत्र **मूलगुण**विषया **पञ्चविधा** प्राणातिपात-मृषावादा-ऽदत्तादान-मैथुन-परिग्रहरूपा। **इतरा** उत्तरगुणविषया **पिण्ड-विशुद्ध्यादि**विषया अनेकविधा, अत्राऽऽ-दिशब्दात् समित्यादिपरिग्रहः, किमुक्तं भवति?-मूलगुणेषु प्राणातिपातविरत्यादिषु उत्तरगुणेषु पिण्डविशुद्ध्यादिषु यथाक्रमं प्रतिसेवना प्राणातिपातादिलक्षणा पञ्चविधा, आधाकर्मोप-भोगादिलक्षणा अनेकविधेति ॥४१॥ तत्र मूलगुणप्रतिसेवना संरम्भादिभेदतस्त्रिधा उत्तरगुण-प्रतिसेवना त्वतिक्रमादिभेदतश्चतुःप्रकारास्तथा चाह—

**सा पुण अइक्कमवइक्कमे य, अइयार तह अणायारे ।**
**संरंभ समारंभे, आरंभे रागदोसादी ॥ ४२ ॥**

सा उत्तरगुणप्रतिसेवना **पुनरतिक्रमे व्यतिक्रमे अतिचारे अनाचारे** च भवति।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एतदुक्तं 'भवति सर्वाप्युत्तरगुणप्रतिसेवना अतिक्रमादिभेदतश्चतुष्प्रकारा, मूलगुणप्रतिसेवना **संरम्भे समारम्भे आरम्भे** च, संरम्भादिभेदतस्त्रि-प्रकारेति भावार्थः। ते च संरम्भादयो **रागद्वेषादितः** रागतो द्वेषतः, आदिशब्दादज्ञानतश्च। तत्र रागतो यथा **चिलातीपुत्रस्य** [1]सुसुमावधः, द्वेषतो यथा **सात्यकेर्द्वै**पायन[2]व्यापादनम्, अज्ञानतो ब्राह्मणादीनां छागादिवधः। ननु 'यथोद्देशस्तथा निर्देश' इति प्रथमतो मूलगुणप्रतिसेवना व्याख्यातुमुचिता पश्चादुत्तरगुणप्रतिसेवना, अत्र तु विपर्यय इति कथम् ? उच्यते इह प्रायः प्रथम[3]तोऽल्पसंक्लिष्टाऽध्यवसायः, स तूत्तरगुणप्रतिसेवनां कुरुते, पश्चादतिसंक्लिष्टाध्यवसायो मूलगुणप्रतिसेवनामिति ख्यापनार्थं विपर्ययेणोपन्यास इत्यदोषः ॥ ४२ ॥ **साम्प्रतम्** अतिक्रमादीन् पिण्डविशुद्धिमधिकृत्य व्याचिख्यासुराह—

**[4]आहाकम्मनिमंतण, पडिसुणमाणे अतिक्कमो होइ ।**
**पयभेयाइ वइक्कम, गहिए [5]तइएतरो गिलिए ॥ ४३ ॥**

---

१. सूसुमा॰ वा॰ मो॰ पु॰ मु॰ ॥ २. ॰ नस्य च व्या॰ खं॰ ॥ ३. मतः स्वल्प॰ खं॰ ॥ ४. आधाकम्मामंतण - तिसृष्वपि भाष्यप्रतिषु चूर्णौ च ॥ ५. ततिओऽवरो गि॰ वाभा॰ ॥



For Private And Personal Use Only

कोऽपि श्राद्धो नालप्रतिबद्धो ज्ञातिप्रतिबद्धो गुणानुरक्तो वा **आधाकर्म्म** निष्पाद्य **निमन्त्रयति**, यथा- 'भगवन्! युष्मन्निमित्तमस्मद्गृहे सिद्धमन्नमास्ते इति समागत्य प्रतिगृह्यतामित्यादि', तत् **प्रतिशृण्वति** अभ्युपगच्छति **अतिक्रमो** नाम दोषो **भवति**, स च तावत् यावदुपयोगपरिसमाप्तिः। किमुक्तं भवति?- यत् प्रतिशृणोति, प्रतिश्रवणानन्तरं चोत्तिष्ठति, पात्राण्युद्गृह्णाति उद्गृह्य च गुरोः समीपमागत्योपयोगं करोति, एष समस्तोपि व्यापारोऽतिक्रमः। उपयोगपरिसमाप्त्यनन्तरं च यदाधाकर्म्मग्रहणाय **पदभेदं** करोति, **आदि**शब्दाद् मार्गे गच्छति, गृहं प्रविशति, आधाकर्म्मग्रहणाय पात्रं प्रसारयति, न चाऽद्यापि प्रतिगृह्णाति, एष सर्वोपि व्यापारो व्यतिक्रमः, **गहिए तइओ**त्ति आधाकर्म्मणि गृहीते उपलक्षणमेतत्, यावद्वसतौ स[1]मानीते, गुरुसमक्षमालोचिते, भोजनार्थमुपस्थापिते, मुखे प्रक्षिप्यमाणेऽपि यावन्नाऽद्यापि गिलति तावत् तृतीयः अतिचारलक्षणो दोषः, **गिलिते** त्वाधाकर्म्मण्यनाचारः। एवं सर्वेष्वप्यौद्देशिकादिषु भावनीयम् ॥ ४३ ॥ अत्रैव प्रायश्चित्तविधिमाह—

१. समायाति गु॰ खं॰ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तिन्नि यं[1] गुरुगा मासा, विसेसिया तिण्ह चउगुरू अंते ।**
**एए चेव य लहुया, विसोहिकोडीए पच्छित्ता ॥ ४४ ॥**

त्रयाणामतिक्रम-व्यतिक्रमो[2]ऽतिचाराणां **त्रयो गुरुका मासाः**। कथम्भूता? इत्याह-**विशेषिताः** तपः-कालविशेषिताः, किमुक्तं भवति? अतिक्रमेऽपि मासगुरुः, व्यतिक्रमेऽपि मासगुरुः, अतीचारेऽपि मासगुरुः। एते च **त्रयोऽपि** यथोत्तरं तपः-कालविशेषिताः । तथा **अन्ते** अनाचारलक्षणे दोषे **चतुर्गुरुः** चतुर्मासगुरुप्रायश्चित्तम्। **एते** च मासगुर्वादयः प्रायश्चित्तभेदा अतिक्रमादिष्वविशोधिकोट्यां द्रष्टव्याः। **विशोधिकोट्यां त्वेत एव** मासादयो **लघुकाः प्रायश्चित्तानि,** तद्यथा— अतिक्रमे मासलघु , व्यतिक्रमेऽपि मासलघु, अतिचारेऽपि मासलघु , नवरमेते यथोत्तरं तपः- कालविशेषिताः, अनाचारे चतुर्म्मासलघु ॥ ४४ ॥ 'मूलगुणे पञ्चविधा प्रतिसेवना' इति यदुक्तं [गा.४१] तत्र पञ्चविधत्वं दर्शयति—

---

१. उ. वाभा॰ चूर्णौ च ॥ २. ॰मातीचारा॰ वा॰मो॰पु॰॥



For Private And Personal Use Only

**पाणिवह-मुसावाए अदत्त-मेहुण-परिग्गहे चेव ।**
**मूलगुणे पंचविहा, परूवणा तस्सिमा होइ ॥ ४५ ॥**

**प्राणिवधः** त्रस-स्थावरप्राणिहिंसा। **मृषावादः** भूतोपघातिवचः। **अदत्तादानं** स्वामि-गुर्वननुज्ञातग्रहणम्, **मैथुनं** स्त्रीसेवा। **परिग्रहः** स च बाह्याऽभ्यन्तरवस्तुषु मूर्च्छा। सर्वत्र एकारान्तता प्राकृतलक्षणवशात्। **मूलगुणे** मूलगुणविषया **पञ्चविधा** प्रतिसेवना। **तस्याश्च** पञ्चविधायाः प्रतिसेवनायाः संरम्भादिभेदतः प्रतिभेदं त्रिरूपाया **इयं** वक्ष्यमाणा **प्ररूपणा** संरम्भादिव्याख्यानरूपा भवति ॥४५॥ तामेव दर्शयति—



**संकप्पो संरंभो परितावकरो भवे समारंभो ।**
**आरंभो उद्दवओ, सव्वनयाणं पि सुद्धाणं ॥ ४६ ॥**

प्राणातिपातं करोमीति यः **संकल्पो**ऽध्यवसायः स **संरम्भः**। यस्तु परस्य **परितापकरो** व्यापारः स **समारम्भः**, **अपद्रावयतो** जीवितात्परं व्यपरोपयतो व्यापारः

१. पाणवह० वा० मो० जेभा० खंभा०॥ २. प्राणवधः - मु० ॥ ३ ० सारंभो-जेमा० खंभा०॥

आरम्भः। आह च **चूर्णिकृत्-पाणाइवायं करोमीति जो संकप्पं करेइ चिंतयतीत्यर्थः स संरंभे वट्टइ, परितावणं करेइ समारंभे वट्टइ, उद्दवेइ आरम्भे वट्टइ** इति । एतच्च संरम्भादित्रितयं[1] **सर्वनयानामपि शुद्धानां** सम्मतम्, अथवा 'सुद्धाणं' इत्यत्र प्राकृतत्वात् पूर्वस्याकारस्य लोपो द्रष्टव्यः, ततोऽयमर्थः- **सर्वनयानामप्यशुद्धाना**मेतत् संरम्भादि त्रितयं सम्मतं, न तु शुद्धानामिति ॥ ४६ ॥ अथ के नयाः शुद्धाः? के वाऽशुद्धाः? इति शुद्धा-ऽशुद्धनयप्रतिपादनार्थमाह—

**सव्वे वि होंति सुद्धा, नत्थि असुद्धो नयो उ सट्ठाणे ।**
**पुव्वा व पच्छिमाणं[2] सुद्धा न उ पच्छिमा तेसिं ॥ ४७ ॥**

नयाः सप्त तद्यथा- नैगमः१ संग्रहो२ व्यवहारः३ ऋजुसूत्रः४ शब्दः५ समभिरूढ ६ एवम्भूत, इति। एते च **सर्वेऽपि नयाः स्वस्थाने** निजनिजवक्तव्यतायां '**शुद्धाः**', नास्ति स कश्चिन्नयो यः स्ववक्तव्यतायामप्य**शुद्धः**, सर्वेषामपि परिपूर्णस्ववक्तव्यता-

१ ॰म्भादित्रयं -वा॰॥ २. ॰माण उ सु॰ वा॰ मो॰ पु॰ मु॰ जेभा॰ खंभा॰ ॥

ऽभ्युपगमपरत्वात्[१] । उक्तं च- "**निययवयणिज्ज-सच्चा सव्वनया परवियालणे मोहा**" [**सन्मति.१-२८**]यद्यप्येतदस्ति तथापि नैतत् प्रस्तुतोपयोगि, सर्वनयानां संरम्भादित्रितयाऽनभ्युपगमात् । ततः प्रकारान्तरेण शुद्धाऽशुद्धनयप्ररूपणामाह- '**पुव्वा व**' इत्यादि, पूर्व्वाः आदिमाः 'वा'शब्दः प्रागुक्तपक्षाऽपेक्षया पक्षान्तरताद्योतनार्थः, **पश्चिमानां चतुर्णाम्** ऋजसूत्रादीनां नयानां ये नैगम-संग्रह-व्यवहाररूपास्त्रयस्ते '**शुद्धाः**' शोधयन्ति कर्म्ममलिनं जीवमिति शुद्धाः, शुधेरन्तर्भूतण्यर्थात् क्तप्रत्ययः । **न उ पच्छिमा तेसिं** ति न तु ये तेषामादिमानां नैगमादीनां पश्चिमा ऋजुसूत्रादयस्ते शुद्धाः, अनुयायिद्रव्याऽनभ्युपगमतस्तेषां विशोधकत्वाऽयोगात् ॥ ४७ ॥

कथं पुनराद्यास्त्रयो नयाः शुद्धाः ? इत्यत आह—

**[२]वेणइए मिच्छत्तं ववहारनया उ जं विसोहिंति ।**
**तम्हा तेच्चिय सुद्धा, भइयव्वं होइ इयरेहिं ॥ ४८ ॥**

'**वैनयिको**' नाम मिथ्यादृष्टिः, तस्मिन् यद् **मिथ्यात्वं तद्** व्यवहारप्रधाना नया



१. ॰गमात्-वा॰पु॰ ॥ २. तिसृष्वपि भाष्यप्रतिषु "संकप्पादितितयं" गाथा (५०) इतः पूर्वमुपलभ्यते ॥

**व्यवहारनया एव** तुरेवकारार्थः। नैगम-संग्रह-व्यवहाराः **शोधयन्ति** अपनयन्ति। ते ह्यनुयायिद्रव्याऽभ्युपगमपराः, ततः कृतकर्म्मफलोपभोगोपपत्तेः सद्धर्म्मदेशनादौ प्रवृत्तियोगतो भवति तात्त्विकी शुद्धिः, **तस्मात्त एव शुद्धाः, भइयव्वं होइ इयरेहिं**ति, इतरैः ऋजुसूत्रादिभिर्नयैर्मिथ्यात्वशोधिमधिकृत्य भजनीयं, न शुद्ध्यतीति भावः । ते हि पर्यायमात्रमभ्युपगच्छन्ति, पर्यायाणां च परस्परमात्यन्तिकं भेदं, ततः कृतविप्रणाशादि-दोषप्रसङ्गः। तथाहि-मनुष्येण कृतं कर्म्म किल देवो भुङ्क्ते, मनुष्यावस्थातश्च देवावस्था भिन्ना, ततो मनुष्यकृतकर्म्मविप्रणाशः, मनुष्येण सता तस्योपभोगाऽभावात्; देवस्य च फलोपभोगेऽकृताभ्यागमः, देवेन सता तस्य कर्म्मणोऽकरणात्। कृतविप्रणाशादिदोषपरिज्ञाने च न कोऽपि धर्म्मश्रवणे अनुष्ठाने वा प्रवर्त्तते[१], इति मिथ्यात्वशुद्ध्यभावः, तदभावाच्च न ते शुद्धा इति॥४८॥ एतदेव स्पष्टतरं विभावयिषुराह—

**ववहारनयस्साऽऽया कम्मं काउं फलं समणुहोइ ।**
**इय वेणइए कहणं, विसेसणे मा हु मिच्छत्तं ॥ ४९ ॥**

१. प्रवर्तेत - मो० वा० मु० ॥

व्यवहारप्रधानो नयो **व्यवहारनयः**, तस्य मतेन **आत्मा** शुभमशुभं वा **कर्म्म कृत्वा** तस्य **फलं** भवान्तरे **समनुभवति,** अनुयायिद्रव्याऽभ्युपगमात्। **इति** एतस्मात्कारणा**द्वैनयिके** मिथ्यादृष्टौ मिथ्यात्वाऽपगमाय **कथनं** सद्धर्म्मोपदेशः, तत्परिणतौ च मिथ्यात्वापगम इति मिथ्यात्वशोधकत्वात् ते त्रयोऽपि व्यवहारनयाः शुद्धाः । **विसेसणे मा हु मिच्छत्तं** इति, विशिष्यते-परस्परं पर्यायजातं भिन्नतया व्यवस्थाप्यते अनेनेति विशेषणं-ऋजुसूत्रादिनयः, तस्मिन् प्ररूप्यमाणे कृतविप्रणाशादिदोषाशङ्कातोऽधिकतरं मा जन्तवो मिथ्यात्वं यासुरिति[१], नैतन्मतानुसारेण वैनयिके सद्धर्मदेशनाप्रवृत्तिः, तदभावाच्च न मिथ्यात्वशुद्धिरिति न ते शुद्धाः ॥ ४९ ॥ सम्प्रति द्वितीयव्याख्यानमधिकृत्य शुद्धाऽशुद्धनयप्ररूपणां क्रियते- नैगम-संग्रह-व्यवहाररूपा आदिमास्त्रयो नया[२] न शुद्धाः, व्यवहाराभ्युगमपरत्वात् । उपरितनास्तु चत्वारः शुद्धाः, नैश्चयिकत्वात्। तदेतत् शुद्धाऽशुद्धनयलक्षणमधिकृत्य यत्प्राग् द्वितीयं व्याख्यानं कृतं तच्च 'सव्वनयाणं असुद्धाणं' [गा.४६]इति' ॥ तत्प्रदर्शयन्नाह—



१. ०ति न तन्म० वा० मो० मु० ॥ २. नया अशुद्धाः, व्यवहारा ( रम मु. )भ्युपगम० वा० मो० पु० मु० ॥

[१]संकप्[२]पाईतितयं, अविसुद्धाणं तु होइ उ नयाणं ।
इयरे बाहिरवत्थुं, नेच्छंताऽऽया जतो हिंसा ॥ ५० ॥

इह सङ्कल्पशब्देन संरम्भ उपलक्ष्यते, पर्यायत्वात्, ततः **सङ्कल्पादित्रितयम्** इति कोऽर्थः? संरम्भादित्रितयं संरम्भसमारम्भाऽऽरम्भलक्षणम् **अविशुद्धानामेव 'तुः'** एवकारार्थः, **भवति नयानां** मतेन ज्ञातव्यमिति शेषः, व्यवहारपरतया तेषां मतेन त्रितयस्यापि सम्भवात्। **'इतरे'** शुद्धा ऋजुसूत्रादयो हिंसाविचारप्रक्रमे **'बाह्यं वस्तु नेच्छन्ति'**, नाऽभ्युपगच्छन्ति, न बाह्यवस्तुगतां हिंसामनुमन्यन्ते इति भावः। यतस्तन्मतेन आत्मैव तथाध्यवसायपरिकलितो हिंसा, न बाह्यमनुष्यादिपर्यायविनाशम्, **आया चेव उ हिंसा** [ओघनि. गा.७५५] इति वचनात्। ततः संरम्भ एव हिंसा, न समारम्भो नाप्यारम्भ इति न शुद्धनयानां संरम्भादित्रितयम् ॥५०॥ साम्प्रतमस्यामेव 'सा पुण अतिक्कमे' [गा. ४२] इत्यादिकायां गाथायां यद् मूलोत्तरगुणप्रतिसे[३]वनयोर्विपर्ययेणोपन्यसनमकारि तत्र कारणमाक्षेपपुरस्सरमुपन्यस्यन्नाह—



---

१. गाथेयं तिसृष्वपि भाष्यप्रतिषु "वेणइए मिच्छत्तं" (४८) गाथायाः पूर्वमुपलभ्यते॥ २. ॰प्पादीतियं-जेभा॰ वा॰ मो॰ ॥ ३. ॰वनाया विप॰ वा॰ भो॰ पु॰ मु॰ ॥

[1]चोएइ किमुत्तरगुणा पुव्वं ? बहुअ-थोवग-लहुयं च ।
अतिसंकिलिट्ठभावो, मूलगुणे सेवते[2] पच्छा ॥ ५१ ॥

'**चोदयति**' प्रश्नयति शिष्यः, यथा- **किमुत्तरगुणा** उत्तरगुणप्रतिसेवना **पूर्व**मुक्ता? 'यथोद्देशं निर्देश' इति न्यायाद्धि पूर्वं मूलगुणप्रतिसेवना वक्तुमुचितेति भावः। अत्रोत्तरमाह- **बहवः** उत्तरगुणाः, **स्तोका** मूलगुणाः, तथा '**लघु**' शीघ्रमुत्तरगुणानां **सेवकः** प्रतिसेवकः, ततो **ऽतिसंक्लिष्टभावः** सन् **पश्चात् मूलगुणान् सेवते** प्रतिसेवते इति ख्यापनार्थं विपर्ययेणोपन्यासः ॥ ५१ ॥ इह प्रायश्चित्तं [3]मुख्यवृत्त्या विशोधिः, तथा च-अपराधं विधाय विशुद्धमनसो गुरुसमक्षं वदन्ति- 'भगवन्! अमुकस्याऽपराधस्य प्रयच्छत प्रायश्चित्तमिति'। कदाचित् प्रतिसेवनाप्युपचारात् प्रायश्चित्तं, तथा च-अपराधे कृते वक्तारो भवन्ति 'समापतितमस्माकमद्य प्रायश्चित्तमिति' ॥ ५१ ॥ तत्र यथोपचारतः प्रतिसेवना प्रायश्चित्त-मुच्यते, तथोपपादयन्नाह—



---

१. नास्तीयं गाथा चूर्णौ। चोएइ किमुत्तरगुणा ? पुव्वं बहुधा अ सेवग लहुं वा - वा॰ मो॰ पु॰ ॥ २. सेवओ - जेभा॰ खंभा॰ ॥ ३. मुख्यतया वि॰ वा॰ पु॰ ॥

**पडिसेवियंमि[1] दिज्जइ, पच्छित्तं इहरहा[2] उ पडिसेहो ।**
**तेण पडिसेवण च्चिय, पच्छित्तं तं चिमं दसहा ॥ ५२ ॥**

**'प्रतिसेविते'** प्रतिषिद्धे सेविते यस्मात् **प्रायश्चित्तं दीयते, इतरथा** प्रतिषिद्धासेवनमन्तरेण **प्रतिषेधः** प्रायश्चित्तस्य। **ततः** प्रतिसेवना प्रायश्चित्तस्य निमित्तमिति 'कारणे कार्योपचारात्' **प्रतिसेवनैव प्रायश्चित्तम्।** तच्च प्रतिसेवनारूपं प्रायश्चित्त**मिदं दशधा** दशप्रकारम् ॥ ५२ ॥ तामेव दशप्रकारतामुपदर्शयति—

**आलोयण१ पडिकमणे२, मीस३ विवेगे४ तहा वि उस्सग्गे५ ।**
**तव६छेय७ मूल८अणवट्ठुया[3]९य पारंचिए१० चेव ॥ ५३ ॥**

आङ् मर्यादायां, सा च मर्यादा इयं—

*जह बालो जंपंतो, कज्जमकज्जं च उज्जुयं भणइ ।*
*तं तह आलोएज्जा मायामयविप्पमुक्को उ ॥ १ ॥* [मरणसमाधि गा. १३३६]

१. नास्तीयं गाथा चूर्णौ ॥ २. इतरहा-जेभा० ॥ ३. अणवट्ठिया वा० मो० पु०॥

अनया मर्यादया 'लोकृ-दर्शने' चुरादित्वात् णिच्, लोकनं लोचना-प्रकटीकरणं, **आलोचना**-गुरोः पुरतो वचसा प्रकटीकरणमिति भावः। यत् प्रायश्चित्तमालोचनामात्रेण शुद्ध्यति तदालोचनार्हतया 'कारणे कार्योपचारात्'आलोचनम् १। तथा '**प्रतिक्रमणं**' दोषात् प्रतिनिवर्त्तनम्, अपुनःकरणतया मिथ्यादुष्कृतप्रदानमित्यर्थः, तदर्हं प्रायश्चित्तमपि प्रतिक्रमणं, किमुक्तं भवति? यत् प्रायश्चित्तं मिथ्यादुष्कृतमात्रेणैव शुद्धिमासादयति, न[1] तु गुरुसमक्षमालोच्यते, यथा सहसाऽनुपयोगतः श्लेष्मादि-प्रक्षेपादुपजातं प्रायश्चित्तं, तथाहि-सहसाऽनुपयुक्तेन यदि श्लेष्मादि प्रक्षिप्तं भवति, न च हिंसादिकं दोषमापन्नः, तर्हि गुरुसमक्षमालोचनामन्तरेणापि मिथ्यादुष्कृतप्रदानमात्रेण स शुध्यति, तत् प्रतिक्रमणार्हत्वात् प्रतिक्रमणम् २। यस्मिन् पुनः प्रतिसेविते प्रायश्चित्ते यदि गुरुसमक्षमालोचयति, आलोच्य च गुरुसन्दिष्टः प्रतिक्रामति पश्चाच्च मिथ्यादुष्कृतमिति ब्रूते तदा शुद्ध्यति, तद् आलोचना-प्रतिक्रमणलक्षणोभयार्हत्वात् **मिश्रम्** ३। तथा '**विवेकः**' परित्यागः, यत् प्रायश्चित्तं विवेक

१. न च गु॰ वा. मो. पु. मु. ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



एव कृते शुद्धिमासादयति, नान्यथा, यथाऽऽधाकर्म्मणि गृहीते, तद् विवेकार्हत्वात् विवेकः४। **तथा व्युत्सर्गः** कायचेष्टानिरोधः, यद् व्युत्सर्गेण-कायचेष्टानिरोधोपयोगमात्रेण शुद्ध्यति प्रायश्चित्तं, यथा-दुःस्वप्नजनितं, तद् व्युत्सर्गाऽर्हत्वाद् व्युत्सर्गः ५। '**तव**त्ति' यस्मिन् प्रतिसेविते निर्विकृतिकादि-षण्मासपर्यवसानं तपो दीयते, तत् तपोऽर्हत्वात् तपः ६। यस्मिन् पुनरापतिते प्रायश्चित्ते सन्दूषितपूर्वपर्यायदेशावच्छेदः शेषपर्यायरक्षानिमित्तं दुष्टव्याधिसन्दूषितशरीरैकदेशच्छेदनमिव शेषशरीरावयवपरिपालनाय क्रियते, तत् छेदार्हत्वात् **छेदः** ७। '**मूल**त्ति' यस्मिन् समापतिते प्रायश्चित्ते निरवशेषपर्यायोच्छेदमाधाय भूयो महाव्रतारोपणं तद् मूलार्हत्वान् मूलम् ८। येन पुनः प्रतिसेवितेनोत्थापनाया अप्ययोग्यः सन् कञ्चित्कालं न व्रतेषु स्थाप्यते यावन्नाद्यापि प्रतिविशिष्टं तपश्चीर्णं भवति, पश्चाच्च चीर्णतपास्तद्दोषोपरतो व्रतेषु स्थाप्यते तदनवस्थतार्हत्वाद**नव**स्थताप्रायश्चित्तम् ९। '**पारंचिए चेव**त्ति' 'अञ्चू गतौ च', यस्मिन् प्रतिसेविते लिङ्ग-क्षेत्र-काल-तपसां पारमञ्चति, तत् पाराञ्चितमर्हतीति पाराञ्चितम् १०। एष संक्षेपार्थः ॥५३॥ विस्तरार्थं तु प्रतिद्वारम् **भाष्यकृ**देव वक्ष्यति तत्र प्रथमद्वारम् 'आलोचना' इति विवरिषुरिदमाह—



For Private And Personal Use Only

**[१]आलोयणत्ति का पुण? कस्स सगासे व होइ कायव्वा? ।**
**केसु व कज्जेसु भवे? गमणाऽऽगमणादिएसुं तु ॥ ५४॥**

**का** किंस्वरूपा **पुनरालोचना?** इति प्रथमतः प्रतिपाद्यं, तदनन्तरं **कस्य सकाशे** समीपे **भवति कर्तव्याऽऽ**लोचना? इति वाच्यम्। तथा **केषु कार्येषु भवत्या**लोचना? तत्र प्रतिपत्तिलाघवाय सङ्क्षेपतोऽत्रैव निर्वचनमाह— **गमनाऽऽगमनादिकेषु** गमने आगमने, आदिशब्दात् शय्या-संस्तारक-वस्त्र-पात्र-पादप्रोञ्छनकग्रहणादिपरिग्रहः। **तुशब्दः** विशेषणे, स चैतद् विशिनष्टि- गमनाऽऽगमनादिष्ववश्यकर्त्तव्येषु सम्यगुपयुक्तस्याऽदुष्ट-भावतया निरतिचारस्य छद्मस्थस्याऽप्रमत्तस्य यतेरालोचना भवतीति । आह— यानि नामाऽवश्यकर्त्तव्यानि गमनाऽऽगमनादीनि तेषु सम्यगुपयुक्तस्याऽदुष्टभावतया निरतिचारस्याऽप्रमत्तस्य किमालोचनया? तामन्तरेणापि तस्य शुद्धत्वात्, यथासूत्रं प्रवृत्तेः, सत्यमेतत्, केवलं याश्चेष्टानिमित्ताः सूक्ष्मप्रमादनिमित्ता वा सूक्ष्मा आश्रवक्रियास्ता आलोचनामात्रेण शुद्ध्यन्तीति तच्छुद्धिनिमित्तमालोचना। उक्तं च—

१. नास्तीयं गाथा चूर्णौ ॥

*जया उवउत्तो निरइयारो य करेइ, करणीज्जा य ते जोगा, तत्थ का विसोही आलोइए अणालोइए वा? ॥ १ ॥ गुरु भणइ-तत्थ जा चिट्ठानिमित्ता वा सुहुमपमायनिमित्ता वा सुहुमा आसवकिरिया ताओ सुज्झंति आलोयणामित्तेणं* ति ॥ ५४ ॥

तत्र का नामाऽऽलोचना? इति यत् प्रथमं द्वारं तत् सुप्रसिद्धत्वादन्यत्र वा **कल्पा**ऽध्ययनादिषु व्याख्याततत्वादिह **भाष्य**कृता न व्याख्यातं, तथापि स्थानाऽशून्यार्थं किञ्चिदुच्यते- आलोचना नाम अवश्यकरणीयस्य कार्यस्य पूर्वं वा कार्यसमाप्तेरूर्ध्वं वा यदि वा पूर्वमपि पश्चादपि च गुरोः पुरतो वचसा प्रकटीकरणम्। सा चाऽऽलोचना उपरितनेषु प्रायश्चित्तेषु केषुचित् सम्भवति केषुचिन्न सम्भवति तत्र येषु सम्भवति तत्प्रसिद्ध्यर्थमिदमाह—

**बिइए नत्थि वियडणा, वा उ विवेगे तहा विउस्सग्गे ।**
**आलोयणा उ[1] नियमा, गीयमगीये य[2] केसिंचि ॥ ५५ ॥**

गाथा ५४-५५ आलोचना-स्वरूपम्

द्वितीयं- सूत्रक्रमप्रामाण्याऽनुसरणात् प्रतिक्रमणं, तस्मिन् **द्वितीये** प्रतिक्रमणलक्षणे

१. य - वा० ॥ २. वा-वा० मो० पु० ॥



For Private And Personal Use Only

प्रायश्चित्ते **नास्ति विकटना** आलोचना, तथाहि- सहसाऽनाभोगतो वा यदा किञ्चिदाचरितं भवति, यथा मनोज्ञेषु शब्दादिष्विन्द्रियगोचरमागतेषु रागगमनम्, अमनोज्ञेषु द्वेषगमनं, तदा तदनन्तरमेव 'मिथ्या दुष्कृतम्' इति ब्रूते, तच्च तेनैव शुद्धिं यातीति नाऽऽलोचयति। **वा उ विवेगित्ति** वाशब्दो विभाषायां विवेके विवेकाऽर्हे प्रायश्चित्ते आलोचनाया[१] विभाषा, कदाचिद् भवति कदाचिन्न भवतीति भावः। तथाहि-तद् विवेकाऽर्हं नाम प्रायश्चित्तं यत् परिस्थापनया शुद्ध्यति, तत्र यदकल्पिकमाधाकर्म्मिकादि-पूर्वमविदितत्वेन गृहीतं, पश्चाच्च कथमपि ज्ञातं, तद् यदा परिस्थापयतः शुभभावनाऽध्यारोहे केवलज्ञानमुत्पद्यते तदाऽसौ कृतकृत्यो जात इति नाऽऽलोचयति, अनुत्पन्ने तु ज्ञानाऽतिशये नियमादागत्य गुरुसमीपमालोचयतीति। '**तहा विउस्सग्गे**' त्ति यथा विवेके आलोचनाया विभाषा तथा व्युत्सर्गेऽपि। किमुक्तं भवति?— व्युत्सर्गेऽपि कदाचिदालोचना भवति कदाचिद् न भवति, यथा-स्वप्ने हिंसादिकमासेवितं, तच्छुद्धिनिमित्तं च कायोत्सर्ग्गः कृतः, तदनन्तरं च शुभभावनाप्रकर्षतः केवलज्ञानमुदपादि मरणं वा तस्याऽऽकस्मिकमुपजातमिति नास्त्यालोचना; अनुत्पन्ने ज्ञाने जीवन् नियमादावश्यके[२] विकटयन् आलोचयति यथा स्वप्ने मया हिंसादिकमासेवितं कायोत्सर्गेण च शोधितमिति ।

१. चनायां - मु० ॥ २. श्यकं वि० वा० मो० पु० ॥

गतमालोचनेति द्वारम्-अधुना 'कस्य सकाशे आलोचना कर्तव्या?' [गा.५४] इतिद्वारं विवरीषुराह सा **आलोयणा उ** इत्यादि। सा आलोचना **नियमाद**वश्यन्तया 'गीतमिति' प्राकृतत्वात् षठ्यर्थे प्रथमा, तस्य गीतार्थस्य सकाशे कर्तव्या, नाऽगीतार्थस्य। अत्रैव मतान्तरमाह- **'अगीए य केसिं चि' केषाञ्चि**दाचार्याणामिदं मतम्-उत्सर्गतस्तावदाचार्यस्य समीपे आलोचयितव्यं, यदा पुनराचार्यः संज्ञादिप्रयोजनगतो भवति तदा अगीतार्थस्यापि समीपे **भिक्षाद्या**लोचनीयमिति ॥ ५५ ॥ तच्चालोचनाऽर्हप्रायश्चित्तमेतेषु स्थानेषु भवति—

**करणिज्जेसु उं[१] जोगेसु, छउमत्थस्स भिक्खुणो ।**
**आलोयणपच्छित्तं, गुरूणं अंतिए सिया ॥ ५६ ॥**

करणीया नाम अवश्यकर्त्तव्याः **योगाः**-श्रुतोपदिष्टाः संयमहेतवः क्रियाः। अथवा योगाः- मनोवाक्काय-व्यापाराः।

१. य - खं० ॥

*'जोगो विरियं थामो, उच्छाह परक्कमो तहा[1] चेट्ठा ।*
*सत्ती सामत्थं चिय जोगस्स हवंति पज्जाया ॥ १ ॥'* [पञ्चसंग्रह गा. ३९६]

इतिवचनात् । ते चाऽवश्यकर्त्तव्या इमे-कूर्म्म इव वसतौ संलीनगात्रः सुप्रणिहितपाणिपादोऽवतिष्ठते, वचनमपि सत्यमसत्यामृषं वा ब्रूते, नाऽसत्यम्, नापि सत्यामृषेति, मनसोप्यकुशलस्य निरोधनं कुशलस्योदीरणम्, एवंरूपेषु **करणीयेषु** योगेषु सम्यगुपयुक्तस्य निरतिचारस्येति वाक्यशेषः, सातिचारस्योपरितनप्रायश्चित्तसम्भवात्। **छद्मस्थस्य** परोक्षज्ञानिनः, न तु केवलज्ञानिनः, तस्य कृतकृत्यत्वेनाऽऽलोचनाया अयोगात्, उक्तं च- **छउमत्थस्स हवइ आलोयणा, न केवलिणो** [**व्यवहार-चूर्णा**-वस्मिन्नेव स्थाने] इति । तथा सूत्रोक्तेन प्रकारेण भिक्षते इत्येवंशीलो भिक्षुस्तस्य यते**रालोचना प्रायश्चित्तं** स्यात्, तदपि च '**गुरूणामन्तिके**' समीपे नाऽन्येषामिति ॥५६॥ इह 'करणीया योगाः' इति सामान्येनोक्तम्। अधुना नामग्राहं करणीययोगप्रतिपादनार्थमाह—

गाथा ५६-५७ प्रायश्चित्त-स्थानानि

---

१. तहा दिट्ठा- वा॰ मो॰ पु॰ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भिक्ख-वियार-विहारे, अण्णेसु यं[1] एवमाइकज्जेसु ।
अविगडियंमि अविणतो, होज्ज असुद्धे व परिभोगो ॥ ५७ ॥

**भिक्षायां विचारे विहारे अन्येष्वपि चैवमादिकेषु कार्येषु** आलोचना-प्रायश्चित्तं भवतीति वर्त्तते; इयमत्र भावना-गुरुमापृच्छ्य गुरुणानुज्ञातः सन् श्रुतोपदेशेनोपयुक्तः स्वयोग्यभिक्षा-वस्त्र-पात्र-शय्या-संस्तारक-पादप्रोञ्छनादि यदि वा आचार्योपाध्याय-स्थविर-बाल-ग्लान-शैक्षक-क्षपका[2]ऽसमर्थप्रायोग्य-वस्त्र-पात्र-भक्त-पानौषध्यादि गृहीत्वा समागतः। विचारः- उच्चारभूमिस्तस्माद्वा समागतः। [3]विहारः वसतावस्वाध्याये स्वाध्यायमकृत्वा वसतेरन्यत्रगमनं, ततः एवमादिग्रहणाच्चैत्यवन्दननिमित्तं पूर्वगृहीतपीठ-फलक-शय्यासंस्तारप्रत्यर्प्पणनिमित्तं वा, बहुश्रुताऽपूर्वसंविग्नानां वन्दनप्रत्ययं वा, संशयव्यवच्छेदाय वा, श्राद्धस्व[4]ज्ञातिका-ऽवषण्णवि[5]हारिणामवबोधाय वा, साधर्मिकाणां वा संयमोत्साहनिमित्तं हस्तशतात् परं दूरमासन्नं वा गत्वा समागतः यद्यपि नास्ति

१. वि - वाभा० ॥ २. कादिसमस्तप्रा० खं० ॥ ३. ''विहारे वसहीए असज्झाइमे सज्झायं अण्णत्थ काउं आगतो ''इति चूर्णौ ॥ ४. स्वजात्यवस० वा० पु० स्वज्ञात्यवस० मो० स्यज्ञात्यवषण्ण० मु० ॥ ५. ०विहाराणा० वा० मो० पु० मु० ॥



For Private And Personal Use Only

कश्चिदतीचारस्तथापि यथाविधि गुरुसमक्षमालोचयितव्यम्, अन्यथा सूक्ष्मचेष्टा-निमित्तानां सूक्ष्मप्रमादनिमित्तानां वा क्रियाणां शुद्ध्यभावात्। अन्यच्च निरतिचारोपि यदि गुरोः समक्षं नाऽऽलोचयति, ततोऽविनयो भवति, अशुद्ध[:] परिभोगो वा; तथा चाह— '**अविकटिते**' अनालोचित्ते **अविनयो** वा **अशुद्धो वा परिभोगो भवेत्** । आलोचिते तूभयदोषाऽभावः। नन्वविनयदोषाभावः स्यात्, अशुद्धपरिभोगाऽभावः कथम्? उच्यते- केनापि साधुना भिक्षा प्रचुरा सत्कार-पुरस्सरा लब्धा, तस्य शङ्कितमुपजातं, किं नामेयं भिक्षा शुद्धाऽशुद्धा वा? तत्र यद्यनालोच्य भुङ्क्ते ततोऽशुद्धपरिभोगो भवति, तेन चाऽऽलोचितम्, आचार्येण पृष्टम्- 'अन्यदिवसेषु तस्मिन् गृहे कीदृशी भिक्षा अलभ्यत? कियन्तो वा भोजनकारिणः? प्राघूर्णका वा केप्यागताः? संखडी वा जाताः?' इत्यादि विभाषा। एवं च पृष्टे तेन यथावस्थितं कथितं, तत आचार्येण ज्ञाता शुद्धा अशुद्धा वा, तस्मादालोचयितव्यम् ॥ ५७॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अन्नं च छाउमत्थो, तहऽन्नहा वा हवेज्ज उवओगो ।**
**आलोएंतो ऊहइ, सोउं च वियाणइ सोया ॥ ५८ ॥**

**अन्यच्च** किञ्चान्यद् इत्यर्थः। '**छाद्मस्थिकः**' सामान्यसाधुगत **उपयोगः तथा** यथावस्थितवस्त्वनुसारी **अन्यथा वा** विपरीतो **भवेत्**; आचार्यस्तु[१] मति-मेधा-धारणादिगुणसमन्विततया बहुश्रुततया चाऽतिशयज्ञानी, ततः शङ्कितमालोचिते निःशङ्कितं करोति, तथा यद्यपि गृह्णतः शङ्कितमुपजातं तथापि कदाचिद् **आलोचयन्** स्वप्रज्ञयापि **ऊहते** शुद्धमशुद्धं वा स्वयमेव जानाति। यदि वा तदीयामालोचनां **श्रुत्वा श्रोता**ऽप्याचार्यादिकः पूर्वोक्तेन प्रकारेण, यदि वा आचार्यादिकस्य पार्श्वे बहवो लोकाः समागच्छन्ति, बहुभ्यश्च बहु[२] शृण्वन् कदाचित्तमपि विषयं लोकतः श्रुत्वा **जानाति** शुद्धमशुद्धं वा, तस्मादालोचयितव्यम्॥ ५८॥ यदुक्तं— गुरूणं अंतिए सिया'' [गा. ५६] इति तत्र स्यादित्यस्य व्याख्यानमाह—

---

**१. आचार्यस्त्वतिमेधा॰ वा॰ पु॰ ॥ २. बहुराश्च शृ॰ खं॰ ॥**



For Private And Personal Use Only

**आसंकमवहियम्मि य, होइ सिया अवहिए तहिं पगयं ।**
**गणतत्तिविप्पमुक्के, विक्खेवे वा वि आसंका ॥ ५९ ॥**

**स्याच्छब्द आसंक**मिति प्राकृतत्वादाशङ्कायाम**वधृते** चाऽर्थे, आशङ्का नाम-विभाषा, यथा स्यादिति कोऽर्थः? कदाचिद् भवेत् कदाचिद् न भवेत् अवधृतं नाम-अवधारणम्। तत्र तयोर्द्वयोरर्थयोर्मध्ये **अवधृते** अवधारणे **प्रकृत**मधिकारः, अवधारणार्थोऽत्र स्याच्छब्दः इति भावः। ततोऽयमर्थः गुरूणामन्तिके नियमादालोचना । यदि वा आशङ्कायामपि प्रकृतं, तत्राऽयमर्थः— गुरूणामन्तिके स्यात् तावदालोचना । यदि पुनराचार्यो गणतप्तिविप्रमुक्तो भवति, ततस्तस्मिन् **गणतप्तिविप्रमुक्ते** उपाध्यायस्य समीपे आलोचना, अथोपाध्यायस्याऽपि कुलादिकार्यैः श्राद्धादि- कथनैर्वा व्याक्षेपस्ततो अन्यस्य गीतार्थस्य, तदभावे अगीतार्थस्य समीपे आलोचयितव्यम्॥५९॥ गतमालोचनाऽर्हं प्रायश्चित्तम्। इदानीं प्रतिक्रमणार्हमभिधित्सुराह—

**गुत्तीसु य समिईसु य, पडिरूवजोगे तहा पसत्थे य ।**
**वइक्कमे अणाभोगे, पायच्छित्तं पडिक्कमणं ॥ ६० ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुप्तयस्तिस्त्रः, तद्यथा-मनोगुप्तिः वचनगुप्तिः कायगुप्तिश्च, तासु। समितयः पञ्च तद्यथा-ईर्यासमितिः भाषासमितिः एषणासमितिः आदानभाण्डमात्र-निक्षेपणासमितिः उच्चार-प्रश्रवण-खेल-सिङ्घाण-जल्ल-परिस्थापनिकासमितिश्च। एतासु च सहसाकारतोऽनाभोगतो वा कथमपि प्रमादे सतीति वाक्यशेषः, **प्रायश्चित्तं प्रतिक्रमणं** मिथ्यादुष्कृतप्रदानलक्षणम्। इयमत्र भावना-सहसाकारतोऽनाभोगतो वा यदि मनसा दुश्चिन्तितं, वचसा दुर्भाषितं, कायेन दुश्चेष्टितं, तथा ईर्यायां यदि कथां कथयन् व्रजेत्, भाषायामपि यदि गृहस्थभाषया ढड्डरस्वरेण वा भाषेत, एषणायां भक्त-पान-गवेषणवेलायामनुपयुक्तः, भाण्डोपकरणस्याऽऽदाने निक्षेपे चाऽप्रमार्जयिता, अप्रत्युपेक्षिते स्थण्डिले उच्चारादीनां परिष्ठापयिता, न च हिंसादोषमापन्नः, उपलक्षणमेतत्, तेन यदि कन्दर्पो वा हासो वा, स्त्री-भक्त-चौर-जनपदकथा वा तथा क्रोध-मान-माया-लोभेषु गमनं, विषयेषु वा शब्द-रूप-रस-गन्ध-स्पर्शलक्षणेष्वनुष्वङ्गः, सहसा-ऽनाभोगतो वा कृतः स्यात्, तत एतेषु सर्वेषु स्थानेषु मिथ्यादुष्कृतप्रदानलक्षणं प्रायश्चित्तमिति। तथा '**प्रतिरूपयोगे**' प्रतिरूपविनयात्मके व्यापारे, **तथा प्रशस्तो** यो यत्र करणीयो व्यापारः स तत्र प्रशस्तः- **इच्छा-मिच्छा**



For Private And Personal Use Only

[**स्था**नाङ्ग सूत्र स्था. १० उ. ३ सूत्र ७४९ पत्र ३९९-४०१। **भ**गवती सूत्र श. २५ उ७ सू. ८०० पत्र ९२०]इत्यादि:, तस्मिन्नपि चाऽक्रियमाणे '**प्रायश्चित्तं प्रतिक्रमणम्,**' इह प्रतिरूपग्रहणं ज्ञानादिविनयोपलक्षणं, ततोऽयमर्थः-ज्ञान-दर्शनचारित्रप्रतिरूपलक्षणचतुष्प्रकार-विनयाऽकरणे, इच्छा-मिथ्या-तथाकारादिप्रशस्तयोगाऽकरणे, उपलक्षणमेतत्, आचार्यादिषु मनसा प्रद्वेषादिकरणे, वाचा अन्तरभाषादिकृतौ, कायेन पुरो गमनादौ प्रतिक्रमणं प्रायश्चित्तम्। तथा उत्तरगुणप्रतिसेवनायां **वइक्कमे** इति मर्यादाकथनं, तेनाऽतिक्रमे व्यतिक्रमे च प्राग्व्याख्यातस्वरूपे, तथा अनाभोगादकृत्यप्रतिसेवने मिथ्यादुष्कृतप्रदानात्मकं प्रतिक्रमणं प्रायश्चित्तमिति गाथासमासार्थः ॥ ६०॥ व्यासार्थं तु **भाष्य**कृद् व्याचिख्यासुः प्रथमतो 'गुत्तीसु य समिईसु य' इति व्याख्यानयति—

**केवलमेव अगुत्तो सहसाऽणाभोगतो व अप्पहिंसा ।**
**तहियं तु पडिक्कमणं, आउट्टि तवो न वा दाणं ॥ ६१ ॥**

एवकारो भिन्नक्रमः, **अगुप्त एव** गुप्तिरहित एव **केवलम्,** उपलक्षणमेतत्, तेन

समितिरहित एव केवलमित्यपि द्रष्टव्यम्। केवलग्रहणमगुप्तत्वमसमितत्वं वैकं केवलं, नत्वगुप्तत्वा-ऽसमितत्वप्रत्ययं प्राणिव्यापादनमापन्न इति प्रतिपादनार्थम् । तथा चाह— **अप्पहिंसा,** अल्पशब्दो अभाववाची, अल्पा नैव काचन प्राणिनो हिंसा अभवदिति शेषः। कथमगुप्तोऽसमितो वा? इत्यत आह- '**सहसा**' पदैकदेशे पदसमुदायोपचारात् सहसाकारतो**ऽनाभोगतो वा**। तत्र सहसाकारो नाम—

*'पुव्वं अपासिऊणं, छूढे पाए कुलिंगयं[१] पासे।*

*न य तरइ नियत्तेउं, जोगं सहसाकरणमेयं ॥ १॥* [तुला. निशीथ भाष्य गा. ९७]

इत्येवंरूपः, अनाभोगः विस्मृतिः। **तहियं तु पडिक्कमण**मिति तत्र सहसाकारतो-ऽनाभोगतो वा केवल एवाऽगुप्तत्वे असमितत्वे च सति प्रायश्चित्तं प्रतिक्रमणम्, यदि पुनः **आउट्टि**त्ति उपेत्य अगुप्तत्वमसमितत्वं वा करोति तदा तत्र प्रायश्चित्तं तपोऽर्हं, **न वा दानं** तपस इति गम्यते, कथमदानम्? इतिचेत्, उच्यते -यदि स्थविरकल्पिका उपेत्याऽगुप्तत्वम-समितत्वं वा मनसा[२] आपन्नास्ततस्तपोर्हं प्रायश्चित्तं तेषां न भवति, गच्छनिर्गतानां तु

---

१. कुलिंगए - वा० मो० पु० ॥ २. ०सा समापन्ना० वा० मो० पु० मु० ॥

मनसाप्यापन्नानां चतुर्गुरुकं प्रायश्चित्तमिति॥ ६१ ॥ तदेवं 'गुप्तिषु च समितिषु च' इति व्याख्यातमिदानीं प्रतिरूपयोगपद[गा.६०]व्याख्यानार्थमाह—

**पडिरूवग्गहणेणं, विणओ खलु सूइओ चउविगप्पो ।**[1]
**नाणे१ दंसण२ चरणे३ पडिरूव ४चउत्थओ होइ ॥ ६२॥**

**प्रतिरूपग्रहणेन** प्रतिरूपशब्दोपादानेन **चतुर्विकल्पः** चतुष्प्रकारः **खलु विनयः सूचितः**। चतुष्प्रकारत्वमेव दर्शयति- **ज्ञाने** ज्ञानविषयः, **एवं दर्शने** दर्शनविषयः, **चरणे** चरणविषयश्चतुर्थः **प्रतिरूपको** विनयो भवति ॥ ६२ ॥ तत्र ज्ञानविनयोऽष्टप्रकारः तामेवाष्टप्रकारतां कथयति—

**काले१ विणए२ बहुमाणे,३ उवहाणे ४ तह अनिण्हवणे५ ।**
**वंजण६अत्थ७तदुभए८ अट्ठविहो नाणविणतो उ ॥ ६३ ॥**

[दसवै. नि.८८ अ.चू.]

१. इत आरभ्य गाथाचतुष्कं (६५ गाथा पर्यन्तं) नोपलभ्यते चूर्णौ ॥

यो यस्याऽङ्गप्रविष्टादेः श्रुतस्य **काल** उक्तस्तस्य तस्मिन्नेव स्वाध्यायः कर्त्तव्यः, नान्यदा, तीर्थकरवचनात्। दृष्टं च कृष्यादेः कालकरणे फलं, विपर्यये विपर्ययः। अत्रोदाहरणं-

एगो साहू पादोसियं कालं घेत्तुं अतिक्कंताए वि पढमपोरिसीए अणुवओगेण पढइ कालियसुयं। सम्मद्दिट्ठी देवया चिंतेइ - 'मा णं पंतदेवया छलिज्ज'त्ति काउं तक्कघडं[1] घेत्तूणं 'तक्कं तक्कं' ति भणंती तस्स पुरतो गयाऽऽगयाइं करेइ। तेण य 'मे सज्झायस्य वाघायं करेइ'त्ति भणिया 'अयाणिए[2]! को इमो तक्कस्स विक्कयणकालो वेलं ता पलोएह,' तीए वि भणियं-'अहो! को इमो कालियसुयस्स सज्झायकालो?'त्ति ततो साहू 'न एसा पगति'त्ति उवउत्तो। नाओ अड्डरत्तो, दिन्नं मिच्छा दुक्कडं। देवयाए भणियं-'मा एवं करेज्जासि, मा पंतो छलेज्जा' ततो काले सज्झाइयव्वं, न तु अकाले इति।

---

१. तक्ककुडं- वा० मो० पु० दसवै० अगस्त्यसिंहचूर्णौ पृ. ५१ । तक्कं कुंडे- दशवै. हारिभद्रीटीका पृ. ६॥ २. अणयाणिए - खं. ॥

तथा श्रुतश्रवणं कुर्वता गुरोर्**विनयः** कर्त्तव्यः। विनयो नाम - अभ्युत्थानपादधावनादि। अविनयगृहीतं हि श्रुतमफलं भवति, एत्थ उदाहरणं-

सेणिओ राया भज्जाए भन्नति-'ममेगखंभपासायं करेह' तेण वड्ढइ आणत्तो, गया कट्ठछिंदगा। तेहिं अडवीए सलक्खणो महइमहालयो दुमो दिट्ठो। धूवो दिण्णो- 'जेणेस परिग्गहितो रुक्खो सो दरिसावेउ अप्पाणं, तो न छिंदामो, अह न देइ दरिसावं तो छिंदामो'त्ति ताहे तेण रुक्खवासिणा वाणमंतरेण अभयस्स दरिसावो दिण्णो- 'भो! अहं रण्णो एगखंभं पासायं करेमि, सव्वोउयं च आरामं सव्ववणजातिउववेयं, 'मा छिंदह एयं वणरुक्खं, जतो मम आवासस्स उवरिं एस चूलाकप्पो'त्ति एवं तेण कतो पासादो । अन्नया एगाए मायंगीए अगाले अंबगाण दोहलो जातो। सा भत्तारं भणइ- 'मम अंबयाणि आणेह'। तया य अगालो अंबगाणं। तेण **ओणामिणी**ए विज्जाए डाला ओणामिया। अंबगाणि गहियाणि। पुणो वि **उन्नामिणी**ए उन्नामिया। पभाए रन्ना दिट्ठं, पयं न दीसइ, को एस मणूसो अतिगतो? जस्स एरिसी सत्ती, सो मम अंतेउरं पि धरिसेहिइ त्ति काउं **अभयं** सद्दाविऊण भणइ— 'सत्तरत्तस्स अब्भंत्तरे जइ चोरं नाऽऽणेसि तो ते नत्थि जीवियं' । ताहे

अभओ गतो, गवेसिउमाढत्तो। नवरं एगम्मि पएसे एगो नडो नच्चिउकामो। लोगो मिलितो। तत्थ गंतुं अभओ भणइ— 'जाव एसो नडो अप्पाणं मंडेइ ताव ममेगं अक्खाणगं सुणेह। जहा-

कम्हि नगरे एगो दरिद्दसेट्ठी परिवसइ । तस्स धूया वड्डुकुमारी अतीव रूवस्सिणी य। सा वरत्थिणी **का**मदेवं अच्चेइ। सा य एगम्मि आरामे चोरियाए पुप्फाणि उच्चिणेइ। आरामिणा दिट्ठा। कड्ढिउमाढत्ता। तीए सो भणितो— 'मा मइं कुमारिं विणासेहि, तवावि भगिणी भागिणिज्जिओ अत्थि। तेण भणिया-'एक्कहा ते मुयामि, जइ नवरं जम्मि दिवसे परिणिज्जसि, तद्दिवसं चेव भत्तारेण अणुग्घाडिया समाणि मम सगासं एहिसि ।' तीए भणियं— 'एवं भवउ' त्ति । तेण विसज्जिया। अण्णया परिणीया । जाहे अपवरकं पवेसिया ताहे भत्तारस्स सब्भावं कहेइ। विसज्जिया 'वच्चसु' त्ति। पट्ठिया आरामं। अंतरा य चोरिहिं गहिया। तेसिं पि सब्भावो कहितो। मुक्का, गच्छंतीए अंतरा रक्खसो दिट्ठो। जो छण्हं मासाणं आहारेइ, तेण गहिया। सब्भावे कहिए मुक्का। आरामियस्स सगासं गया। तेण दिट्ठा सो ससंभंतो भणइ- 'कहमागयासि?' ताए भणियं— 'मए कतो सो पुव्विं समओ'

सो भणइ— 'कहं भत्तारेण मुक्का ?' ताहे तस्स तं सव्वं कहियं। 'अहो! सच्चपइन्ना एसा महिल' त्ति। एत्तिएहिं मुक्का, कहमहं द्रुहामि?' त्ति तेण विमुक्का। पडिनियत्ता सव्वेसिं तेसिं मज्झेण आगया। तेहिं सव्वेहिं मुक्का भत्तारसगासमाभरणसमग्गा गया।

ताहे अभओ तं जणं पुच्छइ— 'अक्खह, एत्थ केण दुक्करं कयं?' ताहे ईसालुया भणंति- 'भत्तारेणं' छुहालुया भणंति- 'रक्खसेणं' । परदारिगा भणंति- 'मालाकारेणं' । हरिकेसेण भणियं- 'चोरेहिं' । पच्छा सो गहितो, जहा- एसो चोरोत्ति । ततो सेणियस्स उवणीतो। पुच्छिएण सब्भावो कहितो। ताहे रन्ना भणियं— 'जइ नवरं एयातो विज्जाओ देसि तो न मारेमि' । 'देमि' त्ति अब्भुवगते, आसणे ठितो पढइ, न ठाइ, राया भणइ- 'किं न ठाइ' ? मायंगो भणइ- 'जहा अविणएण पढसि, अहं भूमिए, तुमं आसणे,' । ततो सेणिओ नीययरे आसणे ठितो। इयरो महति महालए ठविओ । ततो ठियातो सिद्धाओ य विज्जाओ त्ति। एवं विणएण अहिज्जियव्वं, नो अविणएणं २।

तथा श्रुतग्रहणोद्यतेन गुरौ **बहुमानः** कर्त्तव्यः, बहुमानो नाम-आन्तरो भावप्रतिबन्धः। एतस्मिन् सति अक्षेपेण अधिकफलं श्रुतं भवति। विणय-बहुमाणेसु चउभंगो, एगस्स

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विणओ न बहुमाणो१ अवरस्स बहुमाणो न विणओ२ अण्णस्स विणओ वि बहुमाणो वि३ अन्नस्स न विणओ न बहुमाणो ४। एत्थ दोण्ह वि विसेसपदंसणत्थं इमं उदाहरणं-

एगम्मि गिरिकंदरे **सिवो**। तं च बंभणो पुलिंदो य अच्चेइ। बंभणो उवलेवण-सम्मज्जणाइयं करेंतो सुइभूतो अच्चिणइ। अच्चिणित्ता विणयजत्तो थुणेइ, न य बहुमाणेणं। पुंलिदो पुण तंमि सिवे भावपडिबद्धो, गल्लोदएण ण्हवति, नमिऊण उवविसइ । ततो सिवो तेण समं आलाव-संकहाहिं अच्छइ । अन्नया य तेसिं उल्लावणसद्दो बंभणेण सुतो। तेण पडियरिऊण उवालद्धो— 'तुमं पि एरिसो चेव कंडपूयणसिवो[1] [जो] एरिसएण उच्चिट्ठएण समं मंतेसि' । ताहे सिवो भणइ— 'एसो बहुमाणेइ, तुमं पुणाइ न तहा,' अन्नया य सिवो अच्छीणि उक्खणिऊण अच्छइ । बंभणो आगतो, रडिउमुवसंतो। पुलिंदो य आगतो, सिवस्स एगं अच्छिं न पेच्छइ, ततो अप्पणयं अच्छिं कंडफलेण उक्खणित्ता सिवस्स लाएइ। ततो सिवेणं बंभणो पत्तियावितो । एवं नाणमंतेसु विणयो बहुमाणो य दोवि कायव्वा ३।

---

१. क्षुद्रशिव इत्यर्थः। पाणसिवओ- इति दसवैकालिकस्य अगस्त्यसिंहचूर्णौ पृ. ५२॥



For Private And Personal Use Only

तथा श्रुतग्रहणमभीप्सता **उपधानं** कार्यम्, उपदधाति पुष्टिं नयत्यनेनेत्युपधानं-तपः। यद् यत्राध्ययने आगाढादियोगलक्षणमुपधानमुक्तं तत्तत्र कार्यं, तत्पूर्वकस्यैव श्रुतग्रहणस्य सफलत्वात्। अत्रोदाहरणम्-

एगे आयरिया ! ते वायणाए संतापरितंता सज्झाए वि असज्झाइयं घोसेउमारद्धा। नाणंतरायं बंधिऊण कालमासे कालं किच्चा देवलोगं गया। देवलोगातो आउक्खएण चुया। आभीरकुले पच्चायाता भोगे भुंजंति। अन्नया य से धूया जाया। सा य अतीव रूवस्सिणी। ताणि पच्चंतियाणि गोचारिनिमित्तं अन्नत्थ गच्छंति। तीए दारिआए पिउणो सगडं सव्वसगडाणं पुरतो गच्छइ। सा य दारिया तस्स सगडस्स धुरतुंडे ठिया वच्चइ। तरूणेहिं चिंतियं- समसेणीगाइं सगडाइं काउं दारियं पेच्छामो। तेहिं सगडा उप्पहेण खेडिया विसमे आवडिया समाणा भग्गा? ततो लोगेण तीए दारियाए नामं कयं **अस**गडा। ताए असगडाए पिया असगडपियत्ति। ततो तस्स तं चेव वेरग्गं जायं । तं दारियं एगस्स दाऊण पव्वइओ। जाव **चउरंगिज्जं** ताव पढिओ, **असंखयं**[१] पढिउमारद्धो। तं नाणावरणीज्जं से कम्मं उदिण्णं। पढंतस्स न किं चि ठाइ। आयरिया भणंति— 'छट्ठेण अणुजाणेज्जउ' । ततो सो भणइ,—



---

१. उत्तराध्ययनेषु चतुर्थमध्ययनम् ॥

'एयस्स केरिसो जोगो ?' आयरिया भणंति— 'जाव न ठाइ, ताव आयंबिलं कायव्वं'। तओ सो भणइ— 'एवं चेव पढामि'। तेण तहा पढंतेण बारसरूवगाणि बारसहिं संवच्छरेंहि अहियाणि ताव तेण आयंबिलाणि कयाणि। ततो से नाणावरणिज्जं कम्मं खीणं। एवं जहा असगडपियाए आगाढजोगो अणुपालिओ, तहा सव्वेहिं सव्वमुवहाणं पालेयव्वं ४।

तथा **अनिण्हवणे** इति गृहीतश्रुतेनाऽनिह्नवः कार्यः। यद् यस्य सकाशे अधीतं तत्र स एव कथनीयः, नाऽन्यः, चित्तकालुष्यापत्तेः। अत्र दृष्टान्तः—

'एगस्स ण्हावियस्स छुरभंडं विज्जासामत्थेणं आगासे अच्छइ[1]। तं च एगो य परिव्वायगो बहूहिं उवसंपज्जणाहिं उवसंपज्जिऊण तेण सा विज्जा लद्धा। ताहे अन्नत्थ गंतुं तिदंडेण आगासगएण महाजणेण पूइज्जइ। रण्णा पुच्छिओ— 'भयवं ! किमेस विज्जातिसओ? उत तवातिसओ ?' सो भणइ— 'विज्जाइसओ'। 'कस्स सगासाओ गहितो'। सो भणइ– 'हिमवंते फलाहारस्स रिसिणो सगासे अहिज्जितो'। एवं वुत्ते समाणे संकिलेसदुट्ठयाए तं तिदंडं खड त्ति पडियं। एवं जो अप्पाऽऽगमं आयरियं निन्हवेऊण अन्नं कहेइ तस्स अविहिसंकिलेसदोसेण सा विज्जा परलोए न हवइ त्ति ५।

---

**१. गच्छइ - वा० । आगच्छइ - ता० ॥**

तथा **व्यञ्जनाऽर्थ-तदुभये** इति समाहारत्वादेकवचनं, भेदो न कार्य इति वाक्यशेषः। एतदुक्तं भवति-श्रुतप्रवृत्तेन तत्फलमभीप्सता व्यञ्जनभेदोऽर्थभेद उभयभेदश्च न कार्य इति। तत्र व्यञ्जनभेदो यथा- 'धर्म्मो मङ्गलमुत्कृष्टम्' इति वक्तव्ये 'पुण्णं कल्लाणमुक्कोसं' इत्याह। अर्थभेदो यथा '**आवंती केयावंती लोगंसि विप्परामुसंती**' इत्यत्र **आचार**सूत्रे [श्रु १, अ. ५.३.१ सू. १] यावन्तः केचन 'लोके' अस्मिन् पाषण्डिलोके विपरामृशन्तीति, एवंविधाऽर्थाऽभिधाने **अ**वन्तीजनपदे 'केया' रज्जुः 'वांन्ता'[1] कूपे पतिता लोकाः परामृशन्तीत्याह। उभयभेदो द्वयोरपि याथात्म्योपमर्देन- 'धर्म्मो[2] मङ्गलमुत्कृष्टो अहिंसा पर्वतमस्तके' इत्यादि, दोषश्चात्र-व्यञ्जनभेदे अर्थभेदः, तद्भेदे क्रियाभेदः, क्रियाभेदे च मोक्षाभावः, तदभावे च निरर्थका दीक्षेति ६। ७। ८। एवं कालादिभेदप्रकारेण **अष्टविधः** अष्टप्रकारो ज्ञानविनयः॥ ६३॥ दर्शनविनयोप्यष्टप्रकारः। तामेवाष्टप्रकार-तामुपदर्शयति—

**निस्संकिय१ निक्कंखिय२, निव्वितिगिच्छा३ अमूढदिट्ठी ४य ।**
**उववूह५थिरीकरणे६ वच्छल्ल७पभावणे ८अट्ठ ॥ ६४ ॥**

गाथा ६४ ज्ञानाविनय-दर्शन-विनयादि ४७ (A)

१. वातात् कू॰ ता॰ । वाता कू॰ पु॰ ॥ २. धम्मो मंगलमुक्कसो अ॰ ता. ॥

शङ्कनं शङ्कितं, शङ्का इत्यर्थः, निर्गतं शङ्कितं यस्मादसौ **निःशङ्कितः**, देश-सर्वशङ्कारहित इत्यर्थः। तत्र देशशङ्का–समाने जीवत्वे कथमेको भव्योऽपरस्त्वभव्यः ? इति। सर्वशङ्का प्राकृतनिबद्धत्वात् सकलमेवेदं प्रवचनं परिकल्पितं भविष्यति इति, न पुनरालोचयति, यथा–भावा हेतुग्राह्या अहेतुग्राह्याश्च, तत्र हेतुग्राह्या जीवाऽस्तित्वादयः, अहेतुग्राह्या अस्मदाद्यपेक्षया भव्यत्वादयः प्रकृष्टज्ञानगोचरत्वात् तद्धेतूनामिति। प्राकृत-निबन्धोऽपि बालादिसाधारणः। उक्तं च–

*बाल–स्त्री–मूर्ख–मूढानां, नृणां चारित्रकाङ्क्षिणाम्।*
*[१]अनुग्रहाय तत्त्वज्ञैः, सिद्धान्तः प्राकृतः स्मृतः ॥ १ ॥*

इतश्च न परिकल्पितः, दृष्टेष्टाऽविरुद्धत्वात् । निःशङ्कितो जीव एवार्हच्छासनप्रतिपन्नः, दर्शनं प्रति विनीतत्वात्, दर्शनप्राधान्यविवक्षया दर्शनविनय उच्यते। एतेन विनय-विनयवतोरभेदमाह, एकान्तभेदे त्वविनयवत इव तत्फलाभावान्मोक्षाभावः। एवं शेषपदेष्वपि भावना कार्या १।

---

१. अनुग्रहार्थं - पु. प्रे. ॥

तथा **निष्काङ्क्षितः** देशसर्वकाङ्क्षारहितः, तत्र देशकाङ्क्षा यदेकं **दिगम्बरादिदर्शनं** काङ्क्षति, सर्वकाङ्क्षा यत् सर्वाण्यपि दर्शनान्याकाङ्क्षति, न पुनरालोचयति षड्जीवनिकायपीडामसत्प्ररूपणां च २।

विचिकित्सा-मतिविभ्रमः, निर्गता विचिकित्सा यस्मादसौ **निर्विचिकित्सः**, साध्वेव जिनदर्शनं, किन्तु प्रवृत्तस्य सतो ममाऽस्मात्फलं भविष्यति न वा? कृष्यादिक्रियाया उभयथाप्युपलब्धेरिति विकल्परहितः, नह्यविकलोपाय उपेयवस्तुपरिप्रापको न भवतीति सञ्जातनिश्चयो निर्विचिकित्स उच्यते। एतावता अंशेन निःशङ्किताद् भिन्नः। उदाहरणं चात्र विद्यासाधको यथाऽऽ**वश्यके** [**हारि.** टीका पत्र ८१५] इति यद्वा निर्विद्वज्जुगुप्सः साधुजुगुप्सारहितः। उदाहरणं चात्र-श्रावकदुहिता यथाऽऽ**वश्यके**[1] [**हा.टी.** पत्र ८१५] इति ३।

तथा बालतपस्वितपो-विद्याऽतिशयदर्शनैर्न मूढा स्वभावान्न चलिता दृष्टिः- सम्यग्-दर्शनरूपा यस्यासाऽ**वमूढदृष्टिः**। उक्तं च—

*णेगविहा इड्ढीओ, पूयं परवादिणं च दट्ठूण ।*
*जस्स न मुज्झइ दिट्ठी, अमूढदिट्ठिं तयं बेंति ॥*

१. ॰के एव- वा॰ मो॰ पु॰ मु॰ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्रोदाहरणं-**सुलसा** श्राविका। बेंति [नि.भा.गा.२६] यथा **अंबडो रायगिहं** गच्छंतो बहूणं भवियाणं थिरीकरणनिमित्तं सामिणा भणितो- 'सुलसं पुच्छेज्जासु[1]' अंबडो चिंतेइ— 'पुण्णमंतिया सुलसा, जं अरिहा पुच्छइ'। ततो अंबडेण परिजाणणानिमित्तं सा भत्तं मग्गिया। ताए न दिण्णं । ततो तेण बहूणि[2] रूवाणि विउव्वियाणि तहवि न दिन्नं, न य सम्मूढा। तह किर कुतित्थियरिद्धीओ दट्ठूण अमूढदिट्ठिणा भवियव्वं ४।

एतावान् गुणिप्रधानो दर्शनविनयनिर्देशः। अधुना गुणप्रधानः। उपबृंहणं च स्थिरीकरणं च **उपबृंहण-स्थिरीकरणे**। तत्रोपबृंहणं नाम समानधार्मिकाणां क्षपणवैयावृत्त्यादिसद्-गुणप्रशंसनेन तद्वृद्धिकरणम्[3]। उक्तं च—

***खमणे वेयावच्चे,*** *विणए सज्झायमाइसु य जुत्तं ।*
*जो तं पसंसए, एस होइ उववूहणाविणओ॥* [**निशीथभाष्य** गा.२७]

एतेष्वेव क्षपणादिषु सीदतां तत्रैव विशेषतः स्थापनं[4] स्थिरीकरणम् । आह च—



---

१. ज्जासि-वा॰मो॰पु॰मु॰॥ २. तेण विविहरूवाणि विरूवियाणि तह खं॰ ॥ ३. तद्वृत्तिक॰ वा॰ मो॰ पु॰ ॥ ४. स्थापना - वा॰ मो॰ पु॰ मु॰ ॥

For Private And Personal Use Only

*एएसुं चिय खमणादिएसु सीयंत चोयणा जा उ ।*
*बहुदोसे माणुस्से, मा सीय थिरीकरणमेयं॥* [**निशीथभाष्य** गा.२८]

तत्र उपबृंहणायामुदाहरणं-**रायगिहे** नगरे **सेणिओ** राया। इतो य सक्को देवराया सेणियस्स सम्मत्तं पसंसइ। ततो एगो देवो असद्दहंतो नगरबाहिं सेणियस्स निग्गयस्स चेल्लयरूवं काऊण अणिमिसे[1] गिण्हइ ताहे तं निवारेइ। पुणरवि अन्नत्थ संजती गुव्विणी पुरतो ठिया। ताहे अपवरगे पविसिऊण जहा न कोइ जाणइ तहा सूतिगिहं करावेइ। जं किंचि सूइकम्मं तं सयमेव करेइ । ततो सो देवो संजईरूवं पयहिऊण दिव्वं देवरूवं दरिसेइ, भणइ य- 'भो सेणिय ! सुलद्धं ते जम्म-जीवियस्स फलं, जेण ते पवयणस्स उवरिं एरिसी भत्ती अत्थि'त्ति उववूहेऊण गतो। एवं उववूहेयव्वा साहम्मिया ५।

स्थिरीकरणे उदाहरणं-**अज्जाऽसाढाऽऽरिया**[2] । जहा ते **चेल्लयसुरेण** थिरीकया तहा जे भविया ते थिरीकरेयव्वा ६॥ तथा **वात्सल्य-प्रभावने** इति, वात्सल्यं च प्रभावना च वात्सल्य-प्रभावने, तत्र वात्सल्यं समानधार्मिकस्याऽऽहारादिभिः प्रत्युपकरणम्, उक्तं च—

**१. अणमिसे - खं० पु० ॥ २. उदाहरणमिदं विस्तरत उत्तराध्ययने परीषहाध्ययने पाइयटीकायां द्रष्टव्यम्॥**

*साहम्मियवच्छल्लं आहाराईसु होइ सव्वत्थ ।*
*आएस-गुरु-गिलाणे तवस्सि-बालाइसु विसेसा ॥१॥ ७।* [**निशीथभाष्य** गा.२९]

प्रभाव्यते-विशेषतः प्रकाश्यते इति प्रभावना, '**णिवे त्त्यासश्रन्थ**' [**मलय.** कृ.५-७२] इत्यादिना' भावे अनप्रत्ययः। सा चार्थात् प्रवचनस्य। तत्र यद्यपि प्रवचनं शाश्वतत्वात् तीर्थकरभाषितत्वाद्वा सुराऽसुरनमस्कृतत्वात्स्वयमेव दीप्यते तथापि दर्शनशुद्धिमात्मनोऽभीप्सुर्यो येन गुणेनाऽधिकः स तेन तत् प्रवचनं प्रभावयति; यथा भगवदार्य**वज्रस्वामि**-प्रभृतिकः। उक्तं च—

*कामं सभावसिद्धं तु, पवयणं दिप्पते सयं चेव ।*
*तहवि य जो जेणऽहिओ, सो तेण पभावए तं तु ॥* [**निशीथभाष्य** गा.३१]

ते च प्रवचनप्रभावका अतिशय्यादयः। उक्तं च—

*"अइसेसि-इड्ढि-धम्मकहि, वादि आयरिय खवग नेमित्ती ।*
*विज्जा-राया-गणसम्मया य तित्थं पभावेंति[1]" ॥* [**निशीथभाष्य** गा.३३]

---

१. पभासेंति - खं० ॥

अस्या अक्षरगमनिका 'अतिशयी' अवध्यादिज्ञानयुक्तः। ऋद्धिग्रहणाद् आमर्षौषध्यादिऋद्धिप्राप्तः आचार्य-वादि-धर्म्मकथि-क्षपक-नैमित्तिकाः प्रतीताः। विद्याग्रहणाद् विद्यासिद्धः आर्य**खपट**वत्। 'राजगणसम्मताश्च' इति राजसम्मता मन्त्र्यादयः, गणसम्मता महत्तरादयः। चशब्दाद्दानश्राद्धादिपरिग्रहः। एते 'तीर्थं' प्रवचनं 'प्रभावयन्ति', स्वतः प्रकाशकस्वभावमेव सहकारितया प्रकाशयन्तीति॥ '**अट्ठ**'त्ति एवं दर्शनविनयभेदा अष्टौ भवन्ति ॥ ६४ ॥ चारित्रविनयोऽप्यष्टप्रकारः तथा चाह—

**पणिहाणजोगजुत्तो, पंचहिं समिईहि तिहिं उ गुत्तीहिं ।**
**एस उ चरित्तविणओ, अट्ठविहो होइ नायव्वो ॥ ६५ ॥**



प्रणिधानं-चेतःस्वास्थ्यं, तत्प्रधाना योगाः- प्रणिधानयोगाः, योगाः- व्यापाराः, तैर्युक्तः समन्वितः **प्रणिधानयोगयुक्तः**। अयं[1] च ओघतो अविरतसम्यग्दृष्टिरपि भवति तत आह- **पञ्चभिः समितिभिस्तिसृभिश्च गुप्तिभिर्यः** प्रणिधानयोगयुक्तः **एष चारित्रविनयः**। विनय

१. अयं च यतोऽवि॰ वा॰ पु॰ ॥

विनयवतोः कथञ्चिदव्यतिरेकाद**दष्टविधो भवति ज्ञातव्यः**, समिति-गुप्ति-योगभेदात्, तत्र समितयः प्रवीचाररूपाः गुप्तयः प्रवीचाराऽप्रवीचाररूपाः। उक्तं च—

*समिईण य गुत्तीण य, एसो भेदो उ होइ नायव्वो।*
*समिई पयाररूवा गुत्ती पुण उभयरूवा उ॥* [**निशीथभाष्य** गा. ३६]

उक्तश्चारित्रविनयः ॥ ६५॥ सम्प्रति प्रतिरूपविनयप्रतिपादनार्थमाह—

**पडिरूवो खलु विणओ, काय१वइ२मणे३ तहेव उवयारे४ ।**
**अट्ठ चउव्विह दुविहो, सत्तविह परूवणा तस्स ॥ ६६ ॥** [द. वै. नि. २२१ अ.चू]

**प्रतिरूपः** उचितः **खलु विनय**श्चतु ष्प्रकारः, तद्यथा- **काये** कायनिमित्तः१। एवं **वाचि** वाचिकः२। **मनसि** मानसिकः३। **तथा उपचारे**-औपचारिकः४। **अट्ठ-चउव्विह**-इत्यादि, अत्र यथासंख्यं पदघटना-कायिको विनयो अष्टविधः, वाचिकश्चतुर्विधः, मानसिको **द्विविधः**, औपचारिकः **सप्तविधः**, **परूवणा तस्स**त्ति तस्य कायिकादिभेद-भिन्नस्य चतुष्प्रकारस्य प्रतिरूपविनयस्य प्ररूपणा वक्ष्यमाणा ॥ ६६॥ तत्र 'यथोद्देशं निर्देशः' इति न्यायात् प्रथमतः कायिकस्याऽष्टविधस्य प्ररूपणामाह—

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अब्भुट्ठाणं[1]१ अंजलि,२ आसणदाणं[2]३ अभिग्गह ४ किई य५ ।**
**सुस्सूसणा६ य अभिगच्छणा[3] ७ य संसाहणा ८ चेव ॥ ६७ ॥**

[तुला द. वै. नि. २२१ अ.चू ]

**अभ्युत्थानम्** अभ्युत्थानाऽर्हे गुर्वादौ समागच्छति एष सामान्यसाधूनां विनयः, अपूर्वं पुनः समागच्छन्तं दृष्ट्वा सूरिणाऽप्युत्थातव्यम् १। **अञ्जलिः** प्रश्नादौ, यदि पुनः कथमप्येको हस्तः क्षणिको भवति तदैकतरं हस्तमुत्पाट्य 'नमः क्षमाश्रमणेभ्य' इति वक्तव्यम् २। '**आसनदानं**' नाम पीठकाद्युपनयनम् ३। **अभिग्रहः** गुरुनियोगकरणाऽभिसन्धिः[4]४। **कृतिश्चे**ति कृतिकर्म्म, वन्दनमित्यर्थः ५। **शुश्रूषणा** विधिवदनतिदूराऽऽसन्नतया सेवनम् ६। **अभिगमन**मागच्छतः प्रति उद्गमनम् ७। सूत्रे स्त्रीत्वं प्राकृतत्वात् **संसाधनं** गच्छतोऽनुव्रजनम् ॥ ६७ ॥ सम्प्रति वाग्विनयभेदानाह—

---

१. अब्भुट्ठाणे -तिसृष्वपि भाष्यप्रतिषु चूर्ण्युल्लिखितगाथाप्रतीके च ॥ २. °दाणे-तिसृष्वपि भाष्य-प्रतिषु ॥
३. अणुगच्छणा - इति चूर्णिसम्मतः पाठः, तथा च चूर्णिः - "अणुगच्छणा णाम इंतस्स अब्भुग्गच्छणं" ॥
४. सम्बन्धः खं° ॥



For Private And Personal Use Only

**[1]हिय-मिय-अफरुसभासी, [2]अणुवीईभासि वाइओ विणओ ।**
**एएसिं तु विभागं, वोच्छामि अहाणुपुव्वीए ॥ ६८ ॥** [द.वै. नि. २२१ अ.चू.]

अत्र **भासी**शब्दः प्रत्येकमभिसम्बध्यते, हितभाषी, मितभाषी, अपरुषभाषी। **हितं** परिणामसुन्दरं, तद्भाषते इत्येवंशीलो हितभाषी। **मितं** परिमिताक्षरं, तद्भाषणशीलो मितभाषी। **अपरुषम्**- अनिष्ठुरं, तद्भाषणशीलोऽपरुषभाषी, तथा अनुविचिन्त्य-पर्यालोच्य भाषते इत्येवंशीलो**ऽनुविचिन्त्यभाषी**। एष **वाचिको विनयः**, अयमपि निर्देशो विनय-विनयवतोरभेदोपचारेण, **एतेषां** तु हितवाक्यादिपदानां चतुर्णामपि **विभागं** पृथक्प्ररूपणां **यथानुपूर्व्या** यथावस्थितया आनुपूर्व्या **वक्ष्ये** ॥ ६८॥ तत्र प्रतिज्ञातं निर्वाहयता प्रथमतो हितभाषिस्वरूपं वक्तव्यं, हितं च द्विविधम्-इहलोके हितं परलोके हितं च। तत्र इहलोकहितप्रतिपादनार्थमाह—

**वाहिविरुद्धं भुंजइ, देहविरुद्धं च आउरो कुणइ ।**
**आयास-अकालचरियादिवारणं एहियहियं तु ॥ ६९ ॥**

१. हित-मित-अफरुसवाती-वाभा. चूर्णौ च ॥ २. अणुवितिभासी - वाभा० ॥



(५२०६४

यः कश्चित् पुरुषो व्याधिग्रस्तो **व्याधिविरुद्धं** व्याधिं प्रति कोपकारि **भुङ्क्ते,** तथा य **आतुरः** ग्लानो ग्लानत्वभग्नः सन् **देहविरुद्धं** देहविनाशकारि **करोत्य**नशनप्रत्याख्यानादि, तयोर्यद्वारणं, तथा **आयासस्य** मानातिरेकेण क्रियमाणस्य **अकालचर्या** रात्रौ पथि गमनम्, आदिशब्दात् कण्टकाकुलादिपथि गमनादिपरिग्रहः। तस्य च यद्**वारणमेतद् ऐहिकं हितं,** तद्भाषी ऐहिकहितभाषी॥ ६९॥ सम्प्रति परलोकहितभाषिस्वरूपप्रतिपादनार्थमाह—

**सामाचारीसीयंतचोयणा उज्जमंतसंसा य ।**
**दारुणसहावंतं[1] चिय, वारेइ परत्थहियवादी ॥ ७० ॥**

सामाचारी त्रिविधा- ओघसामाचारी, दशविधचक्रवालसामाचारी, पदविभागसामाचारी च। तस्यां त्रिविधायामपि सामाचार्यां यथायोगं सीदतः- शिथिलीभवतश्चोदना प्रोत्साहकरणं **सामाचारीसीदच्चोदना।** तथा उद्यच्छतः त्रिविधायामपि सामाचार्यां यथाशक्त्युद्यमं कुर्वतः शंसा-प्रशंसा उपबृंहण**मुद्यच्छच्छंसा, चः** समुच्चये। परलोकहितभाषणमिति सामर्थ्यात्

---

१. °वतं ति य - जे भा° खंभा° । वतं पिय - वामा° ॥

गम्यते। तत्कारी परलोकहितवादी। तथा दारुणः क्रोधाद्यन्वितः स्वभावो यस्याऽसौ दारुणस्वभावः, तद्भावो **दारुण-स्वभावता,** तां यो **वारयति** सोऽपि **परत्रहितवादी** ॥ ७० ॥ अत्र परः पृच्छति—

**अत्थि पुण काइ चेट्ठा, इहपरलोगे य अहियया[1] होइ? ।**
**थद्ध-फरुसत्त-नियडी, अतिलुद्धत्तं च इच्चादी ॥ ७१ ॥**

ननु हितभाषीत्यत्र हितमिति विशेषणं, विशेषणं च व्यच्छेदकं भवति, व्यच्छेद्यं चात्र [अ]हितं, तद् **अस्ति पुनः काचित्** कायिकी वाचिकी मानसिकी वाऽपि **चेष्टा** या **इहलोके परलोके वाऽहिता** सती व्यवच्छिद्येत?। सूरिराह—**थद्धफरुसत्त**त्यादि, त्वप्रत्यय उभयत्रापि सम्बध्यते, स्तब्धत्वम्-अनम्रता, एतेन कायिकी चेष्टोक्ता। परुषत्वं-निष्ठुरभाषिता[2], अनेन वाचिकी। मानसिकीमाह- **निकृतिः** माया, **अतिलुब्धत्व**-मत्युत्कटलोभता **इति, आदिशब्दात्** क्रोधशीलता कलहोद्दीपकत्वमित्यादिपरिग्रहः, ततोऽस्ति अहितापि चेष्टेति तद्व्यवच्छेदार्थं हितग्रहणम्॥ ७१ ॥ सम्प्रति मितभाषित्व-व्याख्यानार्थमाह—

१. अहितता - जेभा० खंभा० । अहितिया -वाभा०॥ २. ०ता एतेन वा० वा० पु० ॥

**तं पुण अणुच्चसद्दं, वोच्छिण्णं [1]मियं पभासए मउयं ।**
**मम्मेसु अदूमंतो, सिया व परियागवयणोणं ॥ ७२ ॥**

**तद्** इहलोकहितं परलोकहितं वा **पुनर्भाषते अनुच्चशब्दं** न विद्यते उच्चः शब्दः स्वरो यस्य तत्तथा तत्। **व्यवच्छिन्नं** [2]विभक्तममिलिताक्षरमित्यर्थः। **मितं** परिमितं प्रभूतार्थसंग्राहकं स्तोकाक्षरमित्यर्थः। तथा **मृदुकं** कोमलं श्रोत्र-मनसां प्रह्लादकारि, इत्थम्भूतमपि मर्मानुवेधितया विपाकदारुणं स्याद्, अत आह- **मर्मसु अदूमयन्** मर्म्माण्यविध्यन् इत्यर्थः। **स्याद् वा** तथाविधं कञ्चन शिक्षणीयमधिकृत्य परुषस्य मर्म्मानुवेधकस्य वक्ता **परिपाकवचनेन** अन्याऽपदेशेन, यथा-दोषाः स्त्रीसेवादयः इह परत्र चाऽकल्याणकारिणः यथा-अमुकस्य, तस्मात् कुलोत्पन्नेन शीलप्रमुखेषु गुणेष्वादरः कर्त्तव्यः। एष मितभाषी ॥ ७२ ॥ साम्प्रतमपरुषभाषित्वव्याख्यानार्थमाह—

**तंपि य अफरुस-मउयं, हियग्गाहि सुपेसलं भणइ ।**
**नेहमिव उग्गिरंतो, नयण-[3]मुंहेहिं च वियसंतो ॥ ७३ ॥**

---

१. मितं पभासए - जेभा॰ खंभा॰ ॥ २. विभक्तम् - वा॰ मो॰ पु॰ ॥ ३. ॰मुधेहिं - वा॰ मो॰ पु॰ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**तदपि** हितं मितं च भणति **अपरुषम**निष्ठुरम्। एतदेव व्याचष्टे-**मृदुकं** कोमलं, पुनः कथम्भूतमित्याह-हृदयं गृह्णाति हृदये सम्यग्निविशते इत्येवंशीलं **हृदयग्राहि**। तथा सुष्ठु-अतिशयेन पेशलं-मनोज्ञं श्रोत्र-मनसां प्रीतिकारि **सुपेशलम्**। तथा **नयन-मुखाभ्यां विकसन्**, तथाकथञ्चनापि भणति यथा **स्नेहमिवाऽऽन्तरं** प्रतिबन्धमिव साक्षाद् **उद्गिरन्** प्रकटीकुर्वन् प्रतिभाषते, इत्थम्भूतो वक्ता अपरुषभाषी ॥७३॥ सम्प्रत्यनुविचिन्त्य भाषित्वप्रतिपादनायाह—

**[१] तं पुणऽविरहे भासइ, न चेव तत्तोऽवभासियं कुणइ ।**
**जोएइ तहा कालं, जह वुत्तं होइ सफलं तु ॥ ७४ ॥**

**तत्पुनः** हितं मितम् अपरुषं च भाषते। **अविरहे** विरहाभावे समक्षमित्यर्थः। न पुनः **ततः** विरहादन्यत्र परोक्षे **अपभाषितं** दुष्टभाषणं **करोति,** विरूपं भाषते इत्यर्थः। **तथा** जोएइत्ति देशीवचनमेतद्, निरूपयति **कालं** प्रस्तावं, **यथा** प्रस्तावोचिततया **उक्तं** भणितं **सफलं भवति** ॥७४॥



---

१. तं पि यऽविरहे - तिसृष्वपि भाष्य-प्रतिषु, चूर्णिप्रत्यन्तरेषु च ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**अमियं अदेसकाले, भावियमिव भासियं निरुवयारं ।**
**आयत्तो वि न गिण्हइ, किमंग पुण जो पमाणत्थो ? ॥ ७५ ॥**

**अमितं** प्रभूताक्षरं, तथा **अदेश-काले भावितमिवेति** देश-कालाभ्याममभावितमिव, न देशोचितं नापि कालोचितमिति भावः। अत एव **निरुपकारम्,** देश-कालाऽनुचिततया ततो लेशतोऽपि परस्योपकारायोगात्। एवंरूपं **भाषितमायत्तोपि** स्ववशगोऽपि **न गृह्णाति** नाऽऽदेयबुद्ध्या शृणोति, **किमंग पुनः प्रमाणस्थः** मान्य इति ॥ ७५ ॥

**पुव्वं बुद्धीए पासित्ता तत्तो वक्कमुदाहरे।**
**अचक्खुओ[१] व नेयारं, बुद्धिं[२] अन्नेसए गिरा ॥ ७६ ॥**

प्रागुक्तप्रकारेण **पूर्वं बुद्ध्या प्रेक्ष्य** पर्यालोच्य पश्चाद् **वाक्यम् उदाहरेत[३]** उच्चरेत, अन्यथा यथाकथञ्चन प्रवृत्त्या सम्यगुपादेयत्वायोगात् । तथा चाह-**अचक्षुष्क[४] इव** अन्धक इव **नेतारमाकर्षयितारं बुद्धिमन्वेषते गीः** सदसदर्थप्रतिपादने। इत्थं च वक्ता अनुविचिन्त्यभाषी

१. अचक्खू इव ने० खं० पु० ॥ २. बुद्धी अन्ने उ ते गिरा - जेभा० खंभा० ॥ ३. उदाहरेत् उच्चारयेत् - वा० मो० पु० मु० ॥ ४. 'अचक्खु इव' अन्ध इव - खं० ॥



For Private And Personal Use Only

॥७६॥ उक्तो वाचिको विनयः। सम्प्रति मानसिकविनयद्वैविध्यम् उपदर्शयंस्तत्प्रतिपादनार्थमाह—

**माणसिओ पुण विणओ, दुविहो उ समासओ मुणेयव्वो ।**
**अकुसलमणोनिरोहो,१ कुसलमणउदीरणं२ चेव ॥ ७७ ॥**

**मानसिकः पुनर्विनयः समासतः** सङ्क्षेपेण **द्विविधः** द्विप्रकारः **मुणितव्यः** ज्ञातव्यः। तदेव द्वैविध्यमुपदर्शयति-अकुशलस्य आर्त्तध्यानाद्युपगतस्य मनसो निरोधः **अकुशलमनोनिरोधः१। कुशलस्य**-धर्म्मध्यानाद्युत्थितस्य[१] **मनस उदीरणम्** २। **चः** समुच्चये। **एव**कारो अवधारणे। एतावेव द्वौ भेदौ, नान्याविति ॥ ७७ ॥

उक्तो मानसिकोऽपि विनयः, साम्प्रतमौपचारिकसप्तविधविनयप्रतिपादनार्थमाह—

**अब्भासवत्ति[२]१ [३]छंदोणुवत्तिया,२ क[४]ज्ज३ पडिकित्ती४ चेव ।**
**अत्तगवेसण५कालण्णुया६, य सव्वाणुलोमं७ च ॥ ७८ ॥**

१.०द्युत्थितस्य - वा० मो० पु० ॥ २. ० त्ति ? परछंदवत्तिया - जेभा० खंभा० चूर्णिपाठभंदे च ॥ ३. छंदाणु० खं० ॥ ४. कज्जे -जेभा० खंबा० वाभा० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरोरभ्यासे समीपे वर्त्तते इतिशीलोऽ**भ्यासवर्त्ती**, गुरुपादपीठिकाप्रत्यासन्नवर्त्तीति भावः १। छन्दः गुरूणामभिप्रायः, तमनुवर्त्तते-आराधयतीत्येवंशीलः छन्दोऽनुवर्त्ती, तद्भावः **छन्दोऽनुवर्त्तिता** २। तथा **कार्ये** कार्यनिमित्तं तृतीयो विनयः, किमुक्तं भवति?- संग्रहमुपग्रहं वा मे करिष्यतीत्येवं बुद्ध्या यो यो विनयः क्रियते स कार्यनिमित्तको विनयः३। **पडिकित्ती चेव**त्ति कृते कार्ये यः क्रियते विनयः स प्रतिकृतिरूपत्वात् प्रतिकृतिः४। अत्र कार्यहेतुके प्रतिकृतिरूपे च विनये आक्षेप-परिहारौ **भाष्यकृद्** वक्ष्यति। तथा द्रव्याद्यापत्सु आर्त्तस्य, उपलक्षणमेतत्, अनार्त्तस्य वा गवेषणं दुर्लभद्रव्यसम्पादनादिरूप**मार्त्तगवेषणम्** ५। तथा कालं प्रस्तावम्, उपलक्षणत्वाद् देशं च जानातीति कालज्ञः, तद्भावः **कालज्ञता**-देशकालपरिज्ञानं, तस्मिन् सति गुर्वादिच्छन्दसा गुर्वादिभ्योऽ[1]भ्यवहारादिप्रदानं करोति, ततो विनयहेतुत्वात्तदपि देशकालपरिज्ञानं विनयः६। तथा सर्वेषु गुरूपदेशेषु अनुलोमम्-अप्रतिकू[2]लता **सर्वानुलोमम्** ७। **चः** समुच्चये एष गाथासङ्क्षेपार्थः॥ ७८ ॥ व्यासार्थं तु **भाष्यकृद्** बिभणिषुः प्रथमतोऽभ्यासवर्त्तित्वं व्याख्यानयन्नाह—

---

**१. गुर्वादिभ्य आहारा० वा० मो० पु० मु० ॥ २. ०कूलं सर्वा० खं० ॥**



For Private And Personal Use Only

**गुरुणो यं[1] लाभकंखी, अब्भासे वट्टते सया साहू ।**
**आगार-इंगिएहिं, संदिट्ठो व त्ति काऊणं[2] ॥ ७९ ॥**

**गुरोः अभ्यासे** समीपे **लाभकाङ्क्षी**[3] ज्ञान-दर्शन-चारित्ररूपपरमार्थलाभार्थी **सदा साधुः प्रवर्त्तते**। किमर्थम्? इत्यत आह-**आगारे**त्यादि, आकारः नेत्रवक्त्रगतः, इङ्गितं-चेष्टा, ताभ्यां गुरोरभिप्रायं समवगम्य तत्समीहितं कर्त्तुं, **सन्दिष्टो वा इति** यत् किमपि गुरुणा [4]सन्दिष्टः तद्वा **कर्तुमिति** ॥७९ ॥ सम्प्रति छन्दोनुवर्त्तितामाह—

**काल-सहावाऽणुमया, आहारुवही-उवस्सया चेव ।**
**नाउं ववहरइ तहा, छंदं अणुवत्तमाणो[5] उ ॥ ८० ॥**

**आहारः** पिण्डः, **उपधिः** कल्पादिः, **उपाश्रयः** वसतिः, एते **कालस्वभावाऽनुमताः** इति अनुमतशब्दः प्रत्येकमभिसन्बध्यते, कालानुमताः स्वभावानुमताश्च। तत्र कालानुमता ये यस्मिन् काले सुखहेतुतयाऽनुमताः ते कालानुमताः। प्रकृतिः स्वभावः, सा चार्थादिह

१. उ-चूर्णौ ॥ २. काहामि - वाभा० चूर्णौ च ॥ ३. लाभाका० खं० ॥ ४. सन्दिष्टं - खं० ॥ ५. अणुयत्त० तिसृष्वपि भाष्यप्रतिषु ॥

गुरोः प्रतिगृह्यते, तदनुमताः- तदनुकूलाः तान्, **तथा ज्ञात्वा छन्दो** गुरोरभिप्राय-**मनुवर्त्तमानः व्यवहरति** सम्पादयति। एष छन्दोनुवर्त्तिता विनयः ॥ ८० ॥ सम्प्रति कार्यहेतुके विनये परकृतमाक्षेपं मनस्याधाय परिहारमाह—

**इहपरलोकासंसविमुक्कं, कामं वयंति विणयं तु ।**
**मोक्खाहिगारिएसु, अविरुद्धो सो दुपक्खे वि ॥ ८१ ॥**

ननु तीर्थकरैर्भगवद्भिरिह-परलोकाऽऽशंसाविप्रमुक्तो विनयः कर्त्तव्यतयोपदिष्टः, ततः कथं साधूनां कार्यहेतुको विनयः? उच्यते- **काम**मिति अनुमते अवधृते[१] चार्थे, इह अवधृतेऽर्थे, ततोऽऽयमर्थः- यद्यपि नाम **इह-परलोकाशंसाविप्रमुक्तं कामं** नियमा**द्वदन्ति विनयं** तथापि **मोक्षाधिकारि[ के]षु** मोक्षयोग्येषु मोक्षपथज्ञानदर्शनचारित्रवत्सु इत्यर्थः, **सः** कार्यहेतुकोपि विनयः द्वयोः पक्षयोः समाहारो **द्विपक्षं,** तस्मि**न्नपि,** साधुवर्गे साध्वीवर्गे चेत्यर्थः, **अविरुद्धो** न विरोधभाक्। इयमत्र भावना-कार्यहेतुकोपि विनयः खलु संग्रहादिकार्यार्थं, संग्रहादिकार्यं च मोक्षाङ्गमिति, सोपि मोक्षार्थिना कर्त्तव्यः भगवदुपदिष्टत्वादिति ॥ ८१ ॥ सम्प्रति कृतप्रतिकृतविनये तमेवाक्षेपं मनस्याधाय परिहारमाह—

गाथा औपचारिक विनय-स्वरुपम्

---

**१. अवधृते, ततो - वा॰ मो॰ पु॰ ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**एमेव य अनियाणं, वेयावच्चं तु होइ कायव्वं ।**
**कयपडिकिती वि जुज्जइ, न कुणइ सव्वत्थ तं जइवि ॥ ८२ ॥**

यथा मोक्षाङ्गतया कार्यहेतुको विनयः साधुभिः कर्त्तव्यः, **एवमेव** मोक्षाङ्गतयैव कृतप्रतिकृतिरूपमपि **वैयावृत्त्यम् अनिदानं** निदानं-भोगप्रार्थना तद्रहितं **भवति कर्त्तव्यम्।** अनिदानमिति च विशेषणं ''मध्यग्रहणे दण्डादेरिवाद्यन्तयोरपि ग्रहणमिति'' **न्यायात्** पूर्वं पश्चाच्च द्रष्टव्यम्, तेन सर्वोऽपि विनयो मोक्षार्थिभिरनिदानः कर्त्तव्यः। अथ कथं कृतप्रतिकृतिरूपस्य विनयस्य मोक्षाङ्गता? उच्यते-सुशिष्यो ह्येवं परिभावयति- 'ज्ञान-दर्शन-चारित्रलाभैर्मामनुपकारिणमप्युपकुर्वन्ति भगवन्तोऽमी सूरयस्तस्मादेतेष्ववश्यं विनयः कर्त्तव्यः, ''**जस्संतियं धम्मपयाइं सिक्खे, तस्संतिए वेणइयं पउंजे**'' [**दशवै.**९/१/१२] इति वचनात्। एवं च पर्यालोच्य यः क्रियते विनयः स कृतप्रतिकृतिरूपत्वात् कृतप्रतिकृतेर्मोक्षाङ्गत्वाच्चावश्यं कर्तव्य इति। अन्यच्च-उत्सर्गतस्तावत् साधुभिः सर्वं निर्जरार्थं कर्त्तव्यं, केवलं कदाचिदशुभोऽपि भाव उपजायते कर्म्मगतेर्विचित्रत्वात्, ततोऽशुभभावोदयवशाद् यद्यपि



For Private And Personal Use Only

श्री व्यवहार- सूत्रम् पीठिका ५७ (A)

सर्वत्र सर्वदा **न** निर्जरार्थं प्रवर्त्तते तथाप्येष ममापि करिष्यति इति कृतप्रतिकृतिबुद्ध्यापि वैयावृत्त्यं कर्त्तव्यम्। तथा चाह– **'कयपडिकिती वि जुज्जइ'** इत्यादि, **यद्यपि तत्** वैयावृत्त्यं **सर्वत्र** सर्वेषु प्रयोजनेषु निर्जरानिमित्तं **न करोति** तथापि कृतप्रतिकृतिरपि युज्यते, कृतप्रतिकृतिबुद्ध्यापि वैयावृत्त्यं कर्त्तव्यमिति भावः, साधूनां ज्ञानादिपात्रतया विनयस्थानत्वेन तेषु विनयस्य कल्याणपरम्पराहेतुत्वात् ॥ ८२ ॥

उक्तः कृतप्रतिकृतिरूपो विनयः, साम्प्रतमार्त्तगवेषणरूपविनयप्रतिपादनार्थमाह—

**दव्वावईमाईसुं, अत्तमणत्ते गवेसणं कुणइ ।**
**आहारादिपयाणं, छंदम्मि उ छट्ठओ विणओ ॥ ८३ ॥**

गाथा औपचारिक विनय- स्वरूपम् ५७ (A)

**द्रव्यापदि** दुर्लभद्रव्यासम्पत्तौ, तथा च भवति केषुचिद् देशेषु **अवन्त्यादिषु** दुर्लभं घृतादिद्रव्यमिति। **आदिशब्दात्** क्षेत्रादिपरिग्रहः, तत्र क्षेत्रापदि कान्तारादिपतने, कालापदि दुर्भिक्षे, भावापदि गाढग्लानत्वे, **आर्त्तस्य** पीडितस्य अत्यन्तमसहिष्णुतया **अनार्त्तस्य** वा यथाशक्ति यद् **गवेषणं करोति,** दुर्लभद्रव्यादि सम्पादयति स आर्त्तगवेषणविनयः। सम्प्रति कालज्ञताविनयप्रतिपादनार्थमाह–

**षष्ठः** कालज्ञतालक्षणो **विनयः** एषः। यदुत **छंदम्मि उ** इति, तृतीयार्थे सप्तमी, यथा-**'तिसु तेसु अलंकिया पुहवी'** इत्यत्र, ततोऽयमर्थः- छन्दसा गुरूणामभिप्रायेणैव, तुशब्दस्यैवकारार्थत्वात्, **आहारादिप्रदानम्।** किमुक्तं भवति ? यद् यस्मै प्रतिभासते तदिङ्गिताकारादिभिरभिज्ञाय आचार्य-ग्लानोपाध्यायप्रभृतीनामकालक्षेपं सम्पादयति, स एष कालज्ञताविनयः ॥ ८३ ॥

उक्तः कालज्ञताविनयः, सम्प्रति सर्वत्राऽनुलोमतालक्षणं विनयमाह—

**सामायारिपरूवण, निद्देसे चेव बहुविहे गुरुणो ।**

**एमेयंति तहत्ति य, सव्वत्थऽणुलोमया एसा ॥ ८४ ॥**

**गुरुणो** इत्यत्र कर्त्तरि षष्ठी, गुरोः **सामाचारीप्ररूपणे,** किमुक्तं भवति ?-इच्छा-मिथ्यादिरूपायां[१] तस्यां तस्यां सामाचार्यां गुरुणा प्ररूप्यमाणायां **एवमेतत्,** यथा भगवन्तो वदन्ति, नान्यथा इति प्रतिपत्तिः तथा **बहुविधे** बहुप्रकारे **निर्देशे** तत्तत्कर्त्तव्यताज्ञापनलक्षणे गुरोः गुरुणा क्रियमाणे या **तथेति** वचनतः कर्त्तव्यतया च प्रतिपत्तिरेषा सर्वापि **सर्वानुलोमता** नाम विनयः ॥ ८४ ॥ उपसंहरन्नाह—

१. °दिप्ररूपणायां तस्यां त° वा° पु° ॥

**लोगोवयारविणओ, इय एसो वन्निओ सपक्खम्मि ।**
**आसज्ज कारणं पुण कीरइ जंयणा[1] विपक्खे वि ॥ ८५ ॥**

**इति** एवमुक्तेन प्रकारेण **एषः लोकोपचारविनयः स्वपक्षे** सुविहितलक्षणे **वर्णितः।** **आसाद्य कारणं** पुनः **विपक्षेऽपि** गृहस्थेषु तथाविधाऽगारिषु श्रावकेषु पार्श्वस्थादिषु च एष लोकोपचारविनयोऽभ्यासवर्त्तित्वादिलक्षणः **यतनया** प्रवचनोन्नतिव्याघातपरिहारेण संयमाऽनाबाधया च क्रियते॥ ८५॥ तदेवं काय-वाङ्-मनो-लोकोपचारभेदतश्चतुष्प्रकारः प्रतिरूपविनय उक्तः। अथवा अन्यथा चतुष्प्रकारः प्रतिरूपविनयः। तानेव प्रकारान् दर्शयति—

**चउहा वा पडिरूवो, तत्थेगऽणुलोमवयणसहियत्तं१ ।**
**पडिरूवकायकिरिया२ फासण३सव्वाणुलोमं४ च ॥ ८६ ॥**

**वाशब्दः** प्रकारान्तरद्योतनार्थः। अन्यथा वा **चतुर्द्धा** चतुष्प्रकारः **प्रतिरूपविनयः।** तत्र तेषु चतुर्षु प्रकारेषु मध्ये **एकः** प्रतिरूपविनयस्तावदयं-यदुत **अनुलोमवचनसहितत्वं** यत्किमपि कार्यमादिष्टः करोति, तत्सर्वमनुलोमवचनपूर्वकं करोति नान्यथेति भावः १।

१. जइणा - वा॰ मो॰ पु॰ मु॰ ॥

द्वितीयः **प्रतिरूपकायक्रिया,** यथा-परिपाट्या शरीरविश्रामणमित्यर्थः२। तृतीयः **संस्पर्शन**विनयः, यथा गुर्वादेः सुखासिकोपजायते तथा मृदुसंस्पर्शनात्मकः[1] संस्पर्शनविनय इति भावः३। चतुर्थः सर्वानुलोमता, सूत्रे **सर्वानुलोमम्**इति भावप्रधानो निर्देशः। **चः** समुच्चये सा च सर्वानुलोमता व्यवहारविरुद्धेऽपि प्राणव्यपरोपणकारिण्यपि वा समादेशे यथाक्रमं तथेति प्रतिपत्तिः, तथैव च कार्यसम्पादनमित्येवंरूपा॥ ८६॥ एतानेव प्रकारान् क्रमेण व्याचिख्यासुः प्रथमतोऽनुलोमवचनसहितत्वं व्याख्यानयति—

**अमुगं कीरउ आमं, ति भणइ अनुलोमवयणसहिओ उ ।**
**वयणपसायाईहि य, अभिणंदइ तं वइं[2] गुरुणो ॥ ८७ ॥**

इच्छाकारेण भो शिष्य! **अमुकं क्रियता**मित्येवं गुरुणा समादिष्टे[3] यो वचसा **आम**मिति ब्रूते, न केवलं ब्रूते एव, किन्तु **गुरोस्तां वाचं वदनप्रसादादिभिः** वदनस्य प्रसादेन-मुखस्य प्रसन्नतया, आदिशब्दात् उत्फुल्लनयनकमलो[4]ऽञ्जलिप्रग्रहादिना च **अभिनन्दति** 'महान्

---

१. स्पर्शन प्रत्ये ( प्रत्ययि ) कः सं० वा० मो० पु० ॥ २. वयं - वा० मो० पु०॥ ३. समादिष्टेन वचसा - खं० ॥
४. ०करणतोऽञ्जलिप्रग्रहणादिना - खं० ॥

कृतः प्रसादो यदेवं समादिष्टः' इति एवं ज्ञापनेन स्फीतीकरोति स विनय-विनयवतोर-भेदोपचाराद् **अनुलोमवचनसहितः** प्रतिरूपविनयः। **तुशब्दः** एवकारार्थः। एवंरूप एवानुलोमवचनसहितः, नाऽन्य इति ॥ ८७ ॥

अस्यैव विनयस्य करणे उपदेशमाह—

**चोदयंते परं [1]थेरा, इच्छाणिच्छे व तं [2]वइं ।**
**जुत्ता विणयजुत्तस्स गुरुवक्कऽणुलोमता ॥ ८८ ॥**

**स्थविराः** आचार्यादयः, ते **परं** शिष्यं **चोदयन्ते** शिक्षयन्ते तेषां तत्राऽधिकारित्वात्। तत्र **तां** चोदनात्मिकां **वाचं** प्रति यदि **इच्छा** भवति तदादिष्टकार्यकरणाय यदि वा **अनिच्छा** तथापि विशुद्धान्वयतया विनययुक्तस्य **गुरुवाक्याऽनुलोमता** आममित्येवं गुरुवाक्योपबृंहणं, गुरुवाक्योपदिष्टकार्यसम्पादकता चेति लक्षणा **युक्ता** । इयमत्र भावना-जाति-कुलसमन्वितेन विनय[3]मिच्छुना सदैव गुरोर्निकटवर्त्तिना भवितव्यं, तत्र यदा गुरुः शिक्षयते तदा तां शिक्षामिच्छता अनिच्छता वाऽवश्यं गुरुवाक्यम् आममिति तथैवेत्येवम्

**१. थेरो चूर्णौ ॥ २. वयं- वा॰मो॰पु॰ ॥ ३. यमिच्छता- सा॰ वा॰ मो॰ मु. ॥**

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उपबृंहणीयं, कार्यं च सम्पादनीयमिति ॥८८॥ एतदेव सविस्तरमाह—

**गुरवो जं पभासंति[१], तत्थ खिप्पं समुज्जमे ।**

**न हु सच्छंदया सेया, लोए किमुत उत्तरे? ॥ ८९ ॥**

**गुरवो यत्प्रभाषन्ते**, कर्त्तव्यतयोपदिशन्ति, **तत्र क्षिप्रं** शीघ्रं **समुद्यच्छेत्** सम्यगुद्यमं कुर्यात्। यतः **नैव स्वच्छन्दता** स्वाभिप्रायेण वर्त्तिता **श्रेयसी लोके**ऽपि, अपिशब्दोऽत्राऽनुक्तोऽपि सामर्थ्यात् गम्यते, **किमुत उत्तरे** लोकोत्तरे सुविहितजनमार्गे? परलोकार्थिनस्तस्य सुतरां न श्रेयसी, ज्ञानादिविच्युतिप्रसङ्गात् ॥ ८९ ॥

**जहुत्तं गुरुनिद्देसं, जो वि[२] आइसई मुणी ।**

**तस्सा वि[३] विहिणा जुत्ता, गुरुवक्काणुलोमता ॥ ९० ॥**

**यथोक्तं गुरुनिर्देशं** गुर्वाज्ञारूपं **योऽपि मुनिरादिशति** कथयति, **तस्यापि** तथाऽऽदिशतः प्रति**विधिना** सूत्रोक्तेन **युक्ता गुरुवाक्याऽनुलोमता** यथोक्तस्वरूपा। तदेवमुक्तोऽनुलोमवचनसहितत्वरूपो विनयः॥ ९०॥ सम्प्रति प्रतिरूपकायक्रियाविनयमाह—

---

**१. पसाहंति- वाभा०॥ २. इ - खं. C ॥ ३. ०वि विंहणा वुत्ता गु० तिसृष्वपि भाष्यप्रतिषु ॥**



For Private And Personal Use Only

**अद्धाण वायणाए, निच्चासणयाए परिकिलंतस्स ।**
**सीसाई जा पाया, किरिया पायादविणओ उ ॥ ९१ ॥**

**अध्वनि** मार्गे **वाचनायां** सूत्राऽर्थप्रदानलक्षणायां **नित्याऽऽसनतया** निरन्तरोपवेशनतः **परिक्लान्तस्य** समन्ततः क्लममुपागतस्य **क्रिया** प्रतिरूपकायक्रिया, विश्रामणेति तात्पर्यार्थः, कर्त्तव्येति वाक्यशेषः। कथं कर्त्तव्या? इत्यत आह-**शीर्षादेर्यावत्पादौ** शिरसः आरभ्य क्रमेण तावत् कर्त्तव्या यावत् पादौ। यदि पुनः **पादादा**रभ्य करोति तदा **अविनयः**, पादादिमलस्य शीर्षादिषु लगनात् ॥ ९१ ॥ अत्रैवापवादमाह—

**जत्तो व भणाइ गुरू, करेइ किइकम्म मो तओ पुव्वं ।**
**संफरिसणविणओ पुण, परिमउयं वा जहा सहइ ॥ ९२ ॥**

**यतो वा** अङ्गादारभ्य **गुरुर्भणति ततः पूर्व**मारभ्य **कृतिकर्म्म** विश्रामणां, **मो** इति पादपूरणे **करोति**, तथा च सति पादादप्यारभ्य कुर्वतो नाऽविनयः, गुर्वाज्ञाकारित्वात् उक्तोऽनुलोम(प्रतिरूप)कायक्रियाविनयः। सम्प्रति संस्पर्शनविनयमाह-**संफरिसणे**त्यादि, संस्पर्शन-विनयः **पुनः परिमृदुकं वा**शब्दादल्पमृदुकं **वा यथा सहते** तथा विश्रामणां करोति,

अतिखरेण विश्रामणायां परितापनसम्भवात् ॥९२॥ अथ विश्रामणायां को गुणः? इत्यत आह—

**वायाई सट्ठाणं, वयंति बद्धासणस्स जे खुभिया ।**
**खेयजओ तणुथिरया, बलं च अरिसादओ नेवं ॥ ९३ ॥**

**वातादयो** वात-पित्त-श्लेष्माणो ये **बद्धासनस्य** सतः **क्षुभिताः** स्वस्थानात् प्रचलितास्ते **स्वस्थानं व्रजन्ति** स्वं स्थानं प्रतिपद्यन्ते, ते न विक्रियां भजन्तीति भावः। तथा वाचनाप्रदानतो मार्गगमनतो वा यः **खेद** उपजातः तस्य **जयः** अपगमो भवति। तथा **तनोः** शरीरस्य **स्थिरता** दार्ढ्यं भवति, न विशरारुताभावः। अत एव च **बलं** शारीरं तदुपष्टम्भतो वाचिकं मानसिकं च। तथा एवं विश्रामणातो वातादीनां स्वस्थानगमने **अर्श आदयः** अर्शांसि वात[1]-पित्त-श्लेष्मजानि, आदिशब्दात्तदन्ये च रोगा **न** उपजायन्ते। एते विश्रामणायां गुणाः, ततः कर्त्तव्योऽवश्यमनुलोम(प्रतिरूप)कायक्रियाविनयः संस्पर्शनविनयश्च ॥ ९३ ॥

सम्प्रति सर्वत्राऽनुलोमताविनयमाह—

१. वातिक - पै ( पि-मु॰ ) त्तिक-श्ले॰ वा॰ पु॰ मु॰ ॥

**सेयवपु[1] मे कागो, दिट्ठो चउदंत पंडुरो वेभो ।**
**आमं ति पडिभणंते सव्वत्थऽणुलोमपडिलोमे ॥ ९४ ॥**

**श्वेतवपुः** श्वेतशरीरो **मे** मया **काको दृष्टः**, यदि **वा इभो** हस्ती **चतुर्दन्तो पाण्डुरश्च**, मया दृष्ट इति वर्त्तते, एवं **प्रतिलोमे** लोकव्यवहारविरुद्धे गुरुणा कथमप्युच्यमाने **आमम् इति प्रतिभणति** शिष्ये **सर्वत्राऽनुलोम**लक्षणो विनयः प्रतिपत्तव्यः। किमुक्तं भवति?-यदि नाम 'श्वेतवपुर्मया काको दृष्ट' इत्यादिकं लोकव्यवहारप्रतिकूलं कथमपि गुरुर्भणति तथापि तदानीं सकलजनसमक्षम् आमम् इत्येवं वक्तव्यं, न पुनस्तद्वचः कुट्टयितव्यं, केवलं विशेषार्थिना जनविरहे कारणं प्रष्टव्यम्। एवं हि सर्वानुलोमतालक्षणो विनयः प्रकटितो भवति नान्यथा ॥ ९४ ॥

**मिण गोणसंगुलेहिं, गणेहि[2] से दाढचक्कलाइं[3] से ।**
**अग्गंगुलीए वग्घं तुद [4]डिव अगडं भणति आमं॥ ९५ ॥**



---

१. °वऊ - पु. प्रे = पुण्यविजय प्रेसकोपी मध्ये ॥ २. गणेह - खं॰ वा॰ मो॰ पु॰ मु॰ ॥ ३. °लाइं वा-तिसृष्वपि भाष्यप्रतिषु ॥ ४. डेवऽगडं - खं॰ विना टीकाप्रतिषु, तिसृष्वपि भाष्यप्रतिषु च ॥

**मिनु** प्रमिणु **गोनसं** सर्पजातिविशेषम् अङ्गुलैः, यथा कियन्त्यङ्गुलानि अयं गोनसो विद्यते? इति । तथा **गण** परिसंख्याहि **से** तस्य गोनसस्य **दंष्ट्राः**, यदि वा **से** तस्य **चक्कलादि** पृष्ठस्योपरि मण्डललक्षणानि गणय, कियन्त्योऽस्य दंष्ट्राः? कियन्ति वाऽस्य पृष्ठस्योपरि चक्कलानि? इत्येतत् गणयित्वा कथयेति भावः। तथा **अग्राङ्गुल्या** अङ्गुल्यग्रभागेन **व्याघ्रं तुद** तोत्रेण व्यथय। तथा [1]**डिव** प्रोल्लङ्घय **अवटं** कूपम्। एवं प्राणप्रतिलोमं वदति गुरौ सर्वत्राऽनुलोमताविनययुक्तः शिष्यः **आममिति भणति** । गुरवो हि सकलजगत्प्राणिवर्गविषयपरमकरुणापरीतचेतसः, ततस्त एव युक्तमयुक्तं वा जानन्ति, किमत्र शिष्यस्य चिन्तया? इति शिष्येण सर्वत्रानुलोमविनय[2]मिच्छुना ईदृशमपि गुरुवचनं तथेति प्रतिपत्तव्यमिति ॥ ९५॥ सम्प्रति 'गुत्तिसु य समिईसु य' [गा. ६०] इत्यादि गाथायां यदुक्तं 'पसत्थे य' इति तत्र प्रशस्तग्रहणव्यवच्छेद्यं दर्शयति—

**तत्थ उ पसत्थगहणं परिपिट्टं[3]ण छेयणाइ वारेइ ।**
**ओसन्न-गिहत्थाण य उट्ठाणाई य पुव्वुत्ता ॥ ९६ ॥**



---

१. डिप- वा० मो० पु० मु० ॥ २. ०यमिच्छता - वा० मो० पु० मु० ॥ ३. ०ण छिज्जमाइ - वा० मो० पु० जेभा० खंभा० वाभा० ॥

'जोगे तहा पसत्थे य,' (गा. ६०) इत्यत्र यत् **प्रशस्तग्रहणं** कृतं तद् अप्रशस्तं योगं **परिपिट्टन-छेदादिकं वारयति** निराकरोति, न तदकरणे प्रतिक्रमणं प्रायश्चित्तं भवतीति भावः, तस्याप्रशस्तत्वेन तत्करणस्यैव प्रायश्चित्तविषयत्वात्। तथा ये **अवसन्नानाम्** उपलक्षणमेतत्, पार्श्वस्थ-कुशीलानां च, तथा **गृहस्थानां पूर्वोक्ता उत्थानादयः**- अभ्युत्थानाऽञ्जल्याऽऽसनप्रदानादयस्तानपि वारयति, तेषामपि तान् प्रति अप्रशस्तत्वात् ॥९६ ॥ अत्रैव प्रायश्चित्तयोजनामाह—

**जो जत्थ उ करणिज्जो, उट्ठाणाई अकरणे तस्स ।**
**होइ पडिक्कमियव्वं, एमेव य वाय माणसिए ॥ ९७ ॥**

**यो** योग **उत्थानादिकः** अभ्युत्थानाञ्जलिप्रदानादिको **यत्र** आचार्यादिविषये **करणीय** उक्तस्**तस्य तत्राऽकरणे प्रतिक्रमितव्यं भवति,** मिथ्यादुष्कृतं प्रायश्चित्तं भवतीति भावः, तदेतत् कायिकप्रतिरूपयोगविषये उक्तम्, **एवमेव** अनेनैव प्रकारेण **वाचिके मानसिके**ऽपि योगे प्रतिरूपे वक्तव्यम्, यथा-वाचिको मानसिकोऽपि यः प्रतिरूपयोगो यथा यत्र करणीय उक्तस्तस्य तथा तत्राऽकरणे मिथ्यादुष्कृतं प्रायश्चित्तमिति, **च**शब्दोऽनुक्तसमुच्चयार्थः। तेन



For Private And Personal Use Only

इच्छा-मिथ्यादिप्रशस्तयोगाऽकरणेऽपि मिथ्यादुष्कृतं द्रष्टव्यम् ॥ १७ ॥ सम्प्रति यत् मूलगाथायाम् 'अ(व)इक्कमे अणाभोगे' (गा.६०) इत्युपन्यस्तं, तद् व्याख्यानयन्नाह—

**अवराहे[1] अतिकमणे वइक्कमे चेव तह[2] य अणाभोगा ।**
**भयमाणे उ अकिच्चं, पायच्छित्तं पडिक्कमणं ॥ १८ ॥**

**अपराधे** उत्तरगुणप्रतिसेवनारूपे **अतिक्रमणे** तथा **व्यतिक्रमे** च तथाऽनाभोगतोऽकृत्यमपि मूलोत्तरगुणप्रतिसेवनालक्षणं **भजमाने प्रतिक्रमणं** मिथ्यादुष्कृतं **प्रायश्चित्तम्** ॥ १८ ॥

तदेवमुक्तं प्रतिक्रमणार्हं प्रायश्चित्तम्, इदानीं तदुभयाऽर्हमभिधातुकाम आह—

**संकिए सहसागारे[3], भयाऽऽउरे आवतीसु य ।**
**महव्वयातियारे य, छण्हं ठाणाण बज्झतो ॥ १९ ॥**

१. ॰राह अतिकूंमणे - वा॰ मो॰ पु॰ जेभा॰ खंभा॰ वाभा॰ B3 ॥ २. तह अणाभोगे - खंभा॰ वाभा॰ मु॰ । तह अणाभोगा जेभा॰ । तह चऽणाभोगे -वा॰ । तह य अणभोगे मो॰। तह यऽणाभोगा-पु॰ ॥ ३. सहसक्कारे - जेभा॰ खंभा॰ खंभा॰ वाभा॰ ॥

**शङ्किते** प्राणातिपातादौ, यथा-मया प्राणातिपातः कृतः किं वा न कृतः? तथा मृषा भणितं न भणितं वा? अवग्रहोऽनुज्ञापितो न वा? स्नानादिदर्शननिमित्तं जिनभवनादिषु गतस्य स्त्रीस्पर्शे रागगमनमभून्न वा? इष्टाऽनिष्टेषु शब्दादिषु राग-द्वेषौ गतो न वा? तक्रादिलेपकृदवयवाः कथमपि पात्रगताः पर्युषिता भिक्षार्थमटितुकामेन धौताः किंवा न धौता? इत्यादि। तत्र षण्णां स्थानानां बाह्यं तदुभयलक्षणं प्रायश्चित्तमिति योगः। तथा उपयोगवतोऽपि **सहसाकारेण** सहसा प्राणातिपातादिकरणे, तथा **भये** दुष्टम्लेच्छादिसमुत्थे यदि वा हस्त्यागमने मेघोदकनिपातस्पर्शने दीपादिस्पर्शने वा आकुलतया प्राणातिपातादिकरणे, तथा **आतुरः** क्षुधा पिपासया वा पीडितः, भावप्रधानश्चायं निर्देशः ततोऽयमर्थः-आतुरतायाम् । तथा **आपत्** चतुर्द्धा, तद्यथा-द्रव्यापत् , क्षेत्रापत् , कालापत्, भावापत्। तत्र द्रव्यापद्-दुर्लभं प्रायोग्यं द्रव्यं, क्षेत्रापत्-छिन्नमडम्बादि । कालापद् दुर्भिक्षादि, भावापद् गाढग्लानत्वादि। एतासु च हिंसादोषमापद्यमानस्यापि अनात्मवशगस्य, तथाहि-ईर्यासमितावुपयुक्तोऽप्युच्चालिते पादे सहसा समापतितं कुलिङ्गिनमपि व्यापादयेत्, मृषाऽपि कदाचित्सहसा भाषते, अवग्रहमपि कदाचिद् राभसिकतया अननुज्ञातमपि परिभोगयति, अत्युल्बणमबलारूपमवलोक्य कदाचनापि सहसा रागमुपैति इत्यादि। तथा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भयात्प्रपलायमानो भू-जल-ज्वलन-वनस्पति-द्वि-त्रि-चतुः-पञ्चेन्द्रियानपि व्यापादयेत्, मृषापि भयाद् भाषते, परिग्रहमपि धर्मोपकरणबाह्यस्य करोति। आतुरतायामपि सम्यगीर्यापथाऽशोधने सम्भवति प्राणातिपातः, अत्यातुरतायां कदाचिद् मृषाभाषणमपि अदत्तादानमपि च । एवमापत्स्वपि भावनीयम्, तथा **महाव्रतानां** प्राणातिपातनिवृत्त्यादीनां सहसाकारतः स्फुटबुद्ध्या कारणतो वा **अतिचारे** सति चशब्दादतिक्रम-व्यतिक्रमयोश्च, तथाऽतिक्रमादीनां महाव्रतविषयाणामन्यतमस्याऽऽशङ्कायां वा, किम्? इत्याह-**छण्हं ठाणाण बज्झतो** इति । इह **के**षाञ्चिद् अनवस्थित-पाराञ्चिते प्रायश्चित्ते द्वे अपि एकं प्रायश्चित्तमिति प्रतिपत्तिः, तन्मतेन नवधा प्रायश्चित्तं, तत्र चाद्ये द्वे प्रायश्चित्ते मुक्त्वा शेषाणि सप्त प्रायश्चित्तानि, तेषां च सप्तानां प्रायश्चित्तानां यदाद्यं प्रायश्चित्तं तत् उपरितनानां षण्णां बाह्यं, नाभ्यन्तरमिति षण्णां स्थानानां बाह्यतः इति वचसा तदेव प्रतिपत्तव्यम्। यच्च तदुभयं तच्चैवं भावनीयं- शङ्कितादिषु यथोक्तस्वरूपेषु सत्सु प्रथमं गुरूणां पुरत आलोचनं, तदनन्तरं गुरुसमादेशेन मिथ्यादुष्कृतदानमिति ॥ ९९ ॥

तत्र यदुक्तं 'संकिए' इति तद् विवृण्वन्नाह—



For Private And Personal Use Only

**हित्थो व ण हित्थो मे, सत्तो? भणियं व न भणियं मोसं? ।**
**उग्गहऽणुण्णम( ?ऽन )णुन्ना, तइए? फासे चउत्थम्मि? ॥ १०० ॥**

**इंदियरागद्दोसा उ पंचमे किं गंतोमि[१] न गतो?त्ति,**
**छट्ठे लेवाडादी धोयमधोयं न वा मे?त्ति ॥ १०१ ॥**

**सत्त्वः** प्राणी **हित्थो**त्ति देशीपदमेतत् हिंसितो **मे** मया **न वा हिंसितः**? इति तथा **मृषा भणितं** यदि वा **न भणितम्**? तथा **तृतीये** अदत्तादानविरतिलक्षणे **अवग्रहाऽनुज्ञा** मया कारिता यदि वा **अननुज्ञा** अवग्रहाऽनुज्ञा न कारिता? तथा **चतुर्थे** मैथुनविरतिलक्षणे जिनभवनादिषु स्नानादिदर्शनप्रयोजनतो गतः सन् **फासे** इति स्त्रीस्पर्शे रागं गतो न वा? ॥१००॥ तथा **पञ्चमे** परिग्रहविरमणलक्षणे **इन्द्रियेषु** विषयिणा विषयोपलक्षणात् इन्द्रियविषयेषु इष्टाऽनिष्टेषु शब्दादिषु रागद्वेषौ **गतो**ऽस्मि किं वा **न गत**? इति। तथा **षष्ठे** रात्रिभोजनविरमणे **लेपकृदादि** तक्राद्यवयवरूपं कथमपि पात्रादिगतं पर्युषितं भिक्षाटनार्थमुद्यतेन **धौत**मथवा **न धौतं** मया? इति ॥१०१॥ यद्येवं ततः किम्? इत्याह—

---

१. गओ ?व न - खं० । गतो ?त्ति ण गतो मि? जे भा० खंभा० ॥

**इंदियअव्वोगडिया जे अत्था अणुवधारिया ।**
**तदुभयपायच्छित्तं पडिवज्जइ भावओ ॥ १०२ ॥**

उक्तेन प्रकारेण **ये अर्थाः** प्राणातिपातादय **इन्द्रियैः** चक्षुरादिभिः **अव्याकृता** अप्रकटीकृताः, प्रकटीकृता अपि ये **अनुपधारिता** न सम्यग्धारणाविषयीकृताः, तेषु **प्रायश्चित्तं प्रतिपद्यते भावतः** सम्यग् अपुनरापतनेन **तदुभय**मिति। तच्च तदुभयं च पूर्वं गुरूणां पुरत आलोचना, तदनन्तरं तदादेशतो मिथ्यादुष्कृतदानम्, इत्येवंरूपं तदुभयम् ॥ १०२ ॥ एतदेव सविस्तरमभिधित्सुराह—

**सद्दा सुया बहुविहा, तत्थ यं[1] केसु वि गतो मि रागं ति ।**
**अमुगत्थ मे वितक्को, पडिवज्जइ तदुभयं तत्थ ॥ १०३ ॥**

**शब्दा** मया **बहुविधाः** बहुप्रकाराः **श्रुताः** श्रवणविषयीकृताः, **तत्र** तेषु बहुविधेषु शब्देषु श्रुतेषु मध्ये **वितक्कत्ति** एवं **मे** वितर्कः सन्देहः, यथा **केषुचिद**पि **अमुगत्थ**त्ति अमुकेषु रागम्, उपलक्षणमेतत्, द्वेषं वा **गतोऽस्मि, तत्र** तस्मिन् शङ्काविषये **तदुभय**मुक्त-



१. वि-खं० ॥

लक्षणं प्रायश्चित्तं भावतः **प्रतिपद्यते**। यदि हि निश्चितं भवति यथा- 'अमुकेषु शब्देषु रागं द्वेषं वा गतः' इति तत्र तपोर्हं प्रायश्चित्तम्, अथैवं निश्चयः 'न गतो रागं द्वेषं वा' तत्र स शुद्ध एव, न प्रायश्चित्तविषयः। ततो वितर्के यथोक्तलक्षणे तदुभयमेव प्रायश्चित्तमिति॥ १०३॥

**एमेव सेसए वी, विसए आसेविऊण जे पच्छा ।**
**काऊण एगपक्खे, न तरइ तहियं तदुभयं तु ॥ १०४ ॥**

**एवमेव** उक्तेनैव प्रकारेण यान् [शेषकान्] रूपादीन् विषयान् **आसेव्य** उपभुज्य, उपलक्षणमेतत् प्राणातिपातादीनप्यासेव्य **पश्चाद् एक**तरस्मिन् **पक्षे** अपराधलक्षणे निर्दोषतालक्षणे वा **कर्तुं** न शक्नोति, यथा रूपादिषु विषयेषु रागं द्वेषं वा गतः, प्राणातिपातादयो वा कृता इति, यदि वा न गतो रागद्वेषौ, नापि कृताः प्राणातिपातादय इति, **तत्र तदुभयं तु** तदुभयमेव, तुशब्दस्यैवकारार्थत्वाद् यथोक्तलक्षणं प्रायश्चित्तं, शङ्कास्पदत्वात् ॥ १०४॥

तदेवं शङ्किते इति व्याख्यातम्। सम्प्रति 'सहसाकारे' [गा.९९] इत्यादि व्याचिख्यासुराह—

**उवयोगवतो सहसा, भएण वा पेल्लिए कुलिंगादी ।**
**अच्चाउराऽऽवतीसु य, अणेसियादीगहण-भोगा ॥ १०५ ॥**

**उपयोगवतो**ऽपि ईर्यासमितौ सम्यगुपयुक्तस्यापि उच्चालिते पादे कथमपि **सहसा**योगतः समापतितः सन् **कुलिङ्गी** व्यापद्यते, **भयेन वा** चौर-सिंहादीनां भृशं प्रपलायमाने, भयग्रहणं मूलगाथायामुपलक्षणं, तेन एतदपि द्रष्टव्यं-परेण वा **पेल्लिए** इति परेण प्रेरिते वा तद्व्यापारमासाद्य कुलिङ्गी, उपलक्षणमेतत् पृथिव्यादिजीवनिकायो वा, व्यापत्तिमाप्नुयात्। तथा **अत्यातुरे** क्षुधा पिपासया वा अत्यन्तपीडिते तथा **आपत्सु** द्रव्यापदादिषु यदि **अनेषितादिग्रहण-भोगौ** भवतः अनेषितम्-अनेषणीयम्, आदिशब्दाद-कल्पनीयस्य परिग्रहः। न केवलमनेषितादिग्रहण-भोगौ किन्तु गमना-ऽऽगमनादौ पृथिव्यादि-जन्तुविराधनाऽपि भवति तथापि तत्र प्रायश्चित्तं यथोक्तलक्षणम्, तदुभयमिति वर्त्तते, सहसाकारादिविषयत्वात् ॥ १०५ ॥

सम्प्रति 'महव्वयाइयारे य [गाथा-९९]' इत्येतद् व्याख्यानयन्नाह—

स[1]हसाकार अइक्कम-वइक्कमे चेव तह य अइयारे ।
[2]होइ चसद्दग्गहणा, पच्छित्तं तदुभयं तिसु वि ॥ १०६ ॥
अतियारुवयोगे वा, एगयरे त[3]त्थ होइ आसंका ।
नवहा जस्स विसोही तस्सुवरिं छण्ह बज्झं तु ॥ १०७ ॥

**सहसाकारतः** सहसाकरणतः **अतिक्रमे व्यतिक्रमे अतिचारे च** प्राग्व्यावर्णितस्वरूपे, महाव्रतविषये इति सामर्थ्याद् गम्यते, 'महव्वयाइयारे य' [गा. ९९] इतिपदस्य व्याख्यायमानत्वात्, एतेषु **त्रिष्वपि** दोषेषु **तदुभयम्** उक्तस्वरूपं **प्रायश्चित्त**मिति योगः। अथ मूलगाथायां 'महाव्रतातीचारे च' इत्येवोक्तं ततः कथमत्र विवृतम् 'अतिक्रमे व्यतिक्रमे च' इति? अत आह-**चशब्दग्रहणात्,** किमुक्तं भवति ? चशब्दग्रहणतः मूलगाथायामप्यतिक्रम-व्यतिक्रमयोरपि समुच्चयः कृत इत्यदोषः। अथवा **अतिचारस्य** पर्यन्तग्रहणादतिक्रमव्यतिक्रमयोरपि **उपयोगे** स्फुटबुद्ध्या करणे तदुभयं प्रायश्चित्तमिति योगः। **वाशब्दो** भिन्नक्रमत्वाद् **एगयरे** इत्यत्र योजनीयः। ततोऽयमर्थः— **एकतरस्मिन् वा**

१. सहसकार-तिसृष्वपि भाष्यप्रतिषु ॥ २. भवइ-तिसृष्वपि भाष्यप्रतिषु ॥ ३. जत्थ - जेभा० ॥

**तत्र** अतिक्रमे व्यतिक्रमे अतिचारे वा यदि **भवत्याशङ्का,** यथा मया अतिक्रमः कृतो न वा? व्यतिक्रमो कृतो न वा? अतिचारः कृतो न वा? इति, तत्रापि तदुभयं प्रायश्चित्तम्, इह सहसाकारा-ऽऽशङ्के 'संकिए सहसागारे' [गा.९९] पदद्वयेनापि गते, केवलं महाव्रतानामतिक्रमादिष्वप्याशङ्कायां सहसाकारे चैतदेव प्रायश्चित्तं नान्यत् परिकल्पनीयमिति भाष्यकृता सहसाकाराऽऽशङ्के अपि योजिते, 'छण्हं ठाणाण बज्झतो' (गा. ९९) इति व्याख्यानयन्नाह-**नवहे**त्यादि, **यस्या**चार्यस्य मतेन अनवस्थित-पाराञ्चितयोरैक्यविवक्षणात् नवधा नवप्रकारा **विशोधिः** प्रायश्चित्तं, तस्य आद्यप्रायश्चित्तद्वयस्योपरि यद् वर्त्तते, प्रायश्चित्तं तत् **षण्णा**मुपरितनानां **बाह्य**मेव, **तु**शब्दस्यैवकारार्थत्वात्, ततः 'छण्हं ठाणाण बज्झतो' इति **तदुभयं** प्रायश्चित्तं प्रतिपत्तव्यमिति ॥ १०६-१०७ ॥ उक्तं तदुभयार्हं प्रायश्चित्तम्। इदानीं विवेकार्हमाह—

**कडजोगिणा उ[१] गहियं, सेज्जा-संथार-भत्त-पाणं वा ।**
**अ[२]प्फासु णेसणिज्जं, नाउ विवेगो उ पच्छित्तं ॥ १०८ ॥**



---

१. य-मो॰॥ २. अप्फासु एसणि चतुसृष्वपि टीका प्रतिषु । अप्फासु अणेस॰ जेभा॰खंभा॥

कृतयोगी नाम गीतार्थः। कश्च गीतार्थः? उच्यते—वस्त्र-पात्रादि-पिण्ड-शय्यैषणाध्ययनानि छेदसूत्राणि च सूत्रतोऽर्थतः तदुभयतो वा येन सम्यगधीतानि स गीतार्थः। तेन **कृतयोगिना** श्रुतोपदेशाऽनुसारिपरिणामपरिणतेन '**शय्या**' उपाश्रयः, उपाश्रयग्रहणात् तृण-डगलक-मल्लकादिपरिग्रहः, तेषामपि प्रायस्तत्रैव सम्भवात्। **संस्तारकः** प्रतीतः, संस्तारकग्रहणं सकलौघिकौपग्रहिकोपलक्षणम्। **भक्त**मशनं, **पानं** सौवीरादि। **वा**शब्दात् खादिमं स्वादिमं वा **गृहीतं,** पश्चात् कथमपि **अप्रासुकमनेषणीयं वा ज्ञातं, तत्र प्रायश्चित्तं** तस्य गृहीतस्य शय्यादे '**विवेकः**' परित्यागः। उक्तं च— "**तं सेज्जाइयं विहिणा सुओवदिट्ठेण विगिंचमाणो परिसुद्धो**" इति ॥१०८॥

**पउरण्ण-पाणगामे किं साहु न ठंति? सावए पुच्छा ।**
**नत्थि वसहित्ति पकया ठिएसु अतिसेसिय विवेगो ॥ १०९ ॥**

केचित् साधवः **प्रचुरान्नपाने ग्रामे** गताः, तत्र च वसतिर्दुष्प्रापा, नोचिता लभ्यते इति न स्थिताः। ततः **सावए पुच्छा** इति षष्ठी-सप्तम्योरर्थं प्रत्यभेदात् श्रावकस्य तथाविधाऽभिनवदीक्षितस्य पार्श्वे पृच्छा अभवत्, यथा- किमिति '**साधवो नात्र तिष्ठन्ति?**' स प्राह- '**नास्त्यत्र वसतिरिति**' कृत्वा। ततः साधुषु गतेषु श्रावकैः

पर्यालोच्य वसतिः **'प्रकृता'** प्रकृष्टा कृता। तस्यां च कृतायां कालान्तरेण ते वाऽन्ये वा साधवः समागताः, तत्र स्थिताः। स्थितेषु च कतिपयदिनातिक्रमे **अतिशेषितं** ज्ञातं, ज्ञाते च सति तत्र प्रायश्चित्तं **विवेकः।** किमुक्तं भवति?- ज्ञाते सति तां वसतिं परित्यजन्तस्ते शुद्धा इति। उपलक्षणमेतत्, तेन एतदपि द्रष्टव्यम्- अशठभावेन गिरि-राहु-मेघ-महिका-रजः समावृते सवितरि [१]उद्गतबुद्ध्या अनस्तमितबुद्ध्या वा गृहीतमशनादिकं, पश्चाद् ज्ञातम्-अनुद्गते अस्तमिते वा सूर्ये गृहीतं; तथा प्रथमपौरुष्यां गृहीत्वा चतुर्थीमपि पौरुषीं यावद् धृतमशनादि; शठभावेनाऽशठभावेन वा अर्धयोजनातिक्रमेण नीतमानीतं वाऽशनादि; तत्र विवेक एव प्रायश्चित्तमिति। शठाऽशठयोश्चेदं लक्षणम्- इन्द्रिय-विकथा-माया-क्रीडादिभिः कुर्वन् शठः, ग्लान-सागारिका-ऽस्थण्डिल-भयादि[२]कारणतोऽशठ इति ॥१०९॥ उक्तं विवेकार्हं प्रायश्चित्तम्। सम्प्रति व्युत्सर्गार्हमाह—

**गमणाऽऽगमण-वियारे, सुत्ते वा सुमिणदंसणे राओ ।**
**नावा नइसंतारे, पायच्छित्तं विउस्सग्गो ॥ ११० ॥**

---

१. उद्गमित° वा° पु°॥ २. १. करणतो - CB3॥

गमनमुपाश्रयात् गुरुमूलाद्वा बहिर्गमनं, भूयः स्वोपाश्रये गुरुपादमूले वा बहिःप्रदेशात् प्रत्यावर्त्तनमागमनम्। गमनं चाऽऽगमनं च गमनागमनं, समाहारो द्वन्द्वः, गमनपूर्वमागमनं गमनागमनं, गमनागमनं च गमनाऽऽगमनं च **गमनागमने, 'स्यादावसंख्येय'[ मलय.**ना.९-३] इत्येकशेषः, तयोस्तत्र । यदा भक्ताद्यर्थमन्यस्मिन् ग्रामे गतः सन् विश्रामणनिमित्त-मासितुकामः, अथवा यावन्नाद्यापि वेला भवति तावत् प्रतीक्षितुकामः यदि वा प्रथमालिकां कर्तुकामो यदा शून्यगृहादिषु प्रविशति तदैवमादिषु प्रयोजनेषु गमनमात्रेऽपि ऐर्यापथिकी-प्रतिक्रमणपुरस्सरं कायोत्सर्गः प्रायश्चित्तम्। तदनन्तरं कार्यसमाप्तौ भूयः स्वोपाश्रयप्रवेशे आगमनमात्रे कायोत्सर्गः। शेषेषु तु प्रयोजनेष्वपान्तराले विश्रामणाऽसम्भवे गमनाऽऽगमनयोरिति, **वियारे** इति विचारो नाम-उच्चारादिपरिष्ठापनं, तत्रापि प्रायश्चित्तं कायोत्सर्गः। **सुत्ते वा** इति सूत्रविषयेषु उद्देश-समुद्देशा-ऽनुज्ञा-प्रस्थापन-प्रतिक्रमण-श्रुतस्कन्धा-ऽङ्गपरिवर्त्तनादिष्वविधिसमाचरणपरिहाराय प्रायश्चित्तं कायोत्सर्गः। वा समुच्चये। **सुमिणदंसणे राओ** इति, उत्सर्गतो दिवा स्वप्तुमेव न कल्पते ततो रात्रिग्रहणं, रात्रौ स्वप्नदर्शने प्राणातिपातादिसावद्यबहुले कदाचिदनवद्यस्वप्नदर्शने वा अनिष्टसूचके,

उपलक्षणमेतत् दुश्शकुन-दुर्निमित्तेषु वा तत्प्रतिघातकरणार्यं[१] कायोत्सर्गकरणं प्रायश्चित्तम्। **नावा नइसंतारे** इति, नौश्चतुर्द्धा, तद्यथा–समुद्रनौः१, उद्यानी२, अवयानी३, तिर्यग्गामिनी४ च। तत्र समुद्रनौः प्रवहणं, येन समुद्रो लङ्घ्यते १। शेषास्तिस्रो नद्यां, तत्रापि या नद्याः प्रतिस्रोतोगामिनी सा उद्यानी २। अनुस्रोतोगामिनी अवयानी ३। या पुनर्नदीं तिर्यक् छिनत्ति सा तिर्यग्गामिनी ४। तत्र यतनयोपयुक्तस्य यथायोगं चतुर्विधयापि नावा तथाविधप्रयोजनोत्पत्तिवशतो गमने सूत्रोक्तविधिना कायोत्सर्गः प्रायश्चित्तम्। नदी-सन्तारश्चतुर्विधः, तत्र पादाभ्यां त्रिधा, तद्यथा सङ्घट्टः१ लेपः२ तदुपरि३ च। तत्र जङ्घार्द्धप्रमाणे उदकसंस्पर्शे संघट्टः१। नाभिप्रमाणे उदकसंस्पर्शे लेपः२। तत उपरि उदकसंस्पर्शे तदुपरि ३। चतुर्थो नदीसंस्तारो बाहूडुपादिभिः । एतेष्वपि सर्वत्र यतनयोपयुक्तस्य **प्रायश्चित्तं** कायोत्सर्गः। **व्युत्सर्गः** कायोत्सर्ग इत्यनर्थान्तरम् । एष गाथासंक्षेपार्थः ॥ ११० ॥ साम्प्रतमेनामेव गाथां विवरीषुर्येषु स्थानेषु गमनमागमनं गमनाऽऽगमनं वा प्रतिक्रमणीयं सम्भवति, यो वा विचारविषयः, यत्प्रमाणं च तत्र कायोत्सर्गः प्रायश्चित्तं तदेतदुपदर्शयन्नाह—

**१. ॰च प्रायश्चित्तं कायोत्सर्गः ना॰ वा॰ पु॰ ॥**

**भत्ते पाणे सयणाऽऽसणे अ अरहंत[1]-समणसेज्जासु ।**
**उच्चारे पासवणे, पणवीसं[2] होंति ऊसासा ॥ १११ ॥**

**भक्ते पाने शयनासने च 'अरहंत[3]-समणसेज्जासु'** इति, शय्याशब्दः प्रत्येकमभिसम्बध्यते, अर्हच्छय्यायामर्हद्भवने, श्रमणशय्यायां-श्रमणोपाश्रये, गमनमागमनं गमनाऽऽगमनं च प्रतिक्रमणीयं सम्भवति । **उच्चार-प्रश्रवणयोस्तु,** हस्तशताद्बहिर्गत्वा परिस्थापने गमनागमनेऽन्तर्भावः, हस्तशताभ्यन्तर एव तद्व्युत्सर्गे तन्मात्रकपरिष्ठापने[4] वा विचारविषये, एतेषु च सर्वेष्वपि स्थानेषु कायोत्सर्गप्रायश्चित्तस्य प्रमाणं **भवति पञ्चविंशतिरुच्छ्वासाः** ॥ १११ ॥ तत्र भक्ते पाने वा कथं गमनमात्रं प्रतिक्रमणीयं सम्भवति? इति तत्सम्भवप्रतिपादनार्थमाह—

**वीसमण असइ काले, पढमालिय-वास-संखडीए वा**
**इरियावहियट्ठाए, गमणं तु पडिक्कमंतस्स ॥ ११२ ॥**

१. अरिहंत॰ वा॰ पु॰ २.पणुवीसं - तिसृष्वपि भाष्यप्रतिषु ॥ ३. अरिहंत वा॰ पु॰ ॥ ४. परिष्ठापने - मु.। परि स्थापने - खं॰ ॥

यदा भक्तार्थं पानार्थं वा भिक्षाचर्यया[1] ग्रामान्तरं गत्वा मार्गगमनसमुत्थपरिश्रमजयाय **विश्राम्यति। असति कालेत्ति** अथवा असति भिक्षाकाले यावत् भिक्षावेला भवति तावत्प्रतीक्षितुकामः। **पढमालियत्ति** यदि वा क्षुधापीडितः सन् प्रथमालिकां कर्तुकामो यत्र शून्यगृहादिषु प्रविशति। **वासत्ति** अथवा तस्मिन्नन्यस्मिन् वा ग्रामे भिक्षामटतोऽन्तरा वर्षं पतितुमारब्धं, ततः छन्नं किमपि स्थानं प्रविश्य तत्राऽऽसितुकामः। **संखडीए वा** इति सङ्खड्यां वा अप्रमाणायां ध्रुवं भूयान् लाभ इति ज्ञात्वा क्वचिदन्यत्र प्रतीक्षितुमिच्छुर्भवति तदा तस्य **ऐर्यापथिकार्थं**-ईर्यापथिकपापविशुद्ध्यर्थं **गमनं प्रतिक्रामतो** गमनविषयं प्रतिक्रमणं कुर्वतः कायोत्सर्गः प्रायश्चित्तं, स च कायोत्सर्गः पञ्चविंशत्युच्छ्वासप्रमाणः, 'उच्छ्वासाश्च पादसमा' इति पञ्चविंशतेश्चतुर्भिः भागे हृते षट् श्लोका एकपादाधिका लभ्यन्ते, ततश्चतुर्विंशतिस्तवः 'चंदेसु निम्मलयरा' इति पादपर्यन्तः कायोत्सर्गे चिन्तनीय इति भावः ॥ ११२ ॥

**एमेव सेसएसु वि, होइ निसज्जाए अंतरे गमणं ।**
**आगमणं जं तत्तो, निरंतरगयागयं होइ ॥ ११३ ॥**

१. ०चर्याया - पु० प्रे० ॥

**एवमेव** भक्त-पानयोरिव **शेषेष्वपि** स्थानेषु शयना-ऽऽसनादिषु यावन्नाद्यापि वेला भवति तावद् यत् प्रतीक्षणं तदेतदत्रान्तरम्, तस्मिन् **अन्तरे निषद्यायाम**मुपवेशने केवलं **गमनं** प्रतिक्रमणीयं भवति। तथाहि–शयनं नाम–संस्तारकादि, आसनं नाम–पीठकादि, तद्याचनार्थं क्वचनापि गतः, तत्र ग्लानचारत्वादिभिः[1] कारणैः शरीरदुर्बलतया जातपरिश्रमो विश्रमितुकामः, संस्तारकादिप्रभुर्वा न विद्यते क्वचिदन्यत्र गतत्वात्, ततस्तं प्रतीक्षितुकाम[2] ऐर्यापथिकपापविशोधनाय गमनं प्रतिक्रमतीति। **आगमणं जं तत्तो** इति एवं भक्त-पानाद्यर्थं विश्रम्य कार्यसमाप्तौ ततः स्थानाद् यदा भूयः स्वोपाश्रये प्रत्यावर्त्तते तदा केवलमागमनं प्रतिक्रमणीयं भवति । यदि पुनरेतेष्वेव प्रयोजनेषु नोक्तप्रकारेणाऽपान्तराले विश्रमणं भवति तदा **निरन्तरे** उक्तलक्षणस्याऽन्तरस्याभावे **गतागतं** गमनागमनं समुदितं प्रतिक्रमणीयं जायते। एवमर्हत्श्रमणशय्यास्वपि गमनमागमनं गमनागमनं च प्रतिक्रमितव्यं भावनीयम्। तद्यथा– पाक्षिकादिषु जिनभवनादौ चैत्यवन्दको गत्वा यदा स्नानादिदर्शननिमित्तं[3]मैर्यापथिकीं प्रतिक्रम्य विश्राम्यति तदा केवलं गमनमेव प्रतिक्रमणीयं, ततः स्वोपाश्रये प्रत्यायातावागमनं

१. ०चरित्वा० मो० । चारित्वा० मु० ॥ २. ० म ईर्या० खं० ॥ ३. त्तमीर्या० खं० ॥

प्रतिक्रमणीयं, [४]विश्रमणाऽसम्भवे गमनागमनमिति । तथा पाक्षिकादौ येऽन्यवसतिषु सुसाधवस्तेऽवश्यं वन्दनीया इति विधिः, ततस्तत्र वन्दको गतो यदा विश्राम्यति तदा गमनं, ततः स्वोपाश्रये प्रत्यागमने आगमनं, विश्रमणाभावे गमनागमनं प्रतिक्रमणीयमिति। उच्चारे प्रश्रवणे च हस्तशताद् बहिर्व्युत्सृष्टेऽपान्तराले प्रायो विश्रामणाऽसम्भवात् गमनागमनं समुदितं प्रतिक्रमणीयं भवति, यदाऽपि हस्तशतस्याभ्यन्तरे उच्चारं प्रश्रवणं तन्मात्रकं वा परिष्ठापयति तदापि 'वियारे'[गा.१०१] इति वचनात् ऐर्यापथिकीप्रतिक्रमणपुरस्सरः पञ्चविंशत्युच्छ्वासप्रमाणः कायोत्सर्गः प्रायश्चित्तम् ॥ ११३ ॥ सम्प्रति 'सुत्ते' इति पदं व्याचिख्यासुराह—



**उद्देससमुद्देसे, सत्तावीसं तहा अणुन्नाए ।**
**अट्ठेव य ऊसासा पट्ठवण-पडिक्कमणमादी ॥ ११४ ॥**

**उद्देशः**- वाचना, सूत्रप्रदानमित्यर्थः, **समुद्देशः**- व्याख्या, अर्थप्रदानमिति भावः, **अनुज्ञा**-सूत्रार्थयोरन्यप्रदानं प्रत्यनुमननम्, एतेषु। **तथे**तिशब्दोऽनुक्तसमुच्चयार्थः, तेन

१. विश्रामणा० वा० मो० पु० ॥

श्रुतस्कन्धपरिवर्त्तने अङ्गपरिवर्त्तने च कृते तदुत्तरकालमविधिसमाचरणपरिहाराय प्रायश्चित्तं कायोत्सर्गः **सप्तविंशत्युच्छ्वासप्रमाणः**, पर्यन्तैकपादहीनः समस्तश्चतुर्विंशतिस्तवस्तत्र चिन्तनीय इति भावः। **अट्ठेव य** इत्यादि, **प्रस्थापनं** स्वाध्यायस्य, **प्रतिक्रमणं** कालस्य, तयोः करणे कायोत्सर्गः प्रायश्चित्तमष्टावेवो**च्छ्वासा** अष्टोच्छ्वासप्रमाणः। **आदि**शब्दात् पानकमपि परिष्ठाप्य ऐर्यापथिकी प्रतिक्रमणोत्तरकालं कायोत्सर्गोऽष्टोच्छ्वासप्रमाणः करणीय इति द्रष्टव्यम्। एतच्चास्यैव **व्यवहारस्य** [1]**चूर्णौ** दृष्ट्वा लिखितमिति ॥ ११४ ॥ अत्रैवाक्षेपमभिधित्सुराह—

[2]**पुव्वं पट्ठवणा खलु, उद्देसाई पच्छओ होंति ।**
**पट्ठवणुद्देसादिसु अणाणुपुव्वी कया किन्नु ? ॥ ११५ ॥**

ननु **पूर्वं प्रस्थापना खलु** स्वाध्यायस्य क्रियते, **पश्चादुद्देशादयो भवन्ति,** ततः **प्रस्थापनोद्देशादिषु**[3] व्यवस्थितेषु **किन्नु** इत्याक्षेपे किमर्थं ननु **अनानुपूर्वी** अनन्तरगाथायां कृता? किमिति पश्चात् गाथायां पूर्वमुद्देशादय उक्ताः? तदनन्तरं प्रस्थापनम् इति भावः। नैष दोषः मतान्तरेणैवंरूपाया अप्यानुपूर्व्याः सम्भवात् ॥ ११५ ॥ तथा चाह—



---

**१. तथा च चूर्णिः - ''आदिग्गहणेणं पाणगं पि परिट्ठवेत्ता ईरियावहियाए पडिक्कमितव्वं'' ॥ २. नास्तीयं गाथा चूर्णौ ॥ ३. ०षु प्रस्थापनानन्तरमुद्देशादिषु व्य० B3 ॥**

**अज्झयणाणं तितयं पुव्वुत्तं पट्ठविज्जई जेहिं ।**
**तेसिं उद्देसादी, पुव्वमतो पच्छ पट्ठवणा ॥ ११६ ॥**

यैराचार्यैरध्ययनानाम्, उपलक्षणमेतद्, उद्देशक-प्राभृतादीनां च, **त्रितयं** उद्देश-समुद्देशाऽनुज्ञालक्षणं **पूर्वोक्तं** पूर्वप्रवर्त्तितं **प्रस्थाप्यते** उद्देशादिषु कृतेषु **पश्चात्तेषां प्रस्थापना** यैराचार्यैरुपवर्ण्यते तेषां मतेनायमेव क्रम[१]: इति वाक्यशेषः, अतः प्राग्गाथायां पूर्वमुद्देशादयः उक्ताः पश्चात् प्रस्थापनेति ॥ ११६ ॥ सम्प्रति 'सुत्ते वा' [गा. ११०] इति वाशब्दसमुच्चितं दर्शयति—

**सव्वेसुं खलियादीसुं, झाएज्जा पंचमंगलं ।**
**दो सिलोगे व चिंतेज्जा, एगग्गो वा वि तक्खणं ॥ ११७ ॥**

इह यदि बहिर्गमने प्रयोजना[२]न्तरप्रारम्भे वा वस्त्रादेः स्खलनं भवति, [३]आदिशब्दात् शेषाऽपशकुन-[४]दुर्निमित्तपरिग्रहः, तेषु **सर्वेषु स्खलितादिषु** समुपजातेषु विवक्षितप्रयो-

१. क्रमतः - C ॥ २. °नानन्तर° वा. मो. पु. ॥ ३. आदिग्रहणात् - वा. पु. ॥ ४. °दुर्निमित्तादिप° वा. ॥



For Private And Personal Use Only

जनव्याघातसूचकेषु समुद्गतेषु तत्प्रतिघातनिमित्तं **पञ्चमङ्गलम्** अष्टोच्छ्वासप्रमाणं नमस्कारसूत्रं **ध्यायेत्** , यदि वा यौ वा तौ वा स्वाध्यायभूतौ **द्वौ श्लोकौ चिन्तयेत्,** अथवा यावता कालेन द्वौ श्लोकौ चिन्त्येते **तत्क्षणं** तावन्तं कालम् **एकाग्रः** कायोत्सर्गस्थः सन् शुभमना भूयात् ॥ ११७ ॥

**बिइयं पुण खलियादिसु, उस्सासा होंति[1] तह य सोलस य ।**
**तइयम्मि उ बत्तीसं[2], चउत्थंमि न गच्छए अण्णं ॥ ११८ ॥**

**द्वितीयं** वारं **पुनस्तथा** तेनैव प्रकारेण **स्खलितादिषु** विवक्षितप्रयोजनव्याघातसूचकेषु समुद्भूतेषु तत्प्रतिघातनिमित्तं कायोत्सर्गे **उच्छ्वासाः षोडश भवन्ति,** षोडशोच्छ्वासप्रमाणः कायोत्सर्गः क्रियते इति भावः। **तइयम्मि उ** इत्यादि, तृतीये वारे-तृतीयस्यां वेलायां स्खलितादिषु जातेषु तत्प्रतिघातनिमित्तं कायोत्सर्गे **द्वात्रिंशदु**च्छ्वासाः प्रतिक्षपणीयाः। **चतुर्थे** वारे स्खलितानां प्रवृत्तौ स्वस्थानात् विवक्षितादन्यत् स्थानं **न गच्छति**। उपलक्षणमेतत्

१. ०ति सो लस य- जेभा. खंभा. ॥ २. बत्तीसा- खं. विना सर्वासु टीकाप्रतिषु भाष्यप्रतिषु च ॥

नाप्यन्यत् प्रयोजनं प्रारभते, अवश्यम्भाविविघ्नसम्भवात् ॥ ११८॥ सम्प्रति 'सुमिणदंसणे रातो' [गा. ११०] इति व्याख्यानयन्नाह—

**[१]पाणवह-मुसावादे, अदत्त-मेहुण-परिग्गहे सुमिणे ।**
**[२]संयमेगं ति अणूणं ऊसासाणं झवेज्जासि ॥ ११९॥ [मूलाचार ६६१]**

**प्राणवधे मृषावादे अदत्तादाने मैथुने परिग्रहे च स्वप्ने** कृते कारिते अनुमोदिते च, केवलं मैथुने कारितेऽनुमोदिते एव, स्वयं कृते तु 'इत्थीविप्परियासे' [गा.१२०] इत्यादिना प्रायश्चित्तस्य वक्ष्यमाणत्वात्, कायोत्सर्गः प्रायश्चित्तम्। तत्र कायोत्सर्गे **शतमेकमन्यून-मुच्छ्वासानां** क्षपयेत्, पञ्चविंशत्युच्छ्वासप्रमाणं चतुर्विंशतिस्तवं चतुरो वारान् **ध्यायेद्** इति भावः ॥ ११९ ॥ अथवा अपरः प्रकारस्तमेव दर्शयति—

**महव्वयाइं झाएज्जा सिलोगे पंचविंसति ।**
**इत्थीविप्परियासे तु सत्तावीससिलोइओ ॥ १२० ॥**

१. पाणिवह - खं. पु. B3॥ २. अट्ठसदं-मूलाचारे - अष्टोत्तरशतं तत्र वसुदनन्दीटीकायाम् ॥

**महाव्रतानि दशवैकालिक**श्रुतबद्धानि [अध्य० ४ सू.] कायोत्सर्गे **ध्यायेत्,** तेषामपि प्रायः पंचविंशतिश्लोकप्रमाणत्वात्। यदि वा यान् तान् वा स्वाध्यायभूतान् पञ्चविंशतिश्लोकान् ध्यायेत्। **स्त्रीविपर्यासे** पुनः स्वप्नसम्भूते प्रायश्चित्तं कायोत्सर्गः **सप्तविंशतिश्लोकिकः** सप्तविंशतिश्लोकान्[1] अष्टोत्तरशतमुच्छ्वासानां तन्निमित्ते कायोत्सर्गे क्षपयेदिति भावः ॥ १२० ॥ उत्सर्गे प्रमाणमेव निरूपयति—

**पायसमा ऊसासा, कालपमाणेण होंति नायव्वा ।**
**एयं कालपमाणं, काउस्सग्गे मुणेयव्वं ॥ १२१ ॥**

**उच्छ्वासाः कालप्रमाणेन भवन्ति ज्ञातव्याः पादसमाः**। किमुक्तं भवति? यावता कालेनैकः श्लोकस्य पादश्चिन्त्यते तावत्कालप्रमाणः कायोत्सर्गे उच्छ्वास इति। **एतत् कालप्रमाणम्** उच्छ्वासानां **कायोत्सर्गे ज्ञातव्यम्** ॥१२१॥

अथ ध्यानं योगनिरोधात्मकं, **"ध्यै योगनिरोधे"** इति पूर्वमहर्षिवचनात्। तच्च योगनिरोधात्मकं ध्यानं त्रिधा। तद्यथा- काययोगनिरोधात्मकं १, वाग्योगनिरोधात्मकं २,

१. ॰शतिश्लोकवान्- खं. मो. ॥

मनोयोगनिरोधात्मकं ३, च। तत्र कायोत्सर्गे किं ध्यानम् ? उच्यते- त्रिविधमपि, मुख्यतस्तु कायिकम् । तथा चाह—

**कायचेट्ठं निरुंभित्ता, मणं वायं च सव्वसो।**
**वट्टई काइए झाणे, सुहुमुस्सासवं मुणी ॥ १२२ ॥**

**कायचेष्टां** कायव्यापारं तथा **मनो वाचं च सर्वशः** सर्वात्मना **निरुध्य** कायोत्सर्गः क्रियते। ततः कायोत्सर्गस्थो मुनिः **सूक्ष्मोच्छ्वासवान्**-उपलक्षणमेतत्, सूक्ष्मदृष्टि-सञ्चारादिवांश्च, न खलु कायोत्सर्गे सूक्ष्मोच्छ्वासादयो निरुध्यन्ते, तन्निरोधस्य[2] कस्यापि कर्तुमशक्यत्वात्, **वर्त्तते कायिके ध्याने**। एतच्चैवमुच्यते, तस्य स्पष्टमुपलक्ष्यमाणत्वात्, यावता पुनर्वाचिक-मानसे अपि ध्याने द्रष्टव्ये ॥ १२२॥ तथा चाह—

**न विरुज्झंति उस्सग्गे, झाणा[3] वाइय-माणसा ।**
**तीरिए पुण[4] वुस्सग्गे तिण्हमन्नयरं[5] सिया ॥ १२३ ॥**

---

१. ॰स्य कर्तुं॰ वा. मो. पु. मु. ॥ २. झाणे वाइय-माणसे -खं.॥ ३. पुण उस्सग्गे -तिसृष्वपि भाष्यप्रतिषु मुद्रिते च ॥ ४. ॰न्नयरे-चतसृष्वपि टीकाप्रतिषु मुद्रिते च ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**न विरुध्येते उत्सर्गे** कायोत्सर्गे **ध्याने वाचिक-मानसे,** वाङ्-मनोयोगयोरपि विषयान्तरतो निरुध्यमानत्वात्,[1] सूत्रे च द्वित्वेऽपि बहुवचनं प्राकृतत्वात्। उक्तं च- "बहु**वयणेण दुवयणं**"-इति। तीरं सञ्जातमस्येति **तीरितः**- परिपूर्णे सति सम्यग्विधिना पारितः, तस्मिन् **तीरिते कायोत्सर्गे पुनस्त्रयाणां** ध्यानानाम**न्यतरत्** अन्यतमत् **स्यात्** । न पुनस्त्रितयमपि, भङ्गिकश्रुतगुणनव्यतिरेकेण प्रायोऽन्यत्र व्यापारान्तरे ध्यानत्रितयासम्भवात् ॥१२३ ॥ अथ यथा कायोत्सर्गे ध्यानलक्षणो गुणस्तथा किमन्येपि गुणाः सम्भवन्ति किंवा न? इति, उच्यते-सम्भवन्तीति ब्रूमः। तथा चाह—

**मणसो एगग्गत्तं,[2] जणयइ देहस्स हणइ जडत्तं ।**
**काउस्सग्गगुणा खलु, सुह-दुहमज्झत्थया चेव ॥ १२४ ॥**

कायोत्सर्गस्य गुणाः **कायोत्सर्गगुणाः खलु** अमी। तद्यथा-कायोत्सर्गः सम्यग्विधिना विधीयमानो नाम **मनसः** चित्तस्य **एकाग्रत्वं** एकालम्बनतां **जनयति,** तच्चैकाग्रत्वं परमं ध्यानं, **'जं थिरमज्झवसाणं तं झाणं'** [**ध्यानशतक** गा.] इति वचनात् । तथा **देहस्य** शरीरस्य



---

१. बहूवयणेण दुवयणं-पु. प्रे. ।'दुवयणे वहुवयणं चउत्थीविभत्तिए भण्णइ छट्ठी । दो हत्था दो पाया नमोत्थु देवाहिदेवाणं'॥ २. एक्कग्गत्तं - जेभा० खंभा० ॥ ३. हरति वि० वा० पु० ॥

For Private And Personal Use Only

जडत्वं जाड्यं हन्ति[1] विनाशयति, प्रयत्नविशेषतः परमलाघवसम्भवात्। तथा कायोत्सर्ग-स्थितानां वासीचन्दनकल्पत्वात् **सुख-दुःखमध्यस्थता** सुखे दुःखे च परैरुदीर्यमाणे राग-द्वेषाऽकरणम्, अन्यथा सम्यक्कायोत्सर्गस्यैवासम्भवात् ॥ १२४ ॥ उक्तं व्युत्सर्गार्हप्रायश्चित्तम्। इदानीं तपोर्हं वक्तव्यम्। तपश्च रात्रिन्दिवपञ्चकादारभ्य रात्रिंदिवपञ्चकादिवृद्ध्या तावन्नेयं यावत्षण्मासाः। तत्र येषु स्थानेषु रात्रिन्दिवपञ्चकं तपस्तान्युपदर्शयति—

**दंडगगहनिक्खेवे, आवसिय[2]-निसिहिया अकरणे य ।**
**गुरूणं च अप्पणामे[3], पंच राइंदिया होंति ॥ १२५ ॥**

दण्डं गृह्णन् न प्रत्युपेक्षते न प्रमार्जयतीत्येको भङ्गः१, न प्रत्युपेक्षते प्रमार्जयतीति द्वितीयः २, प्रत्युपेक्षते न प्रमार्जयतीति तृतीयः ३, प्रत्युपेक्षते प्रमार्जयतीति चतुर्थः ४। तत्राऽऽद्येषु [त्रिषु] भङ्गकेषु पश्चादानुपूर्व्या यथोत्तरं तपः-कालविशेषितो लघुर्मासः प्रत्येकं प्रायश्चित्तं, चतुर्थे चत्वारो भङ्गाः, तद्यथा- दुःष्प्रत्युपेक्षते दुष्प्रमार्जयति १ दुःष्प्रत्युपेक्षते सुप्रमार्जयति २ सुप्रत्युपेक्षते दुःष्प्रमार्जयति ३ सुप्रत्युपेक्षते सुप्रमार्जयति ४ अत्राऽऽद्येषु त्रिषु भङ्गेषु [3]पश्चादानुपूर्व्या यथोत्तरं तपः-कालविशेषितानि **पञ्चरात्रिंदिवानि**[4] प्रायश्चित्तम्।



१. आवसिया च निसीहिया। गुरुणं - जेभा० खंभा० । आवसियाए निसिहियाए य । गुरुणं - वा भा० मु. ॥ २. ०मे पंच तु ज्ञ० तिसृष्वपि भाष्यप्रतिषु ॥ ३. पश्चादनु० B3 ॥ ४. ० रात्रिन्दिवसानि -वा० मो० पु० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चतुर्थे भङ्गे शुद्धः, विधिना प्रवृत्तेः। इहाऽऽद्यास्त्रयो भङ्गका मासलघुप्रायश्चित्तविषयाः प्रस्तावादुक्ता यावता वक्ष्यमाणेषु मासिकेषु प्रायश्चित्तेषु द्रष्टव्याः। यथा दण्डकग्रहणेऽभिहितं तथा **दण्डकनिक्षेपे**ऽपि वक्तव्यम्, नवरं-निक्षेपेऽधस्ताद् भूमेरुपरि च दण्डशिरःसम्पर्क-विषयभित्तिप्रदेशे प्रमार्जना कर्त्तव्या । तथा वसतेर्निर्गच्छन् यद्यावश्यकीं न करोति वसतौ प्रविशन् वा नैषेधिकीं तत **आवश्यक्या** अकरणे **नैषिधिक्या अकरणे च** प्रत्येकं प्रायश्चित्तं रात्रिंदिवपञ्चकम्। तथा **गुरूणं च अप्पणामे** इति, अत्र प्रणामग्रहणं हस्तोत्सेधादेरुपलक्षणं, ततोऽयमर्थः- अवश्यकरणीयप्रयोजनवशतः स्वोपाश्रयाद्बहिर्विनिर्गतो भूयः प्रतिश्रये प्रविशन् 'नमो खमासमणाणं' इति न ब्रूते, प्रणामं वा न करोति, नापि हस्तस्य क्षणिकत्वेपि हस्तोत्सेधं तदा प्रायश्चित्तं रात्रिंदिवपंचकम् ॥ १२५ ॥

**वेंटियगह-निक्खेवे निट्ठुहणे आयवाओ छायं च ।**
**थंडिल्लकण्हभोमे गामे राइंदिया पंच ॥ १२६ ॥**

संस्तारक**वेण्टलिकाया ग्रहणे निक्षेपे** च प्रत्येकं दण्डक इव सप्तभङ्गकं, तत्रापि दण्डक इवाऽऽद्येषु त्रिषु भङ्गकेषु पश्चादानुपूर्व्या यथोत्तरं तपः-कालविशेषितः प्रत्येकं लघुमासः, उत्तरेषु त्रिषु भङ्गकेषु प्रत्येकं रात्रिन्दिवपञ्चकं, सप्तमे तु भङ्गे शुद्धः,



For Private And Personal Use Only

**निट्ठुहणेत्ति** निष्ठीवनादौ, इह साधवो द्विधा-गच्छगता गच्छनिर्गताश्च। तत्र ये गच्छनिर्गतास्ते नियमादनिष्ठीवका औपग्राहिकमल्लकाद्युपकरणाऽसम्भवात्। गच्छगता अपि ये विधिना निष्ठीवन्ति, ते अनिष्ठीवका एव, न प्रायश्चित्तविषयाः। अविधिना खेल-मल्लके निष्ठीवने दण्डक इव सप्त भङ्गाः, दण्डक इवैव च आद्येषु प्रत्येकं लघुमासः, उत्तरेषु त्रिषु प्रत्येकं रात्रिन्दिवपञ्चकं, सप्तमभङ्गवर्त्तिनस्त्वनिष्ठीवका एव, विधिना निष्ठीवनात्। उपरितनेष्वपि च त्रिषु भङ्गेषु यदि भूमौ [१]निष्ठीव्यति तदा मासलघु, यच्च निष्ठीवने प्राणिनां परितापनाद्युपजायते तन्निष्पन्नं च तस्य प्रायश्चित्तम्, आदिशब्दात् कण्डूयनपरिग्रहः, कण्डूयनेऽपि हि दण्डक इव सप्तभङ्गकं, तथैव प्रायश्चित्तविधिः। तथा वस्त्रादिक**मातपात् छायायां** छायाया वा आतपे संक्रामयन् न प्रत्युपेक्षते न प्रमार्जयतीत्यादयः पूर्ववत् सप्तभङ्गाः, पूर्ववदेव चाऽऽद्येषु षट्सु भङ्गेषु प्रायश्चित्तविधिः, सप्तमे तु भङ्गे शुद्धः। **थंडिल्ले**त्यादि, मार्गे व्रजन् अस्थण्डिलात् स्थण्डिले स्थण्डिलाद्वा अस्थण्डिले, तथा **कृष्णभूमात्** प्रदेशात् नीलभूमौ, नीलभूमेर्वा कृष्णभूमप्रदेशे, एवं शेषवर्णेष्वपि प्रत्येकं योजनीयम्। तथा अध्वनो **ग्रामे** ग्रामप्रवेशे ग्रामाद्वा अध्वनि संक्रामन् पादौ न प्रत्युपेक्षते न प्रमार्जयतीत्यादयो दण्डक इव प्रत्येकं सप्त भङ्गाः, दण्डक इव च प्रत्येकमाद्येषु षट्सु

---

१. निष्ठीवति - वा॰ पु॰ मु॰ ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भङ्गेषु प्रायश्चित्तविधानं, सप्तमभङ्गे तु शुद्धः ॥ १२६ ॥ सम्प्रति लाघवमपेक्षमाण-श्छेदार्हमपि प्रायश्चित्तमत्रैव विषये प्रतिपादयति—

**एएसिं अण्णयरं, निरंतरं अतिचरेज्ज तिक्खुत्तो ।**
**निक्कारणमगिलाणो, पंच उ राइंदिया छेदो ॥ १२७ ॥**

**एतेषामनन्तरोदितानां** रात्रिन्दिवपञ्चकप्रायश्चित्तविषयाणां स्थानानाम**न्यतरत्** स्थान-**मग्लानो निष्कारणं** यदि **निरन्तरमतिचरेत् त्रिःकृत्वः** त्रीन् वारान् तदा तत्पर्यायस्य **छेदः** क्रियते **पञ्चरात्रिन्दिवानि,** उपलक्षणमेतत् येष्वनन्तरोदितेषु स्थानेषु मासलघुकानि प्रायश्चित्तान्युक्तानि तेषामन्यतरत् स्थानमग्लानो निष्कारणं यदि निरन्तरं त्रीन्वारानतिचरति तदा तत्पर्यायस्य छेदो मासिक इति द्रष्टव्यम् ॥ १२७ ॥ सम्प्रति मासिकानि प्रायश्चित्तानि बिभणिषुराह—

**हरियाले हिंगुलए, मणोसिला[१] अंजणे य लोणे य ।**
**मीसगपुढविक्काए, जह उदउल्ले तहा मासो ॥ १२८ ॥**

---

१. मणोसिले - वा० मो० पु० मु० ॥



For Private And Personal Use Only

श्री व्यवहार-सूत्रम् पीठिका ७६ (B)

**यथा उदकार्द्रे तथा** इति वचनाद् एवमत्र प्रतिपत्तव्यं- यथा उदकार्द्रे उदकम्रक्षिते करे मात्रके वा भिक्षां गृह्णतः प्रायश्चित्तं लघुर्मासः तथा **हरिताल-हिंगुलक-मनःशिलाः** प्रतीताः, **अञ्जनं** सौवीराञ्जनादि, **लवणं** सामुद्रादि, एते सचित्तपृथिवीकायभेदाः, उपलक्षणमेतत्, तेन शुद्धपृथिव्यूष-गेरु-वर्णिका-सेटिका-सौराष्ट्रिक्यादयोपि सचित्तपृथिवीकायभेदाः प्रतिपत्तव्याः । तथा **मिश्रकः** सचित्ताऽचित्तरूपः कर्दमादिहरितालादिपृथिवीकायः मिश्रकः पृथिवीकायः, एतेष्वपि। किमुक्तं भवति?- एतैरपि प्रत्येकं म्रक्षिते करे मात्रके वा भिक्षामाददानस्य लघुर्मासः। एतत्पुनः सम्प्रदायादवसातव्यम्- सचित्तमिश्रपृथिवीरजोगुण्डिते सचित्त-मिश्रोदकस्निग्धे वा करे मात्रके वा भिक्षामुपाददानस्य पञ्च रात्रिन्दिवानि। उक्तं च- '**ससणिद्धे ससरक्खे पणगं**' इति। तथा वनस्पतिकायो द्विविधः परीत्तोऽनन्तकायश्च। एकैकस्य त्रयो भेदाः-पिष्टं कुकुस्साः उत्कुटितं च। पिष्टं कुक्कुसाश्च प्रतीताः, उत्कुटितश्चिञ्चनकादिः[1], तत्र त्रिविधैरपि सचित्त-मिश्र-परीत्तवनस्पतिकायैः संस्पृष्टे करे मात्रके वा भिक्षां गृह्णतो लघुर्मासः अनन्तसचित्त-मिश्रवनस्पतिकायैस्त्रिविधैरपि संस्पृष्टे गुरुमासः। पुरःकर्म्मणि पश्चात्कर्म्मणि च **केचिदाहुः** लघुमासः, **अपरे** चत्वारो

गाथा १२७-१२९ विविधानि प्रायश्चित्तानि ७६ (B)

१. ०ञ्चनकादिः - वा० मो० पु० ॥

लघवः। उक्तं च **कल्पचूर्णौ 'पुरकम्म-पच्छकम्मेहिं चउलहु'** [ ] इति ॥ १२८ ॥

**सज्झायस्स अकरणे, काउस्सग्गे तहा अपडिलेहा ।**
**पोसहिय-तवे य तहा, अवंदणये चेइयाणं च ॥ १२९ ॥**

**स्वाध्यायस्य** वाचनादेर**करणे,** सामान्यतो मासनिष्पन्नं प्रायश्चित्तमिति योगः । अत्रेयं भावना-सूत्रपौरुषीं यदि न करोति, ततो मासगुरुः[१] प्रायश्चित्तम्, अर्थपौरुषीं न करोति मासलघु, द्वे सूत्रपौरुष्यावकुर्वतो द्वौ लघुमासौ, तिसृणां सूत्रपौरुषीणामकरणे त्रयो लघुमासाः, चतसृणामपि सूत्रपौरुषीणामकरणे चतुर्मासलघु। **काउस्सग्गे** इति, अकरणे इत्यत्राप्यनुवर्त्तते, आवश्यकप्रतिबद्धकायोत्सर्गस्य, सूत्रे सप्तमी, षष्ठी-सप्तम्योरर्थं प्रत्यभेदात्, अकरणे सामान्यतो मासनिष्पन्नं प्रायश्चित्तमिति सर्वत्रापि योजनीयम्, भावना त्वत्रापीयम्-आवश्यके एकं कायोत्सर्गं न करोति मासलघु, द्वौ न करोति द्विमासलघु, त्रीन् कायोत्सर्गात्र करोति त्रिमासलघु, सकलमेवावश्यकं न करोति चतुर्मासलघु। तथा उपविष्टः सुप्तो वा यद्यावश्यकं करोति, प्रावरणप्रावृतो वा, वन्दनकानि वा आवश्यके ददाति,

१. मासलघु प्रा॰ वा॰ मो॰ पु॰ C मु॰॥

दोषैरुपेतानि वा ददाति, सर्वत्र प्रायश्चित्तं मासलघु, नवरं यत्र माया तत्र मासगुरु।

**तथा अपडिलेहा** इति, विभक्तेरत्र लोपः प्राकृतत्वात्, अप्रत्युपेक्षायांप्रत्युपेक्षणाया अकरणे, उपधेरिति सामर्थ्यादवसीयते। तत्रोपधिर्द्विधा-औघिक औपग्रहिकश्च। औघिकस्त्रिधा-जघन्यो मध्यमः उत्कृष्टश्च। तत्र जघन्यः चतुर्द्धा तद्यथा-मुखपोतिका१, पात्रकेसरिका२, गोच्छकः३, पात्रस्थापनं४, च। उक्तं च-'**मुहपोत्ती पायकेसरिया गोच्छगो पायठवणं च एस चउव्विहो जहन्नो**' () इति । मध्यमः षड्विधः। तद्यथा-पटलानि१, रजस्त्राणं२, पात्रबन्धः३, चोलपट्टः४, मात्रकं५, रजोहरणं६ च। आह च—

**'पडलाइं रयत्ताणं, पत्ताबंधो य चोलपट्टो य ।**
**मत्तग रयहरणं चिय, मज्झिमगो छव्विहो नेओ'** । ()

उत्कृष्टश्चतुर्विधः, तद्यथा-पतद्ग्रहस्त्रयः कल्पाः, उक्तं च-'**उक्कोसो चउव्विहो पडिग्गहो तिन्नि पच्छागा**' () इति।

आर्यिकाणामप्युपधिरौघिकस्त्रिविधःतद्यथा-जघन्यो मध्यम उत्कृष्टश्च, तत्र जघन्यः

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



चतुर्विधो मुखपोतिकादिरूपः प्रागुक्तः। मध्यमस्त्रयोदशविधः, तद्यथा-पात्रबन्धो १, रजोहरणं २, पटलानि ३, रजस्त्राणं ४, मात्रकं ५, कमढकः ६, अवग्रहानन्तकं ७, पट्टः ८, अर्द्धोरुकः ९, चलनिका १०, कञ्चुकः ११, अवकक्षी १२, वैकक्षी १३ । उक्तं च—

*'पत्ताबंधाइया४ चउरो, ते चेव पुव्वनिद्दिट्ठा।*
*मत्तो५ य कमढकं६ वा, तह ओग्गहणंतगं७ चेव ॥ १ ॥*

*पट्टो८ अद्धोरू९ चिय चलणिय१० तह कंचुगे११ य उगच्छी१२।*
*वेगच्छी१३ तेरसमा अज्जाणं होइ नायव्वा ॥ २ ॥ ()*

उत्कृष्टोऽष्टविधस्तद्यथा-पतद्ग्रहः१, त्रयः कल्पाः४, अभ्यन्तरनिवसनी५, बहिर्निवसनी६, सङ्घाटी७, स्कन्धकरणी८ च उक्तं च-'**उक्कोसो अट्ठविहो-चउरो ते चेव पुव्वनिदिट्ठा । जे साहूणं अण्णे य इमे चउरो-अब्भिंतरबाहिनियंसणी५-६ संघाडी७ खंधकरणी८ य**' () इति। औपग्रहिकोऽपि साधूनामार्यिकाणां च त्रिविधः। तद्यथा-जघन्यो मध्यम उत्कृष्टश्च; तत्र पीठ-निषद्या-दण्डकप्रमार्जनी-डगलक-पिप्पलक-सूची-नखरदनिका-दिर्जघन्यः, मध्यमो



For Private And Personal Use Only

दण्डकपञ्चकोच्चार-प्रश्रवण-खेल-मल्लकादिरूपः। आर्यिकाणामधिको वारकः। उत्कृष्टोऽक्षाः संस्तारक एकाङ्गिक इतरो वा। द्वितीयपदे पुस्तकपञ्चकं फलकं च। उक्तं च—

*'अक्खा संथारो वा, दुविहो एगंगिओ व इयरो वा ।*
*बिइयपए पोत्थपणगं, फलगं तह होइ उक्कोसो ॥१॥' ()*

तत्रोत्कृष्टमुपधिं यदि यथाकालं न प्रत्युपेक्षते चतुर्मासलघु, मध्यमं यदि न प्रत्युपेक्षते तदा मासगुरु, जघन्यं न प्रत्युपेक्षते पञ्चरात्रिंदिवानि; दोषैः प्रत्युपेक्षते मासलघु ।

**पोसहिय तवे य तहा** इति पोषं दधाति इति पोषधम्, अष्टमी-पाक्षिकादि, पोषधे भवं पौषधिकं, तच्च तत् तपश्च पौषधिकतपः, तस्मिन् अक्रियमाणे इति सामर्थ्यात् गम्यते, सामान्यतो मासनिष्पन्नं प्रायश्चित्तमिति योजना। तद्यथा- अष्टम्यां चतुर्थं न करोति मासलघु, पाक्षिके चतुर्थं न करोति मासगुरु, चतुर्मासके षष्ठस्याऽकरणे चतुर्मासलघु, सांवत्सरिके अष्टमं न करोति चतुर्मासगुरु। तथा एतेष्वेव अष्टमी-पाक्षिकादिषु **चैत्यानां** जिनबिम्बानां, **च**शब्दात् ये अन्यस्यां वसतौ सुसाधवस्तेषामप्य**वन्दने** मासलघु। तथा ये चैत्यभवने स्थिता वैकालिकं कालं प्रतिक्रम्य अकृते आवश्यके प्रभाते च कृते आवश्यके यदि चैत्यानि न

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वन्दन्ते तेषामपि मासलघु, उक्तं चास्यैव **व्यवहारस्य चूर्णौ**-"**एएसु चेव अट्ठमीमादीसु चेइयाइं साहुणो वा जे अण्णाए वसहीए ठिया ते न वंदंति मासलघु, जइ चेइयघरे ठिया वेयालियं कालं पडिक्कंता अकए आवस्सए, गोसे य कए आवस्सए जइ चेइए न वंदंति तो मासलहु**" इति ॥ १२९ ॥ साम्प्रतमेनामेव गाथां व्याचिख्यासुः प्रथमतः 'सज्झायस्स अकरणे' [गा.१२९] इत्येतद् व्याख्यानयति—

**सुत्तऽत्थपोरिसीणं, अकरणे मासो उ होइ गुरुलहुगो ।**
**चाउक्कालं [1]पोरिसिउवायणं तस्स चउलहुगा ॥ १३० ॥**

**सूत्रार्थपौरुष्योः** सूत्रपौरुष्याः अर्थपौरुष्या इत्यर्थः, **अकरणे** यथाक्रमं गुरुमासो लघुमासः, अर्थपौरुषी हि प्रज्ञादिविशिष्टसा[2]मग्र्यपेक्षा सूत्रायत्ता च, सूत्रपौरुषी त्वभिनव-दीक्षितेनापि जड्मतिनाऽपि च यथाशक्ति अवश्यं कर्तव्या, सूत्राभावे सर्वस्याप्यभावाद्। अतः सूत्रपौरुष्या अकरणे मासगुरु, अर्थपौरुष्या अकरणे मासलघु। द्वयोः सूत्रपौरुष्योर-करणे द्वौ लघुमासौ, तिसृणां पौरुषीणामकरणे त्रयो लघुमासा इति सामर्थ्यात् प्रतिपत्तव्यम्,

१. **पोरुसि उवातिणंतस्स -तिसृष्वपि भाष्यप्रतिषु ॥ २. सामग्रीसापेक्षा-खं॰ ॥**



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**चाउक्काल**मित्यादि, चतुष्कालं दिवारात्रिगतप्रथम-चरमप्रहररूपेषु चतुर्षु कालेषु सूत्रपौरुषी:[1] **अवपातयतो** भ्रंशयतो, अकुर्वत इत्यर्थः, **चतुर्लघुका**श्चत्वारो लघुमासाः ॥ १३० ॥ सम्प्रति 'काउस्सग्गे' इति व्याख्यानयति—

**जइ[2] उसग्गे ण कुणइ तइ मासा[3] निसण्णाए निवण्णे य ।**
**सव्वं चेवावासं न कुणइ तहियं चउलहुं ति ॥ १३१ ॥**

आवश्यके प्राभातिके वैकालिके वा **यावतः कायोत्सर्ग्गान् न करोति तति मासा**स्तस्य प्रायश्चित्तम्। एकं चेन्न करोति एको लघुमासः, द्वौ न करोति द्वौ लघुमासौ, त्रीन्न करोति त्रयो लघुमासाः, तथा **निषण्ण** उपविष्टः **निवन्नः** पतितः, सुप्त इत्यर्थः। **च**शब्दात् प्रावरणप्रावृतो वा यद्यावश्यकं करोति तदा सर्वत्र मासलघु। यदि पुनः **सर्वमेवावश्यकं न करोति तत्र चतुर्लघु** चत्वारो लघुमासाः प्रायश्चित्तम्। अधुना 'अपडिलेहा' [गा. १२९] इति व्याचष्टे—

---

१. ॰रुषीमवपा॰ खं॰ ॥ २. जइ काउस्सग्गे - C ॥ ३. मास पाउत्तग णिय ( ?स )ण्ण णिवण्णे । सव्वं-जेभा. खंभा॰ । पाओगणिसज्झा ( ?णण ) ए निवत्ते य सव्वं-वाभा॰ ॥



For Private And Personal Use Only

चाउम्मासुक्कोसे, मासिओ[1] मज्झे य पंच उ जहन्ने ।
उवहिस्स अपेहाए, एसा खलु होइ आरुवणा ॥ १३२ ॥

**उत्कृष्टे** उत्कृष्टस्य प्रागुक्तस्वरूपस्य **उपधेरप्रेक्षायाम्** अप्रत्युपेक्षायां **चत्वारो** लघु**मासाः**। **मध्ये** मध्यमस्योपधेरप्रत्युपेक्षायां लघु**मासः**। **जघन्ये** जघन्यस्य **पञ्च**रात्रिन्दिवानि। **एषा** खलु **भवति आरोपणा** प्रायश्चित्तमप्रत्युपेक्षायामिति ॥ १३२ ॥ सम्प्रति 'पोसहिय तवे य' [गा. १२९] इति व्याख्यानयति—

चउ-छट्ठ-ऽट्ठमऽकरणे, अट्ठमि-पक्ख-चउमास-वरिसे य ।
लहु-गुरु-लहुगा गुरुगा, अवंदणे चेइ-साहूणं ॥ १३३ ॥

अत्र यथासंख्येन पदयोजना, सा चैवम्- **अष्टम्यां चतुर्थस्या**ऽकरणे मासलघु, **पाक्षिके** चतुर्थस्याकरणे मासगुरु, **चतुर्मासे षष्ठस्या**ऽकरणे चत्वारो **लघु**मासाः, **सांवत्सरिके अष्टम**स्याऽकरणे चत्वारो **गुरु**मासाः। तथा एतेषु[2] वाऽष्टम्यादिषु दिवसेषु

१. मासिय मज्झे - तिसृष्वपि भाष्यप्रतिषु ॥ २. एतेषु चाष्ट॰ वा॰ मो॰ पु॰ मु. ॥

**चैत्या**नामन्यवसतिगत-**सुसाधूनां चावन्दने** प्रत्येकं मासलघु ॥ १३३ ॥ सम्प्रति लाघवार्थमत्रैव छेदार्हं प्रायश्चित्तमाह—

**एएसु [1] ति ठाणेसुं, भिक्खू जो व[2]ट्टए पमाएणं ।**
**सो मासियं तु लग्गइ, उग्घायं वा अणुग्घायं ॥ १३४ ॥**

**एतेषु** अनन्तरोदितेषु **स्थानेषु तित्ति** त्रिः त्रीन् वारान् **यो भिक्षुः प्रमादेन वर्त्तते,** प्रमादेनैषां स्थानानामन्यतरत् त्रीन्वारान् अतिचरति **स मासिकं** सामान्यतो मासनिष्पन्नं छेदम् **उद्‌घातं** लघु, **अनुद्‌घातं** गुरुकं **लगति** प्राप्नोति, यत्र यति मासा लघवो गुरवो वा तपः प्रायश्चित्तं तत्र तति मासा लघवो गुरवो वा छेद इति यावत् ॥ १३४ ॥ सम्प्रति शेषाणि यानि चातुर्मासिकानि षाण्मासिकानि वा प्रायश्चित्तानि, ये चाऽभणिताः छेदाः, यानि च मूला-ऽनवस्थित-पाराञ्चितानि तदेतत् सर्वमेकगाथया विवक्षुराह—

**छक्काय चउसु लहुगा, परित्त लहुगा य गुरुग साहारे ।**
**संघट्टण परितावण, लहुगुरुगऽतिवायणे मूलं ॥ १३५ ॥**

---

१. तिसु ठा० C प्रतौ ॥ २. वट्टती-भाष्ये लाडनू संस्करणे च ॥

गाथा १३२-१३५ स्वाध्याय-कायोत्सर्ग-तपांसि अकरणे प्राश्चित्तम्



For Private And Personal Use Only

**षट्कायाः** पृथिव्यप्-तेजोवायु-वनस्पति-त्रसकायरूपाः। तेषां मध्ये **चतुर्षु** पृथिव्यप्-तेजो-वायुरूपेषु सङ्घट्टनादिभि**र्लघुकाः** प्रायश्चित्तम्। **परीत्ते** प्रत्येकवनस्पतिकायेऽपि च **लघुकाः। साधारे** अनन्तवनस्पतिकायिके सङ्घट्टनादिषु **गुरुकाः।** तथा द्वीन्द्रियादीनां **सङ्घट्टने परितापने** च यथायोगं **लघुका गुरुकाश्च** प्रायश्चित्तम्। **अतिपातने** विनाशे **मूलम्** । इयमत्र भावना – पृथिवीकायं सङ्घट्टयति मासलघु, परितापयति मासगुरु, अपद्रावयति–जीविताद् व्यपरोपयति इत्यर्थः, चतुर्लघु। एवमप्काये तेजस्काये वायुकाये प्रत्येकवनस्पतिकाये च द्रष्टव्यम् । उक्तं च—

**'छक्कायाऽऽदिम चउसू तह य परित्तम्मि होंति वणकाए।**
**लहु-गुरुमासो चउलहु, घट्टण-परितावउद्दवणे** ॥ १ ॥'

एतत् प्रायश्चित्तमेकैकस्मिन् दिवसे सङ्घट्टनादिकरणे। यदि पुनर्द्वौ द्वौ दिवसौ पृथिव्यादीन् सङ्घट्टयति तदा मासगुरु, परितापयति चतुर्लघु, जीविताद् व्यपरोपयति चतुर्गुरुकम्। त्रीन्दिवसान्निरन्तरं पृथिव्यादीन्सङ्घट्टयति चतुर्लघु, परितापयति चतुर्गुरु, अपद्रावयति षड्लघु। निरन्तरं चतुरो दिवसान् सङ्घट्टने चतुर्गुरु, परितापने षड्लघु, अपद्रावणे

षड्गुरु, पञ्चदिवसान् निरन्तरं पृथिव्यादीनां सङ्घट्टने षड्लघु, परितापने षड्गुरु, अपद्रावणे मासिकश्छेदः। षड् दिवसान्निरन्तरं सङ्घट्टने षट्गुरु, परितापने मासिकश्छेदः, अपद्रावणे चातुर्मासच्छेदः। सप्तदिवसान्निरन्तरं पृथिव्यादीनां सङ्घट्टने मासिकश्छेदः, परितापने च चातुर्मासिकः, अपद्रावणे षाण्मासिकः। अष्टौ दिवसान्निरन्तरं पृथिव्यादीनां सङ्घट्टने चातुर्मासिकः छेदः, परितापने षाण्मासिकः, अपद्रावणे मूलम् । उक्तं च-**दोहि दिवसेहिं मासगुरुए आढवेत्ता चउगुरुते ठाइ जाव अट्ठहिं सपयं ति ॥**

अनन्तवनस्पतिकायिकं सङ्घट्टयति मासगुरु, परितापयति चतुर्लघु, अपद्रावयति चतुर्गुरु; द्विदिवसादिनिरन्तरसङ्घट्टनादिषूत्तरोत्तरैकैकस्थानवृद्धितः सप्तभिर्दिवसैर्मूलं, द्वीन्द्रियं सङ्घट्टयति चतुर्लघु, परितापयति चतुर्गुरु, अपद्रावयति षड्लघु, अत्र द्व्यादिदिवसनिरन्तर-सङ्घट्टनादिषु षड्भिर्दिवसैर्मूलम्, त्रीन्द्रियं सङ्घट्टयति चतुर्गुरु, परितापयति षड्लघु, अपद्रावयति षड्गुरु, अत्र पञ्चभिर्दिवसैर्मूलम्, चतुरिन्द्रियं सङ्घट्टयति षड्लघु, परितापयतः षड्गुरु, अपद्रावयतो मासिकश्छेदः, अत्र चतुर्भिर्दिवसैर्मूलम्। पञ्चेन्द्रियं संघट्टयतः षड्गुरु, परितापयतः छेदः, अपद्रावयतो मूलम्, अत्र द्वयोर्दिवसयोरनवस्थाप्यं, त्रिषु दिवसेषु



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पाराञ्चितमिति ॥१३५॥ तदेवमुक्तं सप्रभेदं प्रतिसेवनाप्रायश्चित्तम्। अधुना संयोजनाप्रायश्चित्तं वक्तव्यम्। अस्मिंश्च व्याख्याते 'यतः प्ररूपणापृथक्त्वम्[गा.३८] इत्येतदपि द्वारं व्याख्यातं द्रष्टव्यम्, तत्र चोदकः संयोजनादीनां भेदानां प्ररूपणापृथक्त्वमाक्षिपन्नाह—

**पडिसेवणं विणा खलु, संजोगारोवणा न विज्जंति ।**
**माया वि य पडिसेवा अइप्पसंगो य इति एक्कं ॥ १३६ ॥**

इह प्रायश्चित्तं सर्वमुत्पद्यते प्रतिसेवनातः, न खलु मूलगुणप्रतिसेवनामुत्तरगुण**प्रतिसेवनां वा विना** क्वापि प्रायश्चित्तस्य सम्भवः, 'पडिसेवियम्मि दिज्जइ पच्छित्तं इहरहा उ पडिसेहो' [गा.५२] इति वचनात्, ततः संयोजनाप्रायश्चित्तमारोपणाप्रायश्चित्तं च प्रतिसेवनामन्तरेण न भवतीति तयोः प्रतिसेवनायामेवान्तर्भावः। प्रतिकुञ्चनाप्रायश्चित्त-मपि[गा.३६] न प्रतिसेवनातः पृथगुपपन्नं, यतः प्रतिकुञ्चना नाम–माया, तथा चोक्तं '[1]**पलिउंचणं ति य माय त्ति य नियडि त्ति य एगट्ठा**' [**व्यवहारचूर्णौ**] इति। माया च

१. पालियंचणं - खं. । पलिउंचणं ति वा मायत्ति वा णियडि त्ति वा एगट्ठं-इत्येतद्रूपो व्यवहारचूर्णौ पाठः॥



For Private And Personal Use Only

प्रतिसेवना, तत एकमेव प्रतिसेवनाप्रायश्चित्तमुपपत्तिमत्, न शेषाणि त्रीणि संयोजनादीनि पृथक् प्रायश्चित्तानि। [1]अन्यच्चैवमतिप्रसंग आपद्यते, तथाहि- संयोजनादीनि त्रीणि प्रायश्चित्तानि प्रतिसेवनारूपाणि भवन्त्यपि न प्रतिसेवना भवन्ति ततः प्रतिसेवनाऽपि न प्रतिसेवना स्यात् विशेषाभावात्, अनिष्टं चैतत्, तस्मादेकमेव प्रायश्चित्तं प्रतिसेवना, न शेषाणीति ॥ १३६ ॥ एवं [2]चोदकेनाऽऽक्षिप्ते प्ररूपणापृथक्त्वे सूरिरुत्तरमाह—

**एगाहिगारिगाण वि, नाणत्तं केत्तिया व दिज्जंति? ।**
**आलोयणाविही वि य, इय नाणत्तं चउण्हं पि ॥ १३७ ॥**

**ऐकाधिकारिकाणि** नाम- एकस्मिन् शय्यातरपिण्डादावधिकृतदोषेऽनालोचिते एव यानि शेषदोषसमुत्थितानि प्रायश्चित्तानि तान्यैकाधिकारिकाणि, एकाधिकारे भवानि ऐकाधिकारिकाणि, अध्यात्मादित्वाद् इकणितिव्युत्पत्तेः, तेषामप्यैकाधिकारिकाणां **नानात्वं**, न पुनरैकाधिकारितया एकत्वमिति यथा ज्ञायते एतदर्थं संयोजनाप्रायश्चित्तं पृथगुच्यते ॥ १३७॥ नानात्वमेव गाथाद्वयेन दर्शयति—

१. अन्यथैव॰ मु. ॥ २. नोद॰ C ॥

**सेज्जायरपिंडे या, उदउल्ले खलु तहा अभिहडे य ।**
**आहाकम्मे य तहा, सत्त उ सागारिए मासा ॥ १३८ ॥**

**रण्णो आहाकम्मे, उदउल्ले खलु तहा अभिहडे य ।**
**दस मास रायपिंडे, उग्गमदोसाइणा चेव ॥ १३९ ॥**

केनापि साधुना प्रथमतः **शय्यातरपिण्ड** उपभुक्तः, तस्मिन्ननालोचित एव तदनन्तर**मुदकार्द्र**मासेवितं, ततोऽ**भ्याहृतं**, तदनन्तर**माधाकर्म्मिकम्**। एतानि चत्वार्यप्यैकाधिकारिकाणि, अधिकृत एव शय्यातरपिण्डदोषे अनालोचिते शेषदोषप्रायश्चित्तानां सम्भवात्। एतेषां चैकाधिकारिकाणामपि नानात्वं, न तु शय्यातरपिण्ड एव शेषाण्यन्तर्भवन्ति, ततः सर्वाण्यपि पृथगालोचनीयानि, न केवल एवैकः शय्यातरपिण्ड इति परिज्ञानाय संयोजना दर्श्यते। तत्र-शय्यातरपिण्डे मासलघु, उदकार्द्रेऽपि मासलघु, स्वग्रामाभ्याहृतेऽपि मासलघु, आधाकर्म्मिके चत्वारो गुरुमासाः, **'गुरुगा आहाय'** [ ]इति वचनात्, एवं शय्यातरपिण्डे अधिकृते संयोजनाप्रायश्चित्तं सप्तमासाः, तथा चाह-**सत्त उ**

**सागारिए मासा** सागारिको नाम शय्यातरः, तस्मिन्सागारिके सागारिकपिण्डे अधिकृते ऐकाधिकारिकाणामपि नानात्वात् संयोजनाप्रायश्चित्तं ससमासाः ॥ १३८॥

केनापि प्रथमतो **राज**पिण्ड उपभुक्तः, ततस्तेनैव राजपिण्डे उपभुक्ते अनालोचिते एवा**धाकर्मिक**मुपभुक्तं, तदनन्तर**मुदकार्द्रं** ततो**ऽभ्याहृत**मेवम्, एतान्यपि चत्वार्यैकाधिकारिकाणि, अधिकृत एव राजपिण्डदोषे शेषदोषाणां सम्भवात्। एतेषां च नानात्वमिति पृथगालोचनायां संयोजना दर्श्यते-राजपिण्डे चत्वारो गुरुमासाः, आधाकर्मिकेऽपि चत्वारो गुरुमासाः, उदकार्द्रे लघुमासः, अभ्याहृतेऽपि लघुमास इत्यधिकृते **राजपिण्डे उद्गमदोषादिना** उद्गमदोषेण, आदिशब्दादुत्पादनादोषेणैषणादोषेण च; चशब्दादन्येन च यथासम्भवं संयोजनायां **दसमासाः** प्रायश्चित्तम्, एवमनया दिशा तत्तद्दोषसंयोजनातः संयोजनाप्रायश्चित्तमवसातव्यम्, एवं संयोजनायामनुमतायां मा भूदपरिमाणाशङ्का इति कस्मिन् तीर्थे कति मासा दीयन्ते प्रायश्चित्तम्? इति परिज्ञानाय संयोजनात आरोपणा प्रायश्चित्तं पृथक्कृतम्, 'आलोयणाविही वि य' [गा.१३७] यद् यथा प्रतिसेवितं तत्तथैवाऽऽलोचयितव्यं, न तु मायया प्रतिकुञ्चनीयम्, अन्यथा मायया प्रतिकुञ्चने मायाप्रत्ययमधिकं मासगुरुं प्राप्नोतीत्येवं ज्ञापितः सन् यथाप्रतिसेवितमालोचयते, तत आलोचनाविधिरपि सम्यग् ज्ञापितः स्यात्,



For Private And Personal Use Only

अपिशब्दादेवं ज्ञापितोऽपि यदा माययाऽन्यथाऽऽलोचयते तदा आरोपणायां क्रियमाणायां यत्र मासलघु आभवति तत्र मासगुरु प्रदातव्यमिति ज्ञापनार्थमारोपणातः प्रतिकुञ्चनाप्रायश्चित्तं भिन्नं कृतमिति । एवमुक्तेन प्रकारेण चतुर्णामपि प्रायश्चित्तानां नानात्वमिति॥१३९॥ उक्तं संयोजनाप्रायश्चित्तं, तदुक्तौ यतः प्ररूपणापृथक्त्वमिति द्वारमप्युक्तम्।

साम्प्रतमारोपणाप्रायश्चित्तमाह—

**पंचादि आरोवण, ने( ना )यव्वा जाव होंति छम्मासा ।**
**[१]तेण पणगादियाणं, छण्हुवरिं झोसणं कुज्जा ॥ १४० ॥**

रात्रिन्दिवपञ्चकादारभ्याऽऽ**रोपणा पंचादि** रात्रिन्दिवपञ्चकादिकाः, आदिशब्दात् दश-पञ्चदश- विंशतिरात्रिन्दिव-मासिकादिपरिग्रहः, **ज्ञातव्या**- तावद् **यावत् षण्मासा भवन्ति,** नाधिकम्। यत एवं **तेन** कारणेन **षण्णां** मासानामुपरि **पणगाइयाणं**ति रात्रिन्दिव-पञ्चकादीनां **झोषणाम्** अपनयनं **कुर्यात्,** षण्मासानामुपरि यदापद्यते प्रायश्चित्तं तत्सर्वं त्यज्यते इति भावः, उक्तं च **चूर्णौ**- '**छम्मासाण परं जं आवज्जइ तं सव्वं छंडिज्जइ**'

१. तेण पर मासियाणं - वाभा० । तेण पण भासियाणं-जेभा० खंभा० ।

इति ॥१४० ॥ अत्र चोदक आह—

**किं कारणं न दिज्जइ, छम्मासाण परतो उ आरुवणा? ।**
**भणइ गुरू[1] सुण इणमो, जं कारण झोसिया सेसा ॥ १४१ ॥**

**षण्मासानां परत आरोपणाप्रायश्चित्तं न दीयते** अत्र **किं कारणम्?** आचार्यः प्रतिवचनमाह-**जं कारणं** ति '**निमित्त-कारण-हेतुषु सर्वा विभक्तय**' इति वचनाद् अत्र हेतौ प्रथमा, ततोऽयमर्थः-येन कारणेन षण्मासानां परतः शेषाणि रात्रिन्दिवपञ्चकादीनि प्रायश्चित्तानि **झोषितानि** त्यक्तानि **तत्कारणं पुनरिदं** वक्ष्यमाणं[2]मिति गुरु**र्भणति** ॥ १४१ ॥ तदेव कारणं दर्शयति—

**आरोवणनिप्फन्नं छउमत्थे जं जिणेहि उक्कोसं ।**
**तं तस्स उ तित्थम्मी ववहरणं धन्नपिडगं च ॥ १४२ ॥**

'**छाद्मस्थ्ये**' छद्मस्थकाले '**यत् जिनैः**' स्वस्वकालाऽपेक्षया '**उत्कृष्टं**' तपःकर्म्म कृतं

१. गुरु पुण इ० चतसृष्वपि टीका प्रतिषु ॥ २. ०णमेव गु० खं० ॥

श्री व्यवहार-सूत्रम् पीठिका

८५ (A)

'**तस्य**' तीर्थकरस्य **तीर्थे** '**तु**रेवकारार्थो भिन्नक्रमश्च, स चैवं योजनीयः, **तदेव** तावत्प्रमाणमेवारोपणानिष्पन्नं तपःकर्म्म व्यवह्रियते इति **व्यवहरणं,** बहुलवचनात्कर्म्मण्यनट्, व्यवहरणीयमिति भावः। किमिव? इत्यत आह– '**धान्यपिटक**मिव' धान्यप्रस्थक इव, किमुक्तं भवति? येन राज्ञा यो धान्यप्रस्थकः स्थापितस्तत्काले स एव व्यवहर्त्तव्यः, न पुरातनः, नाप्यन्यः स्वमतिपरिकल्पितः, तथा भगवतापि तीर्थकरेण येन छद्मस्थकाले यावत् प्रमाणमुत्कृष्टं तपःकर्म कृतं तस्य तीर्थे आरोपणानिष्पन्नप्रायश्चित्तमपि तावत्प्रमाणमेव व्यवहरणीयं, नाधिकम्, अन्यथा राजाऽऽज्ञाखण्डनतो राजप्रयुक्तदण्डस्य इव भगवदाज्ञाखण्डनतः संसारदण्डस्य प्रवृत्तेः ॥ १४२ ॥ एवमेव धान्यपिटकदृष्टान्तं भावयति—

**जो जया पत्थिवो होइ, सो तया धन्नपत्थगं ।**
**ठावे अन्नं पुरिल्लेणं, ववहरंते य दंडए ॥ १४३ ॥**

गाथा १४०-१४५ उत्कृष्टतपः परिमाणादि

**यो यदा पार्थिवः** पृथिवीपतिर्**भवति स तदा** स्वकाले **धान्यप्रस्थकमन्यं** स्थापयति, तस्मिंश्च **स्थापिते** ये **पुरिल्लेणं**ति, पुरातनेन, उपलक्षणमेतत्, स्वमतिपरिकल्पितेन वा **व्यवहरन्ति,** तान् तथा व्यवहरतो **दण्डयति।** एवं तीर्थकृदपि भगवान् यो यावत्प्रमाणमुत्कृष्टं

८५ (A)

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तपःकर्म्म छद्मस्थकाले कुर्वन् तपःकर्म्मपरिमाणं व्यवस्थापयति स स्वतीर्थे तावत्प्रमाणाद-धिकं तपःकर्म्म व्यवहरतः संसारदण्डेन दण्डयति । तस्मात्तस्य तीर्थे तावत्प्रमाणमेव व्यवहर्त्तव्यमिति ॥ १४३ ॥ अथ कस्य तीर्थे कियत्प्रमाणं तपःकर्म? इत्यत आह—

**संवच्छरं तु पढमे, मज्झिमगाणऽट्ठमासियं होइ ।**
**छम्मासपच्छिमस्स उ, माणं भणियं तु उक्कोसं ॥ १४४ ॥**

**प्रथमे** प्रथमतीर्थकरकाले **मानं** तपःकर्म्मपरिमाणमु**त्कृष्टं** भणितं संवत्सरमेव, तुरेवकारार्थः। **मध्यमकानां** द्वाविंशतितीर्थकृतां तपःकर्म्मपरिमाणमुत्कृष्टं भवति **अष्टमासिक**मष्टमासप्रमाणम्। **पश्चिमस्य तु** भगवतो **वर्द्ध**मानस्वामिनः तपःकर्म्मपरिमाण-मुत्कृष्टं **भणितं षण्मासाः** ॥ १४४ ॥ अत्रैव भूयः शिष्यशङ्कामाह—

**पुणरवि चोएइ ततो, पुरिमा चरमा य विसमसोहीया ।**
**किह सुज्झंती ते ऊ?, चोयग इणमो सुणसु वोच्छं ॥ १४५ ॥**

एवमनन्तरोदिते सूरिणाऽभिहिते **पुनरपि** शिष्य**श्चोदयति** प्रश्नयति-यदि नामैवं ततः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**पूर्वाः** आदितीर्थकरतीर्थवर्त्तिन**श्चरमाः** पश्चिमतीर्थकरतीर्थवर्त्तिनो **विषमशोधिका** विषम-प्रायश्चित्ता अभवन्। ततः **कथं ते** विषमशोधिका अविशेषेण **शुद्ध्यन्ति** सर्वात्मना शुद्धिमासादयन्ति?, न खलु कारणवैषम्ये कार्यमविषमं दृष्टम्, अत्र तु विषमं प्रायश्चित्तं, विशोधिस्तु सर्वेषामप्यविशेषेण तुल्या, ततो दुर्घटमेतदिति भावः । अत्र सूरयः-यत् प्रायश्चित्तवैषम्ये कारणं, यथा च कारणविषमतायामपि तुल्या विशोधिः, तदेतत् प्रतिपिपादयिषुः प्रथमतः प्रायश्चित्तवैषम्ये कारणमभिधित्सुरिदमाह-**चोयग!** इत्यादि, हे चोदक! उपपन्नप्रश्नकारिन्! प्रायश्चित्तवैषम्ये **इदं** वक्ष्यमाणकारणं वक्ष्ये। तच्च वक्ष्यमाणमवहितमनाः **शृणु** ॥ १४५॥ प्रतिज्ञातमेव निर्वाहयति—

**[१] कालस्स निद्धयाए देहबलं धिइबलं च जं पुरिमे ।**
**तदणंतभागहीणं, कमेण जा पच्छिमा अरिहा ॥ १४६ ॥**



**पुरिमे** पूर्वे **आदितीर्थकरतीर्थे कालस्य स्निग्धतया** हेतुभूतया प्राणिनां **देहबलं** शारीरं बलं तदुपष्टम्भतो **धृतिबलं च यत्** आसीत्, **तत्** अवसर्प्पिणीकालस्य तथास्वभावतया

१. काले णिद्धे ओसहि -देह० जेभा० खंभा० चूर्णिप्रत्यन्तरेषु च ।

For Private And Personal Use Only

**क्रमेण** प्रतिक्षण**मनन्तभागहीन**मनन्तभागहीनं पतत् तावदायातं यावत् **पश्चिमो** भगवानर्हन् **वर्द्ध**मानस्वामी, ततः शारीरबलस्य धृतिबलस्य च विषमत्वाद् विषमं प्रायश्चित्तम् ॥ १४६ ॥ तथा चाह—

**संवच्छरेणावि न तेसि आसी, जोगाण हाणी दुविहे बलम्मि ।**
**जे यावि धिज्जाइअणोववेया, तद्धम्मया सोहयए तए वि ॥ १४७ ॥**

**तेषाम्** आदितीर्थकरतीर्थवर्त्तिनां साधूनां **द्विविधे बले** शारीरे बले धृतिबले च अत्यन्तमुपचयप्राप्ते सति **संवत्सरेणापि** संवत्सरप्रमाणमपि तपः कुर्वतां **न योगानां** संयमव्यापाररूपाणां **हानिरासीत्**। मध्यमतीर्थकरतीर्थवर्त्तिनां द्विविधमपि बलं क्रमेणानन्तभागहीनमनंतभागहीनम्, अपश्चिमतीर्थकरतीर्थवर्त्तिनामत्यन्तहीनम्, अतो मध्यमकानां संवत्सरप्रमाणं तपः कुर्वतां महती योगहानिरिति तेषामष्टमासिकमुत्कृष्टं तपःकर्म्म व्यवस्थापितम्, अपश्चिमतीर्थकरतीर्थवर्त्तिनां तदपि कुर्वतां योगहानिरिति षाण्मासिकमुत्कृष्टं तपःकर्म्म तेषां प्रवर्त्तितम्। तदेवमुक्तं प्रायश्चित्तवैषम्ये कारणं, सम्प्रति तुल्यां विशोधिं प्रतिपादयति- **जे यावीत्यादि**, ये चापि मध्यमतीर्थकरतीर्थवर्त्तिनोऽपश्चिम-

तीर्थकरतीर्थवर्त्तिनश्च **धैर्याद्यनुपपेता** धैर्येण-धृतिबलेन, आदिशब्दात् संहननबलेन च कालदोषतोऽनुपपेताः। **तए वित्ति** तकानपि **तद्धर्म्मता** तेषामिव आदितीर्थकर-तीर्थवर्त्तिनामिव धर्म्मः, अशठतादिकः[१] स्वभावो येषां ते तद्धर्म्माणः, तद्भावः तद्धर्म्मता, सा **शोधयति,** इयमत्र भावना-इह अशठभावेनानिगूहितबल-वीर्यतया यथाशक्ति तपःकर्मणि प्रवृत्तिर्विशोधेरान्तरं कारणं, तच्च बाह्यतपःकर्म्मणो वैषम्येऽपि सर्वेषामप्यविशिष्टम्, अतः सर्वेषां तुल्या विशोधिः, युक्तं चैतत् तथाहि-प्रथमतीर्थकरतीर्थेऽपि न सर्वेषां देहबलं धृतिबलं च समानम्, अथ च सर्वेषामप्यशठभावतया प्रवृत्तेस्तुल्या विशोधिः, एवमत्रापि भावनीयमित्यदोषः ॥ १४७ ॥ अत्रैव निदर्शनमाह—

**पत्थगा जे पुरा आसि, हीणमाणा उ तेऽधुणा ।**
**माणभंडाणि[२] धन्नाणि, सोहिं जाण तहेव य ॥१४८॥**

**ये पुरा** पूर्वकाले **प्रस्थका आसीरन्** ते कालदोषतः क्रमेण **हीना हीनतरा** जायमाना



---

१. अशठत्वादिकः -वा. मो. पु. मु. ॥ २. णि अप्पाणि - जे.भा.। णि आगाणि-खंभा. अत्र श्लोकेऽनुष्टुपः छन्दः।

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अत्यन्तहीनमाना जातास्तथाऽपि धान्यानि **मानभाण्डानि** प्रस्थकादिपरिमाणपरिछेद्यानि, तथैव संख्याव्यवहारस्य सर्वदाप्यवशिष्टत्वात्, एवमिहापि प्रायश्चित्तानां वैषम्येऽपि अशठभावेन तपःकर्म्मणि प्रवृत्तिरान्तरं कारणं सर्वेषामप्यविशिष्टमति, **शोधिमपि तु-**शब्दस्यापिशब्दार्थस्य भिन्नक्रमत्वात् **तथैव धान्यानां** प्रस्थकपरिच्छेद्यतामिव तुल्यां **जानीहि**, प्रस्थकदृष्टान्तेन सर्वत्र तुल्यां विशोधिमवबुध्यस्वेति भावः ॥ १४८ ॥ उक्तमारोपणाप्रायश्चित्तम्। इदानीं प्रतिकुञ्चनाप्रायश्चित्तमाह—

**दव्वे खेत्ते काले, भावे पलिउंचणा[१] चउविगप्पा[२] ।**
**चोयग! कप्पारोवण, इह इं भणिया पुरिसजाया ॥ १४९ ॥**

प्रतिकुञ्च्यते अन्यथा प्रतिसेवितमन्यथा कथ्यते, यया सा **प्रतिकुञ्चना**। सा **चतुर्विधा**, तद्यथा— **द्रव्ये** द्रव्यविषया, एवं **क्षेत्रे काले भावे** च । अत्र परस्य प्रश्नमभिधित्सुराह— **चोयग**त्ति, अत्र चोदको ब्रूते- ननु **कल्पे**ऽपि प्रायश्चित्तमभिहितं, **व्यवहारे**ऽपि तदेव प्रायश्चित्तमभिधीयते इति द्वयोरप्यध्ययनयोर्विशेषाभावः। अत्रार्थे



**१. पलियंचणा - मो० । २. ०प्पा । दव्वम्मि सचित्तं पडिसेवंते बेति अच्चित्तं ॥१४९॥ खेत्ते जणवयपडिसेवियं तु अद्धाणसेवियं बेति सुब्भिक्खे [ गा.१५० ] जेभा० खंभा० ॥**

For Private And Personal Use Only

सूरिवचनं- **कप्पारोवणे**त्यादि, कल्पे-**कल्पाध्ययने** कल्पितानां मूलोत्तरगुणापराध-प्रायश्चित्तानामारोपणं, दानम् **इह व्यवहाराध्ययने** भणितम्। **इं** इति पादपूरणे, **'इ-जे-राः पादपूरणे' [ सिद्धहेम०** ८-२-२१७] इति वचनात्, सानुस्वारता प्राकृतत्वात्, **'प्राकृते हि पदान्ते सानुस्वारता भवतीति'**। किमुक्तं भवति? - **कल्पाध्ययने** आभवत्प्रायश्चित्तमुक्तं न तु दानं, इह तु दानं भणितमिति विशेषः, तथा **कल्पाध्ययने** प्रायश्चित्तार्हाः **पुरुषजाता** न भणिताः, इह तु **भणिता** इति महान् विशेषः। एष गाथासंक्षेपार्थः ॥ १४९ ॥ साम्प्रतमेनामेव गाथां व्याचिख्यासुः प्रथमतो द्रव्यादिभेदभिन्नां प्रतिकुञ्चनां व्याख्यानयति—

**सचित्ते अचित्तं, जणवयपडिसेवियं तु[1] अद्धाणे।**
**सुभिक्खम्मि दुभिक्खे, हट्ठेण तहा गिलाणेणं ॥ १५० ॥**

द्रव्यविषया प्रतिकुञ्चना नाम **सचित्ते,** उपलक्षणमेतत्, मिश्रे वा प्रतिसेविते **अचित्तं** मया प्रतिसेवितम्, इत्यालोचयति, क्षेत्रप्रतिकुञ्चना **जनपदे** प्रतिसेव्य यद् **अध्वनि प्रतिसेवित**मित्यालोचयति, कालप्रतिकुञ्चना यत्**सुभिक्षे** काले सेवित्वा **'दुर्भिक्षे** मया

१. च - तिसृष्वपि भाष्यप्रतिषु ॥

गाथा १५०-१५४ कल्प-व्यवहार-योर्विशेषः



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रतिसेवितम्' इत्यावेदयति। भावप्रतिकुञ्चना यत् **हृष्टेन** सता प्रतिसेव्य '**ग्लानेन** सता मया प्रतिसेवितम्' इत्यालोचयति ॥ १५०॥ उक्ता प्रतिकुञ्चना अधुना अनन्तरगाथोत्तरार्धं व्याख्यानयन् 'अज्झयणाण विसेसो' [गा. ३४] इति द्वारं व्याख्यानयति । तत्र 'चोयग' [गा. १४९] इत्यवयवं व्याचिख्यासुराह—

**कप्पंमि वि पच्छित्तं, ववहारंमि वि [2]तंमेव पच्छित्तं ।**
**कप्प-ववहाराणं को णु विसेसो ? त्ति चोएइ ॥ १५१ ॥**

ननु **कल्पेऽपि प्रायश्चित्तमुक्तं, व्यवहारेपि च तदेव** प्रायश्चित्तमभिधीयते ततः **कल्प-व्यवहारयोः को नु विशेषः?** नैव कश्चनापीतिभावः; नुशब्दस्याऽऽक्षेपद्योतकत्वादिति **चोदयति** प्रश्नयति शिष्यः। अपि चाभिधानतोऽपि कल्प-व्यवहारयोर्विशेषानुपपत्तिः ॥ १५१॥ तथा चाह—

**जो अवितहववहारी, सो नियमा वट्टए उ कप्पंमि ।**
**[3]इय वि हु नत्थि विसेसो, अज्झयणाणं दुवेण्हं पि ॥ १५२ ॥**



१. तहेव - वा० भो० पु० मु० ॥ २. इति वि - तिसृष्वपि भाष्यप्रतिषु ॥

For Private And Personal Use Only

**यो** नाम साधुः **अवितथव्यवहारी** अवितथव्यवहारकारी **स नियमाद्** अवश्यंभावेन **वर्त्तते** एव, **तुरेवकारार्थः**, **कल्पे** आचारे, आचारवर्त्तिन एव यथोक्तावितथव्यवहारकारित्वात् । यश्च वर्त्तते कल्पे आचारे स नियमादवितथव्यवहारकारी, अवितथव्यवहारकारिण एवाचारे वृत्तिसम्भवात्; **इत्थं** च परस्परमविनाभावित्वं कल्प–व्यवहार-शब्दयोरेकार्थिकत्वात्, तथाहि– 'कल्पो व्यवहार आचार इत्यनर्थान्तरमिति' **इय विहु** इति इत्यपि एवमपि अर्थगत्याभिधानाऽभेदतोऽपि[1], आस्तां प्रागुक्तप्रकारेणाभिधेया-भेदं **इत्यपि** शब्दार्थः। **हुः** निश्चितं **द्वयोरपि** कल्प-व्यवहार[2]योर**ध्ययनयोर्नास्ति विशेषः** ॥ १५२॥ एवं परेणाऽभिधेयाऽभेदतोऽभिधानाऽभेदतश्चैक्ये प्रतिपादिते सूरिरभिधेयभेदं दर्शयन् 'कप्पारोवण'[गा. १४९] इति अवयवं व्याख्यानयति—

**कप्पंमि कप्पिया खलु, मूलगुणे[3] चेव उत्तरगुणे य ।**
**ववहारे ववहरिया पायच्छित्ताऽऽभवंते य ॥ १५३ ॥**

**कल्पे** कल्पाध्ययने **कल्पितान्येव** प्ररूपितान्येव, **खलु** शब्दस्यैवकारार्थत्वात्, न तु

१. ०दतो ( ?त ) इत्य० खं० ॥ २. ० हारयोरध्य० मो. प्रतौ संशोधितपाठः ॥ ३. गुणा चेव उत्तरगुणा य – जेभा० वाभा० ॥

दानव्यवहारे प्रवर्त्तितानि। कानीत्यत आह- **मूलगुणे चेव उत्तरगुणे य** इति 'विषयेण विषयिण[1] उपलक्षणात्' मूलगुणापराधप्रायश्चित्तानि उत्तरगुणापराधप्रायश्चित्तानि । **व्यवहारे** व्यवहाराध्ययने **पुनर्व्यवहृतानि** दानव्यवहारविषयीकृतानि। किमुक्तं भवति?- कल्पाध्ययने मूलगुणापराधे वा उत्तरगुणापराधे वा **आभवन्ति प्रायश्चित्ता**न्युक्तानि, अस्मिंस्तु व्यवहाराध्ययने तेषामाभवतां प्रायश्चित्तानां दानमुक्तमिति। यानि च कल्पाध्ययने आभवन्ति प्रायश्चित्तानि नोक्तानि तानि व्यवहारेऽभिधीयन्ते, तेषां दानं च ॥१५३ ॥ किञ्च—

**अविसेसियं च कप्पे, इहइं तु विसेसियं इमं चउहा ।**
**पडिसेवण संजोयण आरोवण[2] कुंचियं चेव ॥ १५४ ॥**

**चः** समुच्चये, अन्यच्चेत्यर्थः । **कल्पे** कल्पाध्ययने प्रायश्चित्त**मविशेषितं** विशेषरहितमुक्तम्। **इहइं** तुत्ति इः पादपूरणे, सानुस्वारता पूर्ववत्, **तुः** पुनरर्थे, इह **व्य**वहाराध्ययने पुनरिदं प्रायश्चित्तं **चतुर्द्धा** चतुर्भिः प्रकारैर्विशेषितम्। तानेव प्रकारानाह- **प्रतिसेवनं संयोजनमारोपणं कुञ्चन**मिति प्रतिकुञ्चनम्। एतानि अनन्तरमेव सप्रपञ्चं व्याख्यातानीति न



१. विषयिणो लक्ष° वा° मो° पु° मु. ॥ २. आरुवणाऽऽकुंचियं-तिसृष्वपि- भाष्यप्रतिषु ॥

भूयो व्याख्यायन्ते ॥ १५४॥ तदेवम् 'अभिधेयाऽभेदतो नास्ति विशेषः [गा.१५२] इति यदुक्तं तद् असिद्धमिति प्रतिपादितम्,अभिधेयभेदस्य दर्शितत्वाद्, यत्पुनरुच्यते-अभिधानाभेदतो नास्ति विशेषः [गा.१५२] इति तद् 'अनैकान्तिकम्' इति दर्शयति—

**नाणत्तं दिस्सए अत्थे, अभिन्ने वंजणम्मि वि ।**
**वंजणस्स य भेदम्मि, कोइ अत्थो न [1]भिज्जइ ॥ १५५ ॥**

व्यज्यते-प्रकटीक्रियते अर्थोऽनेन प्रदीपेनेव घट इति **व्यञ्जनं** शब्दः, तस्मिन्, **अपि**शब्दो भिन्नक्रमः, स चैवं योजनीयः **अभिन्ने**पि एकरूपेपि व्यञ्जने **अर्थे** अर्थविषये **नानात्वं दृश्यते** । यथा- सैन्धव इत्युक्ते तत्तत्प्रस्तावादिना अश्व-लवण-वस्त्राद्यर्थनानात्वम्। तथा **व्यञ्जनस्य** शब्दस्य **भेदे**पि **च**शब्दोऽपिशब्दार्थो भिन्नक्रमश्चेत्यत्र सम्बध्यते। **कश्चिदर्थो न भिद्यते**, यथा-खं व्योम आकाशमिति। कस्मादेवं शब्दाभेदेऽपि अर्थनानात्वम् इति अर्थाऽभेदेपि च शब्दनानात्वमिति चेत्? उच्यते-शब्दाऽर्थयोर्भेदाऽभेदविषये चतुर्भङ्गिकाया भावात्, तथाहि- अर्थस्याप्यभेदः शब्दस्याप्यभेद इति प्रथमो भङ्गः१, अर्थस्याऽभेदः शब्दस्य भेद इति द्वितीयः२, अर्थस्य भेदः शब्दस्याऽभेदः इति तृतीयः३, अर्थस्य भेदः

१. भिज्जए - वा॰ मो॰ पु॰ मु. ॥

शब्दस्य भेदः इति चतुर्थः ४ ॥१५५॥ एतेष्वेव चतुर्षु भङ्गकेषु क्रमेणोदाहरणान्युपदर्शयति—

**पढमो इंद इंदो त्ति, बिइयओ होइ इंद सक्कोत्ति।**
**तइओ गो भू-पसुरस्सिणो त्ति चरमो[1] घडपडो त्ति ॥ १५६ ॥**

**प्रथमो** भङ्गोऽर्थाभेदः शब्दाऽभेदः इत्येवंरूपः यथा **इन्द्र इन्द्र इति** । तथाहि-एकेनापि इन्द्र इत्युक्तं द्वितीयेनापि इन्द्र इति, अत्र च द्वयोरपि शब्दयोः स्वरूपाऽभेदोऽर्थाभेदश्च १। **द्वितीयो**ऽर्थाभेदः शब्दस्य भेद इतिरूपः यथा- **इन्द्रः शक्र इति,** अत्र हि शब्दस्य नानात्वमर्थस्त्वभिन्न एव द्वयोरप्येकार्थिकत्वात् २। **तृतीयो**ऽर्थस्यभेदः शब्दस्याऽभेद इत्येवंलक्षणो यथा **भू-पशु-रश्मिषु** पुरुषभेदेन कालभेदेन वा प्रयुज्यमाना **गोशब्दाः**, अत्र हि गौरिति सर्वत्राप्यभिन्नं रूपं, अर्थस्तु भिन्न इति३। **चरमो** यथा **घटः पट** इति, अत्र हि द्वयोरपि शब्दयोः रूपभेदोऽप्यस्ति अर्थभेदोऽपि ४। तत उपपद्यते शब्दाभेदेऽपि अर्थनानात्वमर्थाभेदेऽपि शब्दनानात्वं, तेन यदुच्यते 'अभिधानाभेदतो नास्ति विशेष' इति तदनैकान्तिकमुपदर्शितम्। भू-पशु-रश्मिवाचिनां गोशब्दानामभिधानाभेदेप्यर्थविशेषदर्शनात्,

१. चरिमो -तिसृष्वपि भाष्यप्रतिषु ॥

स चार्थविशेषोऽत्राऽप्यस्ति यथोक्तं प्राक्। अपि च- 'अभिधानाभेदत' इति यद् उक्तं तत् प्रत्यक्षविरुद्धं, व्यञ्जनभेदस्य साक्षादुपलभ्यमानत्वात्, तथाहि-एकत्र कल्प इति अपरत्र व्यवहार इति ॥ १५६ ॥ अथाऽर्थगत्याऽभिधानाऽभेद उच्यते, न स्वरूपतः, तदप्यसत्, अर्थविशेषस्याप्युभयत्र भावात्। तथा चाह—

**वंजणेण य नाणत्तं, अत्थतो अविकप्पियं ।**
**दिस्सए कप्पनामस्स, ववहारस्स तहेव य ॥ १५७ ॥**

**कल्पनाम्नः**अध्ययनस्य **तथैव च व्यवहारस्य** व्यवहाराध्ययनस्य **दृश्यते व्यञ्जनेन** व्यञ्जनभेदेन **नानात्वं,** प्रत्यक्षतः एव पृथग्विभिन्नानां व्यञ्जनानामुपलभ्यमानत्वात् । तथा**ऽर्थतः** अर्थमाश्रित्यास्ति नानात्वम् **अविकल्पितं** निश्चितं प्रायश्चित्तभेदानां प्रतिसेवना-संयोजनादीनां प्रायश्चित्तार्हपुरुषजातानां च **कल्पाध्ययनानुक्तानामिह व्यवहारेऽ**भिधानात् ॥१५७॥ 'तदेवम्'अज्झयणाण विसेसो' [गा.३४] इति द्वारं व्याख्यातम्। इदानीं 'तदरिहपरिसा य' [गा.३४] इत्येतत् द्वारं व्याचिख्यासुः 'इहइं भणिया पुरिसजाया' [गा.१४९] इत्यवयवं[१] व्याख्यानयन्नाह—

---

१. इत्येतदवयवं - मो० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**वट्टंतस्स अकप्पे, पच्छित्तं तस्स वण्णिया भेदा ।**
**जे पुण पुरीसज्जाया, तस्सरिहा ते इमे होंति ॥ १५८ ॥**

इह 'कल्पे वर्त्तमानस्य सूत्रोक्तविधिना यतनया प्रवृत्तेः प्रायः प्रायश्चित्तविषयतैव नोपजायते' इत्यकल्पग्रहणम्। **अकल्पे** दर्पादौ **वर्त्तमानस्य** यत् **प्रायश्चित्तं तस्य ये भेदाः** प्रतिसेवना-संयोजनादयस्ते **वर्णिताः**। **ये पुनस्तस्य** प्रायश्चित्तस्याऽर्हा योग्याः **पुरुषजाताः** पुरुषप्रकाराः, पुरुषभेदा इत्यर्थः, **ते इमे** वक्ष्यमाणस्वरूपा **भवन्ति** ॥ १५८ ॥ तानेव दर्शयति—



**कयकरणा इयरे वा, सावेक्खा खलु तहेव निरवेक्खा ।**
**निरवेक्खा जिणमादी, सावेक्खा आयरियमादी ॥ १५९ ॥**

**कृतकरणा** नाम षष्ठाऽष्टमादिभिर्विविधतपोविधानैः परिकर्म्मितशरीराः। **इतरे** अकृतकरणाः षष्ठाऽष्टमादिभिस्तपोविशेषैरपरिकर्म्मितशरीराः। तत्र ये कृतकरणास्ते द्विविधाः,

For Private And Personal Use Only

तद्यथा-**सापेक्षाः खलु तथैव निरपेक्षाः**, सह अपेक्षा गच्छस्येति गम्यते येषां ते सापेक्षा गच्छवासिनः, निर्गता अपेक्षा येभ्यस्ते निरपेक्षाः, तत्र ये **निरपेक्षास्ते** त्रिविधा **जिनादयः**, तद्यथा-जिनकल्पिकाः शुद्धपरिहारविशुद्धिका यथालन्दकल्पिकाश्च। एते नियमतः कृतकरणा एव, अकृतकरणानामेकस्याऽपि कल्पस्य प्रतिपत्त्ययोगात्। **सापेक्षा** अपि त्रिविधा **आचार्यादयः**। तद्यथा-आचार्या उपाध्याया भिक्षवश्च। एते प्रत्येकं द्विधा भूयो भवन्ति तद्यथा— आचार्याः कृतकरणा अकृतकरणाश्च, उपाध्याया अपि कृतकरणा अकृतकरणाश्च, भिक्षवोऽपि कृतकरणा अकृतकरणाश्च। तत्र कृतकरणानां चिन्त्यमानत्वादस्यां गाथायामेते कृतकरणा ग्राह्याः ॥ १५९ ॥

**अकयकरणा वि दुविहा, अणहिगया अहिगया य बोधव्वा ।**
**जं सेवेइ अहिगओ, अणहिगए अत्थिरे इच्छा ॥ १६० ॥**

इहाऽऽचार्या उपाध्यायाश्च कृतकरणा अकृतकरणा वा नियमात् गीतार्थाः स्थिराश्च, तत इहाऽकृतकरणा भिक्षव एव ग्राह्याः। ते **अकृतकरणा** भिक्षवो **द्विविधाः**, तद्यथा-**अनधिगता अधिगताश्च**। अनधिगता नाम अगीतार्थाः, अधिगता गीतार्थाः। **अपिशब्दः**

सम्भावने, स चैतत्सम्भावयति- ये भिक्षवोऽनधिगतास्ते द्विविधाः, तद्यथा- स्थिरा अस्थिराश्च। स्थिरा नाम धृतिसंहननसंपन्नाः, तद्विपरीता अस्थिराः। अधिगता अपि द्विविधाः- स्थिरा अस्थिराश्च। कृतकरणा अपि भिक्षवो द्विविधा अनधिगताः अधिगताश्च। अनधिगता द्विधा स्थिरा अस्थिराश्च। अधिगता अपि द्विविधाः- स्थिरा अस्थिराश्च। अत्रैव संक्षेपतः प्रायश्चित्तदानविधिमाह-**जं सेवेइ** इत्यादि, यत् प्रायश्चित्तस्थानं **सेवते** प्रतिसेवते **अधिगतः** गीतार्थः, उपलक्षणमेतत्, कृतकरणः स्थिरश्च तस्मै तदेव परिपूर्ण्णं दीयते। तदेव प्रायश्चित्तस्थानं प्राप्ते **अनधिगते अस्थिरे** चशब्दाद् अकृतकरणे च गुरोः प्रायश्चित्तदानविधौ **इच्छा** सूत्रोपदेशानुसारेण स्वेच्छा। तथाहि- यदि श्रुतोपदेशानुसारतः कृतकरणः स्थिरोऽधिगत इति वा कृतकरणा[1]दिभिरपि समर्थ इति विज्ञातो भवति तदा यदेव प्रायश्चित्तमापन्नस्तदेव तस्मै दीयते। अथाऽसमर्थ इति परीक्षितस्ततो यत्प्रायश्चित्तं प्राप्तस्तस्यार्वाक्तनमनन्तरं दीयते, तत्राप्यसमर्थतायां ततोऽप्यनन्तरं, तत्राप्यसामर्थ्ये ततोऽप्यनन्तरम्, एवं यथापूर्वं क्रमेण तावन्नेयं यावन्निर्विकृतिकं, तत्राप्यसमर्थतायां पौरुषी-

१. ०णादिरपि - **खं. मो. मु०** ॥

प्रत्याख्यानं, तत्राप्यशक्तौ नमस्कारसहितम्। गाढग्लानत्वादिना तस्याप्यसम्भवे एवमेव आलोचनामात्रेण शुद्ध्यापादनमिति ॥१६०॥ सम्प्रति पुरुषभेदमार्गणायामेव प्रकारान्तरमाह—

**अहवा साविक्खियरे निरवेक्खा[1] सव्वसो उ कयकरणा ।**
**इयरे कयाऽकया वा, थिराऽथिरा होंति गीयत्था ॥ १६१ ॥**

**अथवे**ति प्रकारान्तरद्योतनार्थः। तच्च प्रकारान्तरमिदं— पूर्वं कृतकरणाऽकृतकरण-भेदावादौ कृत्वा पुरुषभेदमार्गणा कृता, अत्र तु[2] सापेक्ष-निरपेक्षभेदौ । तथा चाह- **साविक्खियरे**त्ति, द्विविधाः प्रायश्चित्तार्हाः पुरुषाः, तद्यथा- सापेक्षा इतरे च, सापेक्षा गच्छवासिनः, ते च त्रिधा-आचार्या उपाध्याया भिक्षवः। **निरपेक्षा** जिनकल्पिकादयः। तत्र ये निरपेक्षास्ते **सर्वशः** सर्वात्मना **कृतकरणाः**, तुशब्दस्य समुच्चयार्थत्वाद् अधिगताः स्थिराश्च, **इतरे** सापेक्षा द्विविधाः। तद्यथा- **कयाऽकया वा** इति, 'पदैकदेशे पदसमुदायोपचारात्' कृतकरणा अकृतकरणाश्च। **वाशब्दः** समुच्चये, कृतकरणा अपि

**१. ॰क्खा णियमसो तुक॰ जेभा॰ खंभा॰ । क्ख सव्वहा उ क॰ चतसृष्वपि टीका प्रतिषु मुद्रिते च ॥ २. च - वा॰ पु॰ ॥**

[1]द्विविधा- **स्थिरा अस्थिराश्च**। अकृतकरणा अपि द्विविधाः- स्थिरा अस्थिराश्च। एकैके द्विधा-गीतार्था अगीतार्थाश्च। सूत्रे **गीतार्था** इत्युपलक्षणं, ततोऽगीतार्था अपि विवृताः ॥१६१ ॥ अथ किंस्वरूपाः कृतकरणाः? इति कृतकरणस्वरूपमाह—

**छट्ठऽट्ठमाइएहिं, कयकरणा ते य[2] उभयपरियाए ।**
**[3]अहिगयकयकरणत्तं, जो[4]गाऽऽयतगारिहा केई ॥ १६२ ॥**

**कृतकरणा** नाम ये **षष्ठाऽष्टमादि**भिस्तपोविशेषैः **उभयपर्याये** गृहस्थपर्याये श्रामण्य-पर्याये चेत्यर्थः, परिकर्म्मितशरीरास्ते ज्ञातव्याः। तद्विलक्षणा इतरे सामर्थ्याद् अकृतकरणाः। अत्रैव मतान्तरमाह— **अहिगये**त्यादि, **के**चिदाचार्या 'ये अधिगतास्ते नियमात् कृतकरणाः' इति अधिगतानां **कृतकरणत्व**मिच्छन्ति, कस्मात्? इति चेत्, अत आह—**जोगायतगारिहा** इति, '**निमित्त-कारण-हेतुषु सर्वासां विभक्तीनां प्रायो दर्शनम्**'[ ] इति **वृद्धवैयाकरण**प्रवादाद् हेतावत्र प्रथमा; ततोऽयमर्थः यतस्तै**र्महाकल्प**-श्रुतादीनामायतकाला

**१. द्विधा - वा॰ मो॰ पु॰ मु॰ ॥ २. उ-मो॰ मु॰ भाष्यप्रतिषु च ॥ ३. अभिगते - जेभा॰ खंभा॰ ॥ ४. जोगा य तवारिहा -भाष्यप्रतिषु ॥**



For Private And Personal Use Only

योगा उद्व्यूढास्तत **आयतकयोगार्हा** अभवन्निति नियमतो अधिगताः कृतकरणा इति ॥१६२॥ तदेवं कृता पुरुषभेदमार्गणा, साम्प्रतममीषां प्रायश्चित्तदान-विधिर्वक्तव्यः। तत्र ये निरपेक्षा जिनकल्पिकादयस्ते यत् प्रायश्चित्तमापन्नास्तदेव तेभ्यो दीयते, न तद्विषया गुरु-लाघवचिन्ता निरपेक्षत्वात्। सापेक्षाणां तु सापेक्षतयैव प्रायश्चित्तदानविधौ तद्विषया गुरु-लाघवचिन्ता कर्त्तव्या। तत्र यानि प्रायश्चित्तानि दातव्यानि तानि संक्षेपतो गाथाद्वयेनाह—

**निव्विइए पुरिमड्ढे, एक्कासण अंबिले चउत्थे य ।**
**पणगं दस पण्णरसा, वीसा तह पण्णवीसा य ॥ १६३ ॥**

**मासो लहुओ गुरुगो, चउरो मासा हवंति लहु-गुरुगा ।**
**छम्मासा लहु-गुरुगा, छेदो मूलं तह दुगं च ॥ १६४ ॥**

**निर्विकृतिकं** विकृतिप्रत्याख्यानं, **पुरिमड्ढत्ति** दिवसपूर्वार्द्धप्रत्याख्यानम्, **एकासना-ऽऽचाम्ल-चतुर्थानि** प्रतीतानि। **पणगं**ति रात्रिन्दिवानां पञ्चकं, 'लहुगुरुयं'ति वक्ष्यमाणं

पदमत्रापि 'व्याख्यानतो विशेषप्रतिपत्तिः' इति विभक्तिपरिणामेन सम्बध्यते, लघुरात्रिन्दिवपंचकं गुरुरात्रिंदिवपञ्चकं च। तत्र लघुरात्रिन्दिवपञ्चकमाचाम्लेन एकद्व्यादिदिनैर्वा हीनं, परिपूर्णं गुरुरात्रिन्दिवपञ्चकम्। एवं **दस**त्ति लघुरात्रिन्दिवदशकं गुरुरात्रिन्दिवदशकम्। **पन्नरस**त्ति लघुरात्रिन्दिवपञ्चदशकं गुरुरात्रिन्दिवपञ्चदशकम्। **वीस**त्ति लघुरात्रिन्दिवविंशतिकं गुरुरात्रिन्दिवविंशतिकम्। **पण्णवीस**त्ति लघुरात्रिन्दिवपञ्चविंशतिकं गुरुरात्रिन्दिवपञ्च-विंशतिकम् ॥१६३॥

**मासो लहुओत्ति गुरुओ**त्ति लघुमासो गुरुमासः । **चत्वारो लघुमासा**श्चत्वारो **गुरु**मासाः, षण्मासा **लघवः, षण्मासा गुरवः**, तथा **छेदः** कतिपयपर्यायस्य। **मूलं** सर्व-पर्यायोच्छेदेन व्रतारोपणम्। **तह दुगं च**त्ति अनवस्थाप्यं पाराञ्चितं च। इह पाराञ्चित-प्रायश्चित्तवर्त्ती प्रायो जिनकल्पिकप्रतिरूपको वर्त्तते । उक्तं च-'**पारंचिओ एगागी इच्चादि जिणकप्पिय-पडिरूवगो**' इति। अनवस्थाप्यप्रायश्चित्तवर्त्त्यप्येवंगुणः। उक्तं च—

*संघयण विरिय आगम-सुत्तविहीए उ जो समुज्जुत्तो ।*
*निग्गहजुत्तो तवस्सी, पवयणसारे गहियअत्थो ॥ १ ॥*

*तिलतुसतिभागमित्तो वि, जस्स असुभो न विज्जए भावो।*
*निज्जूहणारिहो सो, सेसे निज्जूहणा नत्थि ॥ २ ॥*

*एयगुणसंपन्नो, पावइ अणवट्ठामुत्तमगुणोहो,*
*एयगुणविप्पहीणेऽतारिसगम्भीरे भवे मूलं ॥ ३ ॥ ॥ १६३-१६४॥*

*[**बृहत्कल्पभाष्य** गा. ५०२९-३१] इति ॥*

एतौ चैकान्ततो निरपेक्षौ, सापेक्षाणां त्वयं प्रायश्चित्तदानविधिः कथयितुमुपक्रान्तः, ततो मूलादारभ्य प्रायश्चित्तदानविधिरुच्यते। तथा चाह-

**पढमस्स होइ मूलं बिइए मूलं च [1]छेद छग्गुरुगा ।**
**[2]जइणाए होइ सुद्धो, अजयण गुरुगा तिविह भेदो ॥ १६५ ॥**



**प्रथमस्य** आचार्यस्य कृतकरणस्य सापेक्षस्य महत्यपि अपराधे सापेक्षत्वात् प्रायश्चित्तं मूलम्, उपलक्षणमेतत्, तेन तस्यैवाकृतकरणस्यासमर्थत्वात् **छेद** इत्यपि द्रष्टव्यम्। **द्वितीये**

१. छेदो - मो॰ मु॰ भाष्यप्रतिषु च ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



उपाध्याये कृतकरणे तथारूपायां धृति-बलसमर्थतायां **मूलम्**, इतरथा **छेदः** । अकृतकरणे **गुरुषण्मासिकम्** । इहाऽऽचार्य उपाध्यायो वा यदि **यतनया** कारणे देशकालानुरूपप्रायश्चित्तस्थाने अवर्त्तिष्ट तदा **शुद्धः**, न प्रायश्चित्तविषयः, यतनया कारणे प्रवृत्तेः । **अयतनया** तु प्रायश्चित्तस्थाने प्रवृत्तौ मूलं छेदो वाऽऽचार्यस्य, उपाध्यायस्य तु **गुरुकाद्** (षण्मासगुरुकाद्) आरभ्योक्तप्रकारेण **त्रिविधः** प्रायश्चित्तस्य **भेदः** षड्गुरु छेदो मूलं च एवमुक्तानुसारतो भिक्षुष्वपि प्रायश्चित्तदानविधिरनुसरणीयः॥ १६५ ॥ एतदेव व्याचक्षाण आह—

**सव्वेसिं अविसिट्ठा, आवत्ती तेण पढमया मूलं ।**
**सावेक्खे गुरु मूलं, कयाऽकए होइ छेओ उं[1] ॥ १६६ ॥**

**सावेक्खोत्ति व काउं, गुरुस्स कयजोगिणो भवे छेदो ।**
**अकयकरणंमि छग्गुरु, इइ अट्ठोक्कंतीए नेयं ॥ १६७ ॥**

गाथा १६३-१६७ व्यवहारस्य नामादिभेदाः

९५ (B)

१. जयणाए - मो॰ मु॰ भाष्यप्रतिषु च ॥

For Private And Personal Use Only

**इति** प्रायश्चित्तदानविधिरुक्तप्रकारेण कथयितुमभीष्टः। यदा **सर्वेषा**माचार्यादीना**मापत्तिः** प्रायश्चित्तस्यापादनम् **अविशिष्टा,** सापेक्षाणां च महत्यपराधे मूलं नाऽनवस्थाप्यं पाराञ्चितं वा, ततः **प्रथमतया** सर्वेषां **मूल**मापन्नमविशिष्टमधिकृत्य गुरु-लाघवचिन्तया प्रायश्चित्तदान-विधिरुच्यते- तत्र **सापेक्षे गुरौ** आचार्ये, गाथायां विभक्तिलोपः प्राकृतत्वात्, **कृते** कृतकरणे प्रायश्चित्तं **मूलं,** सापेक्षे इति व[2]चनात्, महत्यप्यपराधे गुरौ सापेक्षत्वाद् मूलमेव प्रायश्चित्तं, न तु अनवस्थाप्यं पाराञ्चितं वेति ज्ञापितम्। एतदेव चोपजीव्य प्रागप्येवमस्माभिर्व्याख्यातम्। **अकृते** अकृतकरणे गुराविति संबन्धादाचार्ये भवति प्रायश्चित्तं **छेदः** ॥ १६६ ॥

**सावेक्खोत्ति व काउं** इत्यादि, अत्र गुरुशब्देनोपाध्यायः प्रोच्यते, आचार्यस्योक्तत्वात्, **गुरोः**, उपाध्यायस्य **कृतयोगिनः** कृतकरणस्य मूलं प्रायश्चित्तमापन्नस्यापि सापेक्ष इति कृत्वा प्रायश्चित्तं छेदो भवति । तस्यापि कृतकरणस्य मनाग् निरपेक्षतायां मूलमपि

१. य. मो. ॥ २. वदता मह० वा० मो० पु० ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रायश्चित्तं, 'बिइए मूलं व छेदो छग्गुरुगा' (गा. १६५) इति वचनात्। **अकृतकरणे** तु तस्मिन्नेवोपाध्याये मूलमापन्नेऽपि प्रायश्चित्तं **षड्गुरुकाः** गुरवः षण्मासाः। अकृतकरणतया छेदप्रायश्चित्तस्याप्यनर्हत्वात् । **इति** एवममुना प्रकारेण **अड्ढोक्कंतीए** इति इह एकैकस्मिन्नाचार्यादौ स्थाने कृतकरणाऽकृतकरणभेदतो द्वे द्वे प्रायश्चित्ते, तयोः शुद्धयोरेकमाद्यं प्रायश्चित्तमपक्रामति, न तूत्तरस्थानेऽनुवर्त्तते, द्वितीयं चोत्तरस्थानेऽनुवर्त्तते, एकं च द्वयोरर्द्धमित्यत्रार्द्धापक्रान्त्या **ज्ञेयं** प्रायश्चित्तदानम्॥१६७॥ इदमिति संक्षिप्तमुक्तमिति विनेयजनानु-ग्रहाय यन्त्रककल्पनया विशेषतो भाव्यते। तत्र यन्त्रकविधानमिदं- तिर्यग् द्वादशगृहकानि क्रियन्ते, अधोमुखं च विंशतिगृहाणि, एवं च द्वादशगृहात्मिका विंशतिगृहपङ्क्तयो जाताः तत्र विंशतितमायां पङ्क्तौ दक्षिणतो अन्तिमे ये द्वे गृहके ते मुक्त्वा तस्या अधस्ताद् दशगृहात्मिका एकविंशतितमा पङ्क्तिः स्थाप्या। तस्यामप्येक-विंशतितमायां पङ्क्तौ ये द्वे मअन्तिमे गृहके ते मुक्त्वा अधस्तात् अष्टगृहात्मका द्वाविंशति-तमा पङ्क्तिः [1]स्थाप्या।

१. स्थापनीया त॰ वा॰ मो. पु. मु. ॥

| पङ्क्ति: | कृतकरण आचार्य: | अकृतकरण आचार्य: | कृतकरण उपाध्याय: | अकृतकरण उपाध्याय: | अधिगतस्थिर भिक्षु: कृत० | अधिगतस्थिर भिक्षु: कृत० | अधिगतस्थिर भि०अकृतकरण | अधिगतास्थिर भि. अकृतकरण | अनाधिगतस्थिर भि. कृतकरण | अनधिगत स्थिर भि. अकृतकरण | अनाधिगतास्थिर भि.कृतकरण | अनाधिगतास्थिर भि.अकृतकरण |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १ | मूलम् | छेद: | छेद: | षण्मासगुरु | षण्मासगुरु | षण्मासलघु | षण्मासलघु | चतुर्मासगुरु | चतुर्मासगुरु | चतुर्मासलघु | चतुर्मासलघु | मासगुरु |
| २ | छेद: | षड्गुरु | पड्गरु | षड्लघु | षड्लघु | चतुर्गुरु | चतुर्गुरु | चतुर्लघु | चतुर्लघु | मासगुरु | मासगुरु | मासलघु |
| ३ | षड्गुरु | पड्लघु | षड्लघु | चतुर्गुरु | चतुर्गुरु | चतुर्लघु | चतुर्लघु | मासगुरु | मासगुरु | मासलघु | मासलघु | भिन्नमासगुरु |
| ४ | षड्लघु | चतुर्गुरु | चतुर्गुरु | चतुर्लघु | चतुर्लघु | मासगुरु | मासगुरु | मासलघु | मासलघु | भिन्नमास गुरु | भिन्नमास गुरु | भिन्नमास लघु |
| ५ | चतुर्गुरु | चतुर्लघु | चतुर्लघु | मासगुरु | मासगुरु | मासलघु | मासलघु | भिन्नमास गुरु | भिन्नमास गुरु | भिन्नमास लघु | भिन्नमास लघु | गरु २० |
| ६ | चतुर्लघु | मासगुरु | मासगुरु | मासलघु | मासलघु | भिन्नमासगुरु | भिन्नमासगुरु | भि. मा. ल. | भि. मा. ल. | गुरु २० | गुरु २० | लघु २० |
| ७ | मासगुरु | मासलघु | मासलघु | भि० मा० गु० | भि० मा० गु० | भिन्नमासलघु | भिन्नमासलघु | गुरु २० | गुरु २० | लघु २० | लघु २० | गुरु १५ |
| ८ | मासलघु | भि० मा० गु० | भि० मा० गु० | भि० मा० ल० | भि० मा० ल० | गुरु २० | गुरु २० | लघु २० | लघु २० | गुरु १५ | गुरु १५ | लघु १५ |
| ९ | भि० मा० गु० | भि० मा० ल० | भि० मा० ल० | गुरु २० | गुर २० | लघु २० | लघु २० | गुरु १५ | गुरु १५ | लघु १५ | लघु १५ | गुरु १० |
| १० | भि० मा० ल० | गुरु २० | गुरु २० | लघु २० | लघु २० | गुरु १५ | गुरु १५ | लघु १५ | लघु १५ | गुरु १० | गुरु १० | लघु १० |
| ११ | गुरु २० | लघु २० | लघु २० | गुरु १५ | गुरु १५ | लघु १५ | लघु १५ | गुरु १० | गुरु १० | लघु १० | लघु १० | गुरु ५ |
| १२ | लघु २० | गुरु १५ | गुरु १५ | लघु १५ | लघु १५ | गुरु १० | गुरु १० | लघु १० | लघु १० | गुरु ५ | गुरु ५ | लघु ५ |

| | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| १३ | गुरु १५ | लघु १५ | लघु १५ | गुरु १० | गुरु १० | लघु १० | लघु १० | गुरु ५ | गुरु ५ | लघु ५ | लघु ५ | दशमम् |
| १४ | लघु १५ | गुरु १० | गुरु १० | लघु १० | लघु १० | गुरु ५ | गुरु ५ | लघु ५ | लघु ५ | दशमम् | दशमम् | अष्टमम् |
| १५ | गुरु १० | लघु १० | लघु १० | गुरु ५ | गुरु ५ | लघु ५ | लघु ५ | दशमम् | दशमम् | अष्टमम् | अष्टमम् | षष्ठम् |
| १६ | लघु १० | गुरु ५ | गुरु ५ | लघु ५ | लघु ५ | दशमम् | दशमम् | अष्टमम् | अष्टमम् | षष्ठम् | षष्ठम् | चतुर्थम् |
| १७ | गुरु ५ | लघु ५ | लघु ५ | दशमम् | दशमम् | अष्टमम् | अष्टमम् | षष्ठम् | षष्ठम् | चतुर्थम् | चतुर्थम् | आचामाम्लं |
| १८ | लघु ५ | दशमम् | दशमम् | अष्टमम् | अष्टमम् | षष्ठम् | षष्ठम् | चतुर्थम् | चतुर्थम् | आचामाम्लं | आचामाम्लं | एकादशनकम् |
| १९ | दशमम् | अष्टमम् | अष्टमम् | षष्ठम् | षष्ठम् | चतुर्थम् | चतुर्थम् | आचामाम्लं | आचामाम्लं | एकाशनकं | एकाशनकं | पूर्वार्द्ध |
| २० | अष्टमम् | षष्ठम् | षष्ठम् | चतुर्थम् | चतुर्थम् | आचाम्लम् | आचाम्लम् | एकाशनकम् | एकाशनकं | पूर्वार्द्ध | पूर्वाद्ध | निर्विकृतकम् |
| २१ | षष्ठम् | चतुर्थम् | चतुर्थम् | आचाम्लम् | आचाम्लम् | एकाशनकम् | एकाशनकम् | पूर्वार्द्ध | पूर्वार्द्ध | निर्विकृतिकम् | | |
| २२ | चतुर्थम् | आचाम्लम् | आचाम्लम् | एकाशनकम् | एकाशनकम् | पूर्वाधम् | पूर्वाधम् | निर्विकृतिकम् | | | | |
| २३ | आचाम्लम् | एकाशनकम् | एकाशनकम् | पूर्वार्धम् | पूर्वार्धम् | | निर्विकृतिकम् | | | | | |
| २४ | एकाशनकम् | पूर्वार्धम् | पूर्वार्धम् | निर्विकृतिकम् | | | | | | | | |
| १५ | पूर्वार्धम् | निर्विकृतिकम् | | | | | | | | | | |
| २६ | निर्विकृतिकम् | | | | | | | | | | | |

तस्यामपि ये द्वे अन्तिमे गृहके ते मुक्त्वा तस्या अधस्तात् षड्गृहात्मिका त्रयोविंशतितमा पङ्क्तिर्न्यसनीया, तस्यामपि ये द्वे अन्तिमे गृहके ते[1] विमुच्य तस्या अधस्ताच्चतुर्गृहात्मिका चतुर्विंशतितमा पङ्क्तिः स्थापयितव्या । तस्यामपि ये द्वे अन्तिमे गृहके ते परित्यज्य तस्या अधस्तात् द्विगृहात्मिका पञ्चविंशतितमा पङ्क्तिः स्थाप्या, तस्या अधस्तादेकगृहात्मिका षड्विंशतितमा पङ्क्तिः ।

एवं षड्विंशतिपङ्क्त्यात्मकस्य यन्त्रकस्य सर्वोपरितन्याः प्रथमपङ्क्तेरुपरि प्रथमगृहके कृतकरण आचार्यः स्थापनीयः, द्वितीये गृहके अकृतकरणः, तृतीये कृतकरण उपाध्यायः, चतुर्थे स एवाकृतकरणः, पञ्चमे अधिगतस्थिरभिक्षुः कृतकरणः, षष्ठे स एवाकृतकरणः, सप्तमे अधिगतास्थिरभिक्षुः कृतकरणः, अष्टमे स एवाकृतकरणः, नवमे अनधिगतस्थिर-भिक्षुः कृतकरणः, दशमे स एवाकृतकरणः; एकादशे अनधिगतास्थिरभिक्षुः कृतकरणः, द्वादशे अनधिगतो[2]ऽस्थिरोऽकृतकरणः ।

एवं स्थापयित्वा कृतकरणस्याऽऽचार्यस्य मूलं तस्मिन्नेवापराधेऽकृतकरणस्य छेदः,

१. ते मुक्ता त॰ वा॰ पु॰ ॥ २. ॰गता स्थिरभिक्षु [ २ ]कृत॰ खं॰ ॥

उपाध्यायस्य मूलमापन्नस्य कृतकरणस्य छेदः, अकृतकरणस्य षण्मासगुरुः, तत्रैवाऽपराधे भिक्षोरधिगतस्य स्थिरस्य कृतकरणस्य षण्मासगुरुः, अकृतकरणस्य षण्मासलघु, अधिगतस्य भिक्षोरस्थिरस्य कृतकरणस्य षण्मासलघु, अकृतकरणस्य चतुर्मासगुरु, अनधिगतस्य भिक्षोः स्थिरस्य कृतकरणस्य चतुर्मासगुरु, अकृतकरणस्य चतुर्मासलघु, अनधिगतस्य भिक्षोरस्थिरस्य कृतकरणस्य चतुर्मासलघु, तस्यैवाऽकृतकरणस्य मासगुरु। एवं प्रथमपङ्क्तौ मूलादारब्धं मासगुरुके निष्ठितम् १। द्वितीयपङ्क्तौ प्रथमे गृहके छेदः, द्वितीये षड्गुरु, तृतीयेऽपि षड्गुरु, चतुर्थे षड्लघु, पञ्चमेऽपि षड्लघु, षष्ठे चतुर्गुरु, सप्तमेऽपि चतुर्गुरु, अष्टमे चतुर्लघु, नवमेऽपि चतुर्लघु, दशमे मासगुरु, एकादशेऽपि मासगुरु, द्वादशे मासलघु, अत्र छेदादारब्धं मासलघुके निष्ठितम् २।

तृतीयपङ्क्तौ प्रथमे गृहके षड्गुरु, द्वितीये षड्लघु, तृतीयेऽपि षड्लघु, चतुर्थे चतुर्मासगुरु । पञ्चमेऽपि चतुर्मासगुरु, षष्ठे चतुर्मासलघु, सप्तमेऽपि चतुर्मासलघु, अष्टमे मासगुरु, नवमेऽपि मासगुरु, दशमे मासलघु, एकादशेऽपि मासलघु, द्वादशे भिन्नमासो

गुरुः, अत्र षड्गुरुकादारब्धं भिन्नमासे गुरौ निष्ठितम् ३।

चतुर्थपङ्क्तौ प्रथमे गृहके षड्लघु, द्वितीये चतुर्मासगुरु, तृतीयेऽपि चतुर्मासगुरु, चतुर्थे चतुर्लघु, पञ्चमेऽपि चतुर्लघु, षष्ठे मासगुरु, सप्तमेऽपि मासगुरु, अष्टमे मासलघु, नवमेऽपि मासलघु, दशमे भिन्नमासो गुरुः, एकादशेऽपि भिन्नमासो गुरुः, द्वादशे भिन्नमासो लघुः। अत्र षट्लघुकादारब्धं लघुभिन्न-मासे निष्ठितम् ४। पञ्चमपङ्क्तौ प्रथमे गृहे चतुर्मासगुरु, द्वितीये चतुर्लघु, तृतीयेऽपि चतुर्लघु चतुर्थे मासगुरु, पञ्चमेऽपि मासगुरु, षष्ठे मासलघु सप्तमेऽपि मासलघु, अष्टमे भिन्नमासो गुरुः, नवमेऽपि भिन्नमासो गुरुः, दशमे भिन्नमासो लघुः, एकादशेपि भिन्नमासो लघुः द्वादशे गुरुविंशतिरात्रिन्दिवम्, अत्र चतुर्गुरुकादारब्धं गुरुविंशतौ[1] निष्ठितम् ५। षष्ठपङ्क्तौ प्रथमगृहे चतुर्मासलघु, द्वितीये मासगुरु, तृतीयेऽपि मासगुरु, चतुर्थे मासलघु, पञ्चमेऽपि मासलघु, षष्ठे गुरुकं पञ्चविंशतिकम्, सप्तमेऽपि गुरुकं पञ्चविंशतिकम्। अष्टमे लघुपञ्चविंशतिकं, नवमेपि लघुपञ्चविंशतिकं, दशमे गुरुविंशतिकम्, एकादशेपि गुरुविंशतिकं, द्वादशे लघुविंशतिकम्, अत्र चतुर्लघुकादारब्धं लघुविंशतिके

१. गुरुके विंशतिरात्रिन्दिवे स्थितम् ५ । ष० वा० मो० पु० मु० ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निष्ठितम् ६। सप्तमपङ्क्तौ-प्रथमगृहे मासगुरु, द्वितीये मासलघु, तृतीयेपि मासलघु, चतुर्थे गुरुपञ्चविंशतिकं पञ्चमेऽपि गुरुपञ्चविंशतिकं, षष्ठे लघुपञ्चविंशतिकं, सप्तमेऽपि लघुपञ्चविंशतिकं, अष्टमे गुरुविंशतिकं, नवमेऽपि गुरुविंशतिकं, दशमे लघुविंशतिकम्, एकादशेपि लघुविंशतिकं, द्वादशे गुरुपञ्चदशकं, अत्र मासगुरुकादारब्धं गुरुपञ्चदशके पर्याप्तम् ७। अष्टमपङ्क्तौ प्रथमे गृहके मासलघु, द्वितीये गुरुपञ्चविंशतिकं, तृतीयेऽपि गुरुपञ्चविंशतिकं, चतुर्थे पञ्चविंशतिकं लघु, पञ्चमे पञ्चविंशतिकं लघु, षष्ठे गुरुविंशतिकं, सप्तमे गुरुविंशतिकं, अष्टमे लघुविंशतिकं, नवमे लघुविंशतिकं, दशमे गुरुपञ्चदशकं, एकादशे गुरुपञ्चदशकं, द्वादशे लघुपञ्चदशकम्, अत्र मासलघुकादारब्धं लघुपञ्चदशके पर्याप्तम् ८।

नवमपङ्क्तौप्रथमगृहे गुरुपञ्चविंशतिकं द्वितीये लघुपञ्चविंशतिकं, तृतीये लघुपञ्चविंशतिकं, चतुर्थे गुरुविंशतिकं, पञ्चमे गुरुविंशतिकं, षष्ठे लघुविंशतिकं, सप्तमे लघुविंशतिकम्, अष्टमे गुरुपञ्चदशकं, नवमे गुरुपञ्चदशकं, दशमे लघुपञ्चदशकम्, एकादशके लघुपञ्चदशकं, द्वादशे गुरुदशकम्, अत्र गुरुपञ्चविंशतिकादारब्धं गुरुदशके निष्ठितम् ९।

दशमपङ्क्तौ-प्रथमगृहे लघुपञ्चविंशतिकं, द्वितीये गुरुविंशतिकं, तृतीये गुरुविंशतिकं,



For Private And Personal Use Only

चतुर्थे लघुविंशतिकं, पञ्चमे लघुत्रिंशतिकं, षष्ठे गुरुपञ्चदशकं, सप्तमे गुरुपञ्चदशकं, अष्टमे लघुपञ्चदशकं, नवमे लघुपञ्चदशकं, दशमे गुरुदशकम्, एकादशे गुरुदशकं, द्वादशे दशकं लघु । अत्र लघुपञ्चविंशतिकादारब्धं लघुदशके स्थितम् १० ।

एकादशपङ्क्तौ-प्रथमे गृहके गुरुविंशतिकं, द्वितीये लघुविंशतिकं, तृतीये लघुविंशतिकं, चतुर्थे गुरुपञ्चदशकं, पञ्चमे गुरुपञ्चदशकं, षष्ठे लघुपञ्चदशकं, सप्तमे लघुपञ्चदशकम् । अष्टमे गुरुदशकं नवमे गुरुदशकं, दशमे लघुदशकं एकादशे लघुदशकं, द्वादशे गुरुपञ्चकम्, अत्र गुरुविंशतिकादारब्धं गुरुपञ्चके पर्याप्तम् ११ । द्वादशपङ्क्तौ-प्रथमे गृहके लघुविंशतिकं, द्वितीये गुरुपञ्चदशकं, तृतीये गुरुपञ्चदशकं, चतुर्थे लघुपञ्चदशकं, पञ्चमे लघुपञ्चदशकं, षष्ठे गुरुदशकं, सप्तमे गुरुदशकं, अष्टमे लघुदशकं, नवमे लघुदशकं, दशमे गुरुपञ्चकम्, एकादशे गुरुपञ्चकं, द्वादशे लघुपञ्चकम्, अत्र लघुविंशतिकादारब्धं लघुपञ्चके पर्याप्तम् १२ । त्रयोदशपङ्क्तौ-प्रथमे गृहके गुरुपञ्चदशकं, द्वितीये लघुपञ्चदशकं, तृतीये लघुपञ्चदशकं, चतुर्थे गुरुदशकं, पञ्चमे गुरुदशकं, षष्ठे लघुदशकं सप्तमे लघुदशकं, अष्टमे गुरुपञ्चकं, नवमे गुरुपञ्चकं, दशमे लघुपञ्चकम्, एकादशे लघुपञ्चकं, द्वादशे दशमम् । अत्र गुरुपञ्चदशकादारब्धं दशमे निष्ठितम् १३ । चतुर्दशपंक्तौ-प्रथमगृहके लघुपञ्चदशकं, द्वितीये

गुरुदशकं, तृतीये गुरुदशकं, चतुर्थे लघुदशकं, पञ्चमे लघुदशकं, षष्ठे गुरुपञ्चकं, सप्तमे गुरुपञ्चकम्, अष्टमे लघुपञ्चकं, नवमे लघुपञ्चकं, दशमे दशमम्, एकादशे दशमं, द्वादशे अष्टमम् अत्र लघुपञ्चदशकादारब्धमष्टमे निष्ठितम् १४। पञ्चदशपङ्क्तौ-प्रथमे गृहके गुरुदशकं, द्वितीये लघुदशकं, तृतीये लघुदशकं, चतुर्थे गुरुपञ्चकं, पञ्चमे गुरुपञ्चकं, षष्ठे लघुपञ्चकं, सप्तमे लघुपञ्चकम्, अष्टमे दशमं, नवमे दशमं, दशमे अष्टमम्, एकादशे अष्टमं, द्वादशे षष्ठं। अत्र गुरुदशकादारब्धं षष्ठे निष्ठितम् १५। षोडशपङ्क्तौ-प्रथमे गृहके लघुदशकं, द्वितीये गुरुपञ्चकं, तृतीये गुरुपञ्चकं, चतुर्थे लघुपञ्चकं, पञ्चमे लघुपञ्चकं, षष्ठे दशमम्, सप्तमे दशमं, अष्टमे अष्टमं, नवमे अष्टमं, दशमे षष्ठम्, एकादशे षष्ठं, द्वादशे चतुर्थम्, अत्र लघुदशकादारब्धं चतुर्थे निष्ठितम् १६। सप्तदशपङ्क्तौ-प्रथमे गृहके गुरुपञ्चकं, द्वितीये लघुपञ्चकं, तृतीये लघुपञ्चकं, चतुर्थे दशमं, पञ्चमे दशमम्, षष्ठे अष्टमं, सप्तमे अष्टमं, अष्टमे षष्ठं, नवमे षष्ठं, दशमे चतुर्थम्, एकादशे चतुर्थं, द्वादशे आचामाम्लमिति। अत्र गुरुपञ्चकादारब्धमाचामाम्ले निष्ठितम् १७। अष्टादशपङ्क्तौ-प्रथमगृहके लघुपञ्चकं, द्वितीये दशमं, तृतीये दशमं, चतुर्थेऽष्टमं, पञ्चमेऽष्टमं, षष्ठे षष्ठं, सप्तमे षष्ठं, अष्टमे चतुर्थं, नवमे चतुर्थं, दशमे आचामाम्लम्, एकादशे आचामाम्लं, द्वादशे एकाशनकम्, अत्र

लघुपञ्चकादारब्धमेकाशने निष्ठितम् १८। एकोनविंशतितमायां पङ्क्तौ-प्रथमगृहके दशमं, द्वितीये अष्टमं, तृतीये अष्टमं, चतुर्थे षष्ठं, पञ्चमे षष्ठं, षष्ठे चतुर्थं, सप्तमे चतुर्थम्, अष्टमे आचामाम्लं नवमे आचामाम्लं, दशमे एकाशनकं, एकादशे एकाशनकं, द्वादशे पूर्वार्धम्, अत्र दशमादारब्धं पूर्वार्धे निष्ठितम् १९। विंशतितमायां पङ्क्तौ-प्रथम गृहके अष्टमं, द्वितीये षष्ठं, तृतीये षष्ठं, चतुर्थे चतुर्थं, पञ्चमे चतुर्थं, षष्ठे आचामाम्लं, सप्तमे आचामाम्लम्, अष्टमे एकाशनकं, नवमे एकाशनकं, दशमे पूर्वार्धम्, एकादशे पूर्वार्धं, द्वादशे निर्विकृतिकम्, अत्राष्टमादारब्धं निर्विकृतिके निष्ठितम् २०। एकविंशतितमायां पङ्क्तौ-प्रथमगृहके षष्ठं, द्वितीये चतुर्थं, तृतीये चतुर्थं, चतुर्थे आचामाम्लं, पञ्चमे आचामाम्लं, षष्ठे एकाशनकम्, सप्तमे एकाशनकम्, अष्टमे पूर्वार्द्धं, नवमे पूर्वार्द्धं दशमे निर्विकृतिकम्, अत्र षष्ठादारब्धं निर्विकृतिके निष्ठितम् २१।

द्वाविंशतितमायां पङ्क्तौ-प्रथमे गृहके चतुर्थं, द्वितीये आचामाम्लं, तृतीये आचामाम्लं, चतुर्थे एकाशनं, पञ्चमे एकाशनं, षष्ठे पूर्वार्द्धं, सप्तमे पूर्वार्द्धं, अष्टमे निर्विकृतिकम्, अत्र चतुर्थादारब्धं निर्विकृतिके निष्ठितम् २२। त्रयोविंशतितमायां पङ्क्तौ-प्रथमे गृहके आचा-माम्लं, द्वितीये एकाशनकं, तृतीये एकाशनकं, चतुर्थे पूर्वार्द्धं पञ्चमे पूर्वार्द्धं, षष्ठे निर्विकृति-

कम् २३। चतुर्विंशतितमपङ्क्तौ प्रथमे गृहके एकाशनकं, द्वितीये पूर्वार्द्धं, तृतीये पूर्वार्द्धं, चतुर्थे निर्विकृतिकम्२४। पञ्चविंशतितमकपङ्क्तौ-प्रथमे गृहके पूर्वार्द्धं द्वितीये निर्विकृतिकम् २५। षड्विंशतितमायां पङ्क्तौ निर्विकृतिकमिति २६।

तदेवं 'कयकरणा इयरे वा' [गा.१५९]इत्यादिना ये पुरुषभेदाः प्रागुक्तास्तेषां प्रायश्चित्तदानविधिरुक्तः, सम्प्रति 'जं सेवेइ अहिगतो' [गा.१६०] इत्यादि यत् गाथोत्तरार्द्धमुक्तं, तद्व्याख्यानार्थमाह—

**अकयकरणा उ[1] गीया, जे य अगीया य अकय अथिरा य ।**
**तेसाऽऽवत्ति[2] अणंतर, बहुअंतरियं व झोसो वा ॥ १६८ ॥**

**ये गीताः** गीतार्थाः, अधिगता इत्यर्थः, **अकृतकरणाः, ये च अगीता** अगीतार्था, अनधिगता इति भावः, **अकय**त्ति अकृतकरणाश्च, चशब्दात् कृतकरणाश्च, **अस्थिराश्च** कृतकरणा अकृतकरणाश्च, **तेषां** कदाचिद् **आपत्तिः** प्रायश्चित्तं दीयते[3], यत् प्रायश्चित्तम्

१. य - चूर्णौ ॥ २. त्ति भणंतर-भाष्यप्रतिषु ॥ ३. ते यद् यत् प्रा॰ वा॰ मो॰ पु॰ मु॰ ॥

आपन्नं तदेव दीयते इति यावत्, कदाचित् तथाविधायामसमर्थतायां यत्प्रायश्चित्तमापन्नं तस्यार्वाक्तनमनन्तरं दीयते, कदाचित्प्रभूतायामसमर्थतायां **बहून्तरितं** बहुभिः प्रायश्चित्तै-रन्तरितमर्वाक्तनं दीयते इति यावत्, अत्यन्ताऽसमर्थतायां **झोसो वा** सर्वस्य[1] प्रायश्चित्तस्य परित्यागः, आलोचनामात्रेणैव तस्यामवस्थायां तस्य शुद्धिभावात् । यथा कृतकरणस्यो-पाध्यायस्य मूलमापन्नस्य तथाविधयोग्यतायां मूलं दीयते, अकृतकरणस्य पुनरसमर्थ इति कृत्वा छेदः, तथाप्यसमर्थतायां षड्गुरु, तत्राप्यशक्तौ षड्लघु , एवं तावन्नेयं यावन्निर्वि-कृतिकं, तत्राप्यशक्तौ पौरुषी, तत्राप्यसमर्थतायां नमस्कारसहितं, तस्यापि गाढग्लानत्व-भावतोऽसम्भवे एवमेवालोचनामात्रतः शुद्धिरिति ॥ १६८॥ तदेवं 'कयकरणा इयरे वा'। इत्यादिगाथाद्वयं [गा. १५९-१६०] सकलमपि भावितम्। अधुना 'सावेक्खा आयरीयमादी' [गा. १५९] इति यदुक्तं तत्र परस्याऽऽक्षेपमाह—



**आयरियादी तिविहो, सावेक्खाणं तु किं कतो भेदो ? ।**
**एएसिं पच्छित्तं, दाणं चऽण्णं अतो तिविहो ॥ १६९ ॥**

---

१. सर्वप्राय॰ वा॰ पु॰ । सर्वथा प्रायश्चित्तेभ्यः परि॰ खं॰ ॥

For Private And Personal Use Only

नन्वाचार्योपाध्याययोरपि भिक्षुत्वस्याऽवस्थितत्वात् तद्ग्रहणे तयोरपि ग्रहणमिति **किं** किमर्थं **सापेक्षाणां त्रिविधः आचार्यादिकः** आचार्योपाध्याय-भिक्षुलक्षणः **कृतो भेदः?** एवमुक्ते सूरिराह— **एएसि**मित्यादि, एतेषामाचार्यादीनां यद् आभवति प्रायश्चित्तं यच्च तस्य प्रायश्चित्तस्य समर्थाऽसमर्थपुरुषाद्यपेक्ष्य **दानं** तत् पृथक् पृथग् **अन्यत्, अतः** सापेक्षाणामाचार्यादिक**स्त्रिविधो** भेदः कृतः ॥ १६९ ॥ एतदेव सविशेषमाह—

**कारणमकारणं[2] वा, जयणाऽजयणा व नत्थऽगीयत्थे ।**
**एएण कारणेणं, आयरियाई भवे तिविहा ॥ १७० ॥**

इदं **कारणं** प्रतिसेवनाया इद**मकारणं वा,** तथा इयं **यतना इयमयतना** इत्येत**न्नास्ति अगीतार्थे** अगीतार्थस्य तु, अर्थाद् गीतार्थस्यास्तीति प्रतीयते[3], तत्राऽऽचार्योपाध्यायौ गीतार्थौ, भिक्षुः गीतार्थोऽगीतार्थश्च। गीतार्थस्य अगीतार्थस्य च कारणे यतनया, कारणे अयतनया, अकारणे यतनया, अकारणे अयतनया, पृथक् पृथग् अन्यद् अन्यत् प्रायश्चित्तम्। सहाऽसहपुरुषाद्य[4]पेक्षया तुल्येऽपि प्रायश्चित्ते आपद्यमाने पृथग[5]न्योऽन्यो दानविधिः,

गाथा १६९-१७२ प्रायश्चित्त-दानभेदे कारणानि

१. कारणे वा - जेभा॰ खंभा॰ ॥ २. ॰ते । यतश्चाचार्यो॰ खं॰ ॥ ३. ॰द्यपेक्ष्य तु॰ वा॰ मो॰ पु॰ ॥ ४. ॰गन्यान्यदान॰ वा॰ पु॰ ॥



For Private And Personal Use Only

अत **एतेन कारणेनाचार्यादयस्त्रिविधा भवन्ति,** सूत्रे **भवे** इति बहुत्वेऽप्येकवचनं प्राकृतत्वात्, प्राकृते हि वचनव्यत्ययोपि क्वचिद् भवति इति॥१७०॥ एनामेव गाथां व्याख्यानयति—

**कज्जाऽकज्ज जयाऽजय, अविजाणंतो अगीतो जं सेवे ।**
**सो होइ तस्स दप्पो, गीये दप्पाऽजए दोसा ॥ १७१ ॥**

**कार्यं** नाम प्रयोजनं, यच्च प्रयोजनं तद् अधिकृतप्रवृत्तेः प्रयोजकत्वात् कारणम्, अत एवान्यत्रोक्तं— **'कारणं ति वा कज्जं ति वा एगट्ठं', [ व्यवहारचूर्णौ ]** ततोऽयमर्थः **अगीतो**ऽगीतार्थः कारणं न जानाति, यस्मिन्प्राप्ते प्रतिसेवना क्रियते । अकारणं न जानाति यस्मिन् प्रतिसेवना न क्रियते, तथा कारणे अकारणे वा प्राप्ते सेवनं कुर्वन् यतनामयतनां वा न जानाति। एतान्यजानानो यः **सेवते** प्रतिसेवते, **[ स ] तस्य दर्प्पो भवति,** सा तस्य दर्प्पिका प्रतिसेवना भवतीति भावः। गीतार्थः पुनः सर्वाण्यप्येतानि जानाति, ततः कारणे प्रतिसेवते, नाऽकारणे; कारणेऽपि यतनया, न पुनरयतनया, ततः स शुद्ध एव, न प्रायश्चित्तविषयः। अगीतार्थस्य त्वज्ञानतया दर्प्पेण प्रतिसेवमानस्य प्रायश्चित्तम्। यदि पुनः गीतार्थोऽपि दर्प्पेण प्रतिसेवते, कारणेऽप्ययतनया वा तदा तुल्यमगीतार्थेन समं तस्य

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रायश्चित्तम्। तथा चाह "**गीए दप्पाऽजए दोसा,**" गीते-गीतार्थे दर्प्पेण प्रवर्तमाने सति प्रतिसेवनायामिति गम्यते, कारणेऽपि प्रतिसेवनायाम् अयतमाने अगीतार्थेन तुल्या दोषाः, अगीतार्थेन तुल्यं तस्य प्रायश्चित्तमिति भावः। प्रतिसेव्यमाने तुल्ये वस्तुनि दर्प्पेणाऽपि क्रियमाणायां प्रतिसेवनायां यतनया प्रवृत्तौ[1] न तुल्यं प्रायश्चित्तम्। कारणे पुनर्यतनया प्रवर्त्तमानः शुद्ध एव, न प्रायश्चित्तविषयः। तत्राऽऽचार्या उपाध्यायाश्च नियमाद् गीतार्था इति गीतार्थत्वाऽपेक्षया समानाः[2] केवलं प्रतिसेव्यमानं वस्तु प्रतीत्य[3] भिन्नविषयाः। भिक्षवो गीतार्थाऽगीतार्थाश्च भवन्ति, प्रतिसेव्यमानमपि[4] वस्त्वधिकृत्य भेद इति वस्तुभेदतो गीतार्थत्वाऽगीतार्थत्वतश्च पृथग् विभिन्नं विभिन्नं प्रायश्चित्तं, सहाऽसहपुरुषाद्यपेक्षया तु तुल्येप्याऽऽभवति प्रायश्चित्ते पृथग् विभिन्नविभिन्नं प्रायश्चित्तदानम् ॥१७१॥ तथा चाह—

**दोस-विहवाणुरूवो, लोए दंडो वि किमुत उत्तरिए? ।**
**तित्थुच्छेदो इहरा, निराणुकंपा न य विसोही ॥ १७२ ॥**



**दंडो वीति**, अपिशब्दः भिन्नक्रमत्वात् लोकेपि इत्येवं द्रष्टव्यः[5], **लोकेऽपि दण्डो दोष-**

---

१. प्रवृत्तौ तत्तुल्यं-वा॰ मो॰ पु॰ ॥ २. समाः, के॰ वा॰ मो॰ पु॰ मु॰ ॥ ३. ॰त्य विषमाः वा॰ मो॰ पु॰ मु॰ ॥ ४. ॰व्यमपि - वा॰ मो॰ पु॰ मु॰ ॥ ५. द्रष्टव्यम्-खं॰ ॥

For Private And Personal Use Only

**विभवानुरूपो** [दोषानुरूपः]विभवानुरूपश्च। तथाहि- महत्यपराधे महान् दण्डः, अल्पेऽल्पीयान्, तथा समानेऽपि दोषेऽल्पधनस्याऽल्पो महाधनस्य महान्। लोकेऽपि तावदेवं, **किमुत** किंपुनः **औत्तरिके** लोकोत्तरसंबन्धिनि व्यवहारे, तत्र सुतरां दोष-सामर्थ्यानुरूपो दण्डः, तस्य सकलजगदनुकम्पाप्रधानत्वात् । यदि पुनरल्पेपि दोषे महान् दण्डो महत्यप्यल्पीयान् तथा यदि समानेप्यपराधे कृतकरणत्वमकृतकरणत्वं चाऽऽचार्योपाध्याययोः भिक्षोरपि कृतकरणत्वमकृतकरणत्वमधिगतत्वमनधिगतत्वं स्थिरत्वमस्थिरत्वं चानपेक्ष्य न तदनुरूपो दण्डः स्यात्, किन्तु तुल्य एव, तदा व्यवस्थाया अभावतः सन्तानप्रवृत्त्यसम्भवे **तीर्थोच्छेदः** स्यात्। तथा **निरनुकम्पा** अनुकम्पाया अभावः प्रायश्चित्तदायकस्य, असमर्थभिक्षुप्रभृतीनामननुग्रहात्, **न च** तस्य प्रायश्चित्तदायकस्य **विशोधिः** अप्रायश्चित्तस्य [प्रायश्चित्ते] प्रायश्चित्तेप्यति-मात्रप्रायश्चित्तस्य दानतो महाऽऽशातना सम्भवात् ।

[सुत्ते य इमं भणियं] '**अप्पच्छित्ते य देइ पच्छित्तं ।**
**पच्छित्ते अइमत्तं, आसायणा तस्स महती उ' [ उपदेशमाला** गा. ४०९]

इति वचनात्। ततः सापेक्षा आचार्यादयस्त्रिविधा उक्ताः॥ १७२॥ अत्रैव प्रकारान्तर-माह—

**अहवा कज्जाऽकज्जे, जयाऽजयंते य कोविदो गीयो ।**
**दप्पाऽजतो निसेवं, अणुरूवं पावए दोसं ॥ १७३ ॥**

**अथवेति** प्रकारान्तरे, गीतो-गीतार्थः, स कारणमपि जानाति अकारणमपि जानाति, यतनामपि जानाति अयतनामपि जानाति; एवं **कार्याऽकार्ये यताऽयते कोविदो गीतार्थो** यदि दर्प्पेण प्रतिसेवते कारणेऽप्ययतनया तदा स **दर्प्पाऽयतो**[1] **निषेवमाणोऽनुरूपं** दर्पानुरूपमयतनारूपं **दोषं** प्रायश्चित्तं **प्राप्नोति**, दर्प्पाऽयतनानिष्पन्नं तस्मै प्रायश्चित्तं दीयते इति भावः ॥ १७३ ॥

**कप्पे**[2] **य अकप्पम्मि य, जो पुण अविणिच्छितो अकज्जं पि ।**
**कज्जमिति सेवमाणो अदोसवं सो असढभावो ॥ १७४ ॥**

**यः पुनः कल्पेऽकल्पे च अविनिश्चितः** किं कल्प्यं? किमकल्प्यम्? इति विनिश्चय-रहितः **सोऽकार्यमपि** अकरणीयमपि अकल्प्यमिति भावः, **कार्यमिति** कल्पिकमिति बुद्ध्या **सेवमानोऽशठभावः**, अत्र हेतौ प्रथमा, अशठभावत्वाद् **अदोषवान्** प्रायश्चित्तभाग् न भवतीति भावः ॥ १७४ ॥

---

१. दर्प्पायतनातो-मु० ॥ २. कप्पम्मि अक० भाष्यप्रतिषु ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**जं वा दोसमयाणंतो, हेहंभूतो निसेवई ।**
**होज्जा निद्दोसवं केण, वियाणंतो तमायरं[1]?॥ १७५ ॥**

**हेहम्भूतो** नाम गुण-दोषपरिज्ञानविकलोऽशठभावः, स **यं दोषमजानानो निषेवते** प्रतिसेवते, **तमेव** दोषं **विजानानः** कोविदो गीतार्थः **आचरन्** समाचरन् **केन** हेतुना **निर्दोषवान्** दोषस्याऽभावो निर्दोषं, तदस्यास्तीति निर्दोषवान् दोषाऽभाववान् भवेत् ? नैव भवतीति भावः, तीव्रदुष्टाध्यव्यसायभावात्। न खलु जानानस्तीव्रदुष्टाध्यवसायमन्तरेण तथा प्रवर्त्तते इति ॥ १७५ ॥ तदेवं दृष्टान्तमभिधायाऽधुना दार्ष्टान्तिकयोजनामाह–

**एमेव य तुल्लम्मि वि, अवराहपयम्मि वट्टिया दो वि ।**
**तत्थ वि जहाणुरूवं, दलंति दंडं दुवेण्हं पि ॥१७६॥**

**एवमेव** अनेनैव प्रकारेण, अनेनैव दृष्टान्तेनेति भावः, **द्वावपि** जनौ, आस्तामेक इत्यपि शब्दार्थः, **तुल्येऽपि** समानेप्य**पराधपदे वर्त्तितौ, तत्रापि** तुल्येऽप्यपराधपदे **द्वयोरपि** तयो**र्यथानुरूपं** गीतार्थाऽ-गीतार्थ-यतना-संहननविशेषानुरूपं **दण्डं दलयंति** प्रयच्छन्ति। तस्मात् प्रायश्चित्तभेदतः प्रायश्चित्तदानभेदतश्चाचार्यादिकस्त्रिविधो भेदः कृतः॥ १७६ ॥ तदेव–

१. तमातरं – जेभा॰ खंभा॰ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



माचार्यादित्रिविधभेदसमर्थनायोक्तरूपदृष्टान्तवशतो गीतार्थाऽगीतार्थादिभेदतः आभवत्प्रायश्चित्तनानात्वं विशोधिनानात्वं चोपदर्शितम्। इदानीमत एव दृष्टान्तादवस्थाभेदतो गीतार्थे एव केवले शोधिनानात्वमुपदर्शयति-

**एसेव यं[1] दिट्ठंतो, तिविहे गीयम्मि सोहिनाणत्ते ।**
**वत्थुसरिसो उ दंडो, दिज्जइ लोए वि पुव्वुत्तं ॥ १७७ ॥**

**गीते** गीतार्थे **त्रिविधे** त्रिप्रकारे बाल-तरुण-वृद्धलक्षणे यत् **शोधिनानात्वं** तद्विषये **एष एव** अनन्तरोदितस्वरूपो दृष्टान्तः, तथाहि— यथा कल्प्याऽकल्प्यविधिपरिज्ञानविकलो अकल्पनीयमपि कल्पनीयमिति बुद्ध्या प्रतिसेवमानो न दोषवान् भवति, कोविदस्तु कल्प्याऽकल्प्ये जानानोऽकल्पनीयं प्रतिसेवमानो दोषवान् । एवमिहापि तुल्ये प्रतिसेव्यमाने वस्तुनि तरुणे प्रभूतं प्रायश्चित्तं, समर्थत्वात्। बाल-वृद्धयोः स्तोकम्, असमर्थत्वात्, न चैतदन्याय्यं, यतो **लोकेऽपि वस्तुसदृशः** पुरुषानुरूपो **दण्डो** दीयते। तथाहि–बाले बृद्धे च महत्यप्यपराधे करुणाऽऽस्पदत्वात् स्तोको दण्डः, तरुणे महान्। एतच्च **पुव्वुत्त**मिति प्रागेवोक्तं 'दोसविहवाणुरूवो' [गा.१७२] इत्यादिना, ततो न्याय्यमनन्तरोदितमिति ॥१७७॥ सम्प्रत्याचार्योपाध्याय-भिक्षूणामेव चिकित्साविषये विधिनानात्वं दर्शयति-

१. तु -भाष्यप्रतिषु ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



**[1]तिविहे तेगि[2]च्छम्मि, उज्जुय-वाउलण-साहणा चेव ।**
**पण्णवणमणिच्छंते, दिट्ठंतो भंडिपोएहिं ॥ १७८ ॥**

**त्रिविधे** त्रिप्रकारे आचार्योपाध्याय-भिक्षुलक्षणे **चिकित्स्ये** चिकित्स्यमाने गीतार्थे इति गम्यते, **उज्जुयत्ति** ऋजुकं स्फुटमेव **व्यापृतसाधना** व्यापृतक्रियाकथनं कर्त्तव्यम्। इयमत्र भावना-आचार्याणामुपाध्यायानां गीतार्थानां च भिक्षूणां विचिकित्स्यमानानां यदि शुद्धं प्रासुकमेषणीयं लभ्यते, तदा समीचीनमेव, न तत्र विचारः, अथ प्रासुकमेषणीयं न लभ्यते ऽवश्यं च चिकित्सा कर्त्तव्या तदा अशुद्धमप्यानीय दीयते, तथाभूते च दीयमाने स्फुटमेव निवेद्यते 'इदमेवम्भूतम्' इति, तेषां गीतार्थत्वेनाऽपरिणामदोषस्यातिपरिणामदोषस्य चाऽसम्भवात् । अगीतार्थभिक्षोः पुनः शुद्धाऽलाभे चिकित्सामशुद्धेन कुर्वन्तो मुनिवृषभा यतनया कुर्व्वन्ति, न चाशुद्धं कथयन्ति । यदि पुनः कथयन्ति अयतनया वा कुर्वन्ति, तदा सोऽपरिणामत्वादनिच्छन् यत् अनागाढादिपरितापनमनुभवति तन्निमित्तं प्रायश्चित्तमापद्यते तेषां मुनिवृषभाणां, यद्वाऽतिपरिणामकतया सोऽतिप्रसङ्गं कुर्यात्, तस्मान्न कथनीयं, नाप्ययतना

गाथा १७८-१८० चिकित्सा-विधि स्वरूपम् १०६ (A)

१. तिण्ह वि तेगि० जेभा० खंभा० चूर्णि प्रत्यन्तरेपु च ॥ २. ०च्छम्मि उ उज्ज० वा० पु० ॥

For Private And Personal Use Only

कर्त्तव्या। अथ कथमपि तेनाऽगीतार्थेन भिक्षुणा ज्ञातं भवेत्, **यथा-अकल्पिकमानीय** मह्यं दीयते इति तदा तदनिच्छन् प्रज्ञाप्यते । तथा चाह— **पण्णवणमणिच्छंते** इति, अकल्पिकमनिच्छत्यगीतार्थे भिक्षौ प्रज्ञापना कर्त्तव्या । यथा-ग्लानार्थं यदकल्पिकमपि यतनया सेव्यते तत्र शुद्धो ग्लानः, यतनया प्रवृत्तेरल्पीयान् दोषोऽशुद्धग्रहणात्, सोपि च पश्चात् प्रायश्चित्तेन शोधयिष्यते। न चासावल्पीयान् दोषो नाङ्गीकर्त्तव्यः, उत्तरकालं प्रभूत-संयम[1]लाभात्। तथाहि-चिकित्साकरणतः प्रगुणीभूतः स[2]न् परिपालयिष्यसि चिरकालं संयमं, सं[3]यमप्रभावतश्च कदाचित् गम्यते तद्भव एव मोक्षः, यदि पुनश्चिकित्सां न कार-यिष्यसि ततस्तदकरणतो मृतः सन्नसंयतो भविष्यसि, असंयतस्य च भूयान् कर्म्मबन्धः, तस्मादल्पेन बह्वन्वेष्यताम्, एतद्विद्वत्ताया लक्षणम्। उक्तं च- **'अप्पेण बहुमेसेज्जा एयं पंडियलक्खणमिति,'** [] एवं प्रज्ञापना तरुणे क्रियते। यः पुनः बालः स बालत्वात् यथाभणितं करोत्येव।

यस्तु वृद्धस्तरुणो वाऽतिरोगग्रस्तोऽविचिकित्सनीयः स [4]प्रोत्साह्यते 'महानुभाव ! कुरु भक्तप्रत्याख्यानं, साधय पूर्वमहर्षिरिवोत्तमार्थम् एतज्जिनवचनाधिगमफलमिति।' यदि पुन-

---

१. ०मभावात् - वा० पु० ॥ २. सन् पालयिष्यति चि० वा० मो० पु० ॥ ३. ०मलाभवत० पु. प्रे.॥ ४ प्रोच्यते-खं ॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रेवमुत्साह्यमानोऽपि न भक्तप्रत्याख्यानं कर्त्तुमिच्छति, तदा **भण्डी-पोताभ्यां दृष्टान्तः** करणीयः, भण्डी–गन्त्री, पोतः–प्रवहणं, दृष्टान्तकरणं चाऽग्रे स्वयमेव दर्शयिष्यति। एष गाथासमासार्थः ॥१७८॥ साम्प्रतमेनामेव गाथां विवृणोति–

**सुद्धालाभे[१] अगीते, अजयणकरणकहणे भवे गुरुगा ।**
**कुज्जा व अतिपसंगं, असेवमाणे व असमाही ॥ १७९ ॥**

**अगीते** अगीतार्थे भिक्षौ **शुद्धाऽलाभे** प्रासुकैषणीयाऽलाभे अशुद्धेन चिकित्स्यमाने यदि **अयतना क्रियते कथ्यते** वा तदा मुनिवृषभाणामयतनाकारिणां कथयतां प्रायश्चित्तं **भवति गुरुका**श्चत्वारो मासा गुरवः। इयमत्र भावना–यदि अयतनाकरणतः कथनतो वा ज्ञातं भवति, यथा– 'ममाऽशुद्धेन चिकित्सा क्रियते', तदा तेषां मुनिवृषभाणां चत्वारो गुरुकाः। एतच्चाऽसामाचारीप्रवृत्तिनिषेधार्थं प्रायश्चित्तम्। या पुनरनिच्छतोऽसमाधिप्रवृत्तेरनागाढादिपरितापना तन्निष्पन्नमन्यदेव पृथगिति, यदि वा सोऽतिपरिणामकत्वा**दतिप्रसङ्गं कुर्यात्** । अथवा चिकित्सायाः प्रतिषेधतोऽकल्पनीयम**सेवमाने** रोगवृद्धिवशाद**समाधि**-

१. ०भेऽगीते – खं. पु. ॥



For Private And Personal Use Only

स्तस्य स्यात्, असमाहितस्य च कुगतिप्राप्तिः[1] तस्मात् तस्मिन् यतनया कर्त्तव्यं, न च कथनीयमिति ॥ १७९ ॥ साम्प्रतं यदुक्तं 'भण्डी-पोताभ्यां दृष्टान्तः कर्त्तव्य' इति तत्र भण्डीदृष्टान्तं भावयति-

**जा एगदेसे अदढा उ भंडी, सीलप्पए सा उ करेइ कज्जं ।**
**जा दुब्बला संठविया वि संती, न तं तु सीलंति विसणणदारुं[2] ॥ १८० ॥**

**या भण्डी** गन्त्री **एकदेशे** क्वचित् **अदृढा** सा **शीलाप्यते** तस्याः परिशीलनं कार्यते, तुशब्दो यस्मादर्थे, यतः **सा** तथा शीलिता सती **करोति कार्यं, या** पुनः **संस्थापिताऽपि सती दुर्बला** न कार्यकरणक्षमा **तां विषण्णदारुं** नैव **तु**शब्द एवकारार्थो भिन्नक्रमत्वादत्र सम्बध्यते शीलयन्ति, कार्यकरणाक्षमत्वात् । एष भण्डीदृष्टान्तः । एतदनुसारेण पोतदृष्टान्तोऽपि भावनीयः तद्यथा-

*जो एगदेसे अदढो उ पोतो, सीलप्पए सो उ करेइ कज्जं ।*
*जो दुब्बलो संठवितो वि संतो, न तं तु सीलंति विसण्णदारुं* ॥ [ व्य.भा.६१५ ]

१. कुगतिप्रपातः, त० वा० मो० मु० ॥ २. विसिण्णदारुं - जेभा० ॥

दार्ष्टान्तिकयोजना[1] त्वेवं- यदि प्रभूतमायुः सम्भाव्यते, प्रगुणीकृ[2]तदेहश्च संयमव्यापारेषु समर्थ इति ज्ञायते, त[3]दाऽधिककालसंयमपरिपालनाय युक्ता चिकि-त्सा, 'अल्पेन प्रभूतमन्वेषयेद्' इति वचनात् । यदा त्वाऽऽयुः संदिग्धं, न प्रगुणीकृतोऽपि देहः संयमव्यापारक्षमः, तदैवं प्रज्ञापना निष्फला चिकित्सेति न चिकित्सा कारयितुमुचितेति ॥ १८० ॥ अन्यच्च—

**संदेहियमारोग्गं, पउणो वि न पच्चलो य[4] जोगाणं ।**
**इइ सेवंतो दप्पे, वट्टइ न य सो त[5]हा कज्जो ॥ १८१ ॥**

**संदिग्धमारोग्य**मिति, रोगग्रस्तत्वात् । **न च प्रगुणोऽपि** प्रगुणीकृतोऽपि **योगानां** संयमव्यापाराणां करणे **प्रत्यलः** समर्थ इति जानानो यदि यतनयाप्यकल्प्यं प्रतिसेवते, तदा स **दर्प्पे** वर्त्तते, **न च स तथा**रूपो दर्प्पो गीतार्थेन **करणीयः** दर्प्पिकप्रतिसेवनाया दीर्घ-संसारमूलत्वात् इति प्रज्ञाप्यते। यदि पुनरेवमपि प्रज्ञाप्यमानो नाऽवबुध्यते तदा यतनया

---

**१. दार्ष्टान्तिके यो० खं० ॥ २. कृतश्च देहः सं० वा० मे० पु० मु० ॥ ३. तदा चिरकाल० वा० भो० पु० मु० ॥ ४. तु मु भाष्यप्रतिषु ॥ ५. तथा गीते- जेभा० खंभा० ॥**

समाधिमुत्पादयद्भिरुपेक्षितव्यः[1], यः पुनस्तरुणो मनाग् वृद्धो वा प्रगुणीभूतः[2] सन् तपः-संयमादिषु प्रत्यलो भवितेति ज्ञायते, तदा तं चिकित्सामप्रतिपद्यमानं प्रत्येवं प्रज्ञापना—

**काहं अछित्तिं अदुवा अहीहं[3] तवोविहाणेसु[4] य उज्जमिस्सं ।**
**गणं व[5] नीईए य सारविस्सं सालंबसेवी समुवेइ मोक्खं ॥ १८२ ॥**

यो ग्लानः सन्नेवमवबुध्यते- समर्थो भूतः सन् **अच्छित्तिं** प्रभूतलोकप्रव्राजनादिना तीर्थाऽव्यवच्छेदं **करिष्यामि** । **अदुवे**ति अथवा अह**मध्येष्ये** सूत्रतोऽर्थतश्च **द्वा**दशांगं दर्शन-प्रभावकाणि वा शास्त्राणि। यदि वा तपोलब्धि समन्वितत्वा**त्तपोविधानेषु** नानाप्रकारेषु **उज्जमिस्सं**ति उद्यंष्यामि- उद्यमं करिष्यामि। **गणं वा** गच्छं वा **नीत्या** सूत्रोक्तया **सारयि-ष्यामि** गुणैः प्रवृद्धं करिष्यामि । स एवं **सालंबसेवी** एतैरनन्तरोदितैरालम्बनैर्यतनया चिकित्सार्थमकल्प्यं[6]मपि प्रतिसेवमानः **समुपैति** प्राप्नोति **मोक्षं** सिद्धिमिति ॥ १८२ ॥

*इति श्रीमलयगिरिविरचितायां व्यवहारटीकायां*
*व्यवहारपीठिका समाप्ता॥ पीठिकायां ग्रंथाग्रं. ॥ २३५५ ॥*

---

१. ०तव्यम् - वा० भो० पु० मु० ॥ २. प्रगुणीकृतः - वा० मो० पु० ॥ ३. अधीहं - जेभा० खंभा० । अहीतं- वाभा० ॥ ४. तवोवधाणेसु - भाष्यप्रतिषु । ५. व णीएव तु सार० भाष्यप्रतिषु ॥ ६. कल्पमपि - पु० प्रे० ॥

# नोंध



KIRIT GRAPHICS
09898490091